# MAST – 116 (N)
# संस्कृत निबन्ध एवं अनुवाद
## खण्ड क
## इकाई1 – वैदिक एवं पुराण वाङ्मय पर आधारित निबन्ध

## इकाई की रूपरेखा


1.0उद्देश्य

1.1 प्रस्तावना

1.2 वेदानां महत्त्वम्

1.3 वेदाङ्गानां महत्त्वम्

1.4 उपनिषदां महत्त्वम्

1.5 पुराणानां महत्त्वम्

1.6 अभ्यासार्थ प्रश्न

1.6.1 वस्तुनिष्ठ प्रश्न

1.6.2 लघु-उत्तरीय प्रश्न

1.6.3 दीर्घ-उत्तरीय पश्न


## 1.0 उद्देश्य

इस इकाई के अध्ययन के पश्चात् शिक्षार्थी निम्नलिखित बिन्दुओं से सम्बन्धित विषयों का अवबोध कर सकेंगे-

- संस्कृत भाषा में वैदिक वाङ्मय से सम्बन्धित निबन्ध का अवबोध कर सकेंगे।
- विद्यार्थी वेदों के महत्त्व का अभिज्ञान कर सकेंगे।
- वेदाङ्गों के महत्त्व को जान सकेंगे।
- उपनिषदों के महत्त्व का अवबोध कर सकेंगे।
- पुराणों के महत्त्व का अभिज्ञान कर सकेंगे।

## 1.1 प्रस्तावना

निश्चित बन्ध को निबन्ध कहते हैं। निबन्ध किसी भी विषय का निश्चयात्मक वर्णन करता है। उसमें शब्द विन्यास, वाक्य विन्यास, भाषा, शैली आदि का शास्त्रीय सौन्दर्य दृष्टिगोचर होता है। संस्कृत भाषा में निबन्ध का लेखन शुद्धता का परम सोपान है। भाषायी शुद्धता के साथ ही विषयावबोध का इसमें अभिज्ञान होता है। इस प्रथम इकाई में आप वेदों के महत्त्व, वेदाङ्गों के महत्त्व, उपनिषदों के महत्त्व एवं पुराणों के महत्त्व को जान सकेंगे।

## 1.2 वेदानां महत्त्वम्

वेदशब्दस्य प्रायः अर्थः भवति “ज्ञानम्” । ज्ञानराशिरूपे वेदाः प्रतिष्ठिता इति। “इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायो यो ग्रन्थो वेदयति स वेदः” अर्थात् ये ग्रन्थाः न केवलं इष्टप्राप्तिं कारयन्ति अपितु अनिष्टपरिहारमपि कुर्वन्ति ते वेदा इति आचार्यसायणमते वक्तुं शक्यते। “अपौरुषेयं वाक्यं वेदः” इत्यपि कथितं वर्तते। वेदैः यथोक्तं तदेव धर्म इति। यथा – वेदप्रतिपाद्यप्रयोजनवदर्थो धर्मः। वेदः भारतीयज्ञानपरम्परायाः मूलं वर्तते। वेदैः आधिदैविकम्, आधिभौतिकम् आध्यात्मिकं च ज्ञानं प्राप्तुं शक्यते। वेदाः विश्वस्य न्यासाः वर्तन्ते। श्रुतिः, छान्दस्, आम्नायः इति वेदानां पर्यायाः सन्ति। कथ्यते यत् “यदि वयं सर्वस्मिन् जगति सत्त्वगुणस्य उद्रेकं प्राप्तुकामाः भवेम तर्हि वेदाः एव एकमात्रशरणमिति।” कथितञ्चापि वर्तते-

**विना वेदं विना गीतां विना रामायणीं कथाम् ।**

**विना कविं कालिदासं भारतं भारतं नहि॥**

वेदशब्द: विद्ज्ञाने इतिधातोः घञ्प्रत्यये कृते निष्पद्यते। अमरकोशे वाग्वर्गे दाक्षिणात्यव्याख्यायां धर्माधर्मौ वेदयति' इति वेद: व्याख्यात:। एवमेव ‘विद्सत्तायाम्, विद्लृलाभे, विद्विचारणे धातुभ्यः अपि घञि प्रत्यये कृते वेदशब्द: निष्पद्यते। सर्वप्रकारस्य महत्ज्ञानस्य स्रोतोभूतः वेदग्रन्थः प्राचीनतमः इति आधुनिकविकासे अपि अस्य महत्त्वपूर्णं योगदानम् अस्ति। एतेषु वेदेषु ज्ञानस्य विविधाः आधाराः सन्ति। यथा – आध्यात्मिकः, सामाजिकः, वैश्विकः, नैतिकः, दार्शनिकः च। ऋषयः एतान्वेदान्व्याख्याय लोकहिताय जगति प्रसारितवन्तः। वेदेषु विश्वबन्धुत्वं, श्रेष्ठत्वं, आध्यात्मिकं दैविकं च ज्ञानं वर्तते। यस्माद् वेदेभ्यः वर्तमानकालेऽपि जगतः सर्वज्ञानप्रेरणा प्रोद्भवति। मनुः स्वग्रन्थे मनुस्मृतौ 'सर्वज्ञानमयो हि सः अर्थात् वेदः' इति कथयति। वेदाः ज्ञानधनस्य निधिरूपे सन्ति। वेदाः ईश्वरस्य श्वसनवायुरूपाः इति शास्त्रेषु उक्ताः। जनसामान्यकल्याणस्य विषये वेदाः उपदेशं कुर्वन्ति - लोका समस्ताः सुखिनो भवन्तु इति। पूर्वकालात् एव व्यवहारेऽस्ति वेदपाठः। वेदश्रवणेन सर्वप्रकरिकाः शुद्धयः भवन्ति। भूमौ रोपितानि सर्वाणि बीजानि न प्ररोहन्ति स्म। वेदानां शक्तिः भवति भूमौ बीजानां उपरि आनेतुम्। वयं पृथिवीं नानाप्रकारेण विक्षोभयन्तः अशुद्धामपि कुर्मः। यदि पृथिवीमाता क्रुद्धा भवति तर्हि सा भूकम्पं, भूस्खलनं च कृत्वा विनाशं कर्तुं शक्नोति। वेदेषु विश्रामस्य भौतिकलाभस्य च मार्गाः साधनानि च विहिताः सन्ति। वेदाः मोक्षप्राप्तिमार्गं च दर्शयन्ति। वेदाः जीवानां कृते मातृपितृसदृशा इति मन्यन्ते। वैदिकवाङ्मये कथितञ्चापि वर्तते-

**‘मातृदेवो भव'**

**'पितृदेवो भव”**

**'स्वाध्यायान् मा प्रमदः**

**ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**

**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥‘**

**‘मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।**

**मित्रस्य चक्षुषा समीक्षामहे।**

**स्वस्ति न इन्द्रो वृद्धश्रवाः**

**स्वस्ति नः पूषा विश्ववेदाः।**

**स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः।**

**स्वस्ति नो बृहस्पतिर्दधातु॥ ॐ शान्तिः शान्तिः शान्तिः॥**

**यस्य राज्ञो जनपदे अथर्वा शान्तिपारगः।**

**निवसत्यपि तद्राराष्ट्रं वर्धते निरुपद्रवम्।**

अतः - ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति महाभाष्ये उक्तमस्ति । वेदेषु त्रिगुणैः (सत्त्वरजस्तमोभिः) प्रलोभितानां सर्वेषां जनानां कृते अभिप्रेता सूचना सन्ति। काम्यकर्मविहितेषु वेदेषु बहव्यः सामग्र्यः सन्ति। मोक्षप्राप्त्यर्थं प्रचुरं सत्त्वगुणं वेदेषु सन्ति। लौकिकजीवनस्य सम्यक्परिपालनाय वेदानाम् अध्ययनम् अत्यावश्यकं वर्तते। न केवलम् आध्यात्मिकम् अपितु लौकिकज्ञानस्यापि सहायकग्रन्थाः वेदाः इति केचन् विद्वांसः मन्यन्ते ।ज्ञानामृतपानेन प्रयोजनम् । तृषितस्य तृष्णाशमनाय पर्याप्तं जलम् विहाय अन्यत् किं प्रयोजनम्। एवमेव मुक्तिकाङ्क्षी जनः वेदानां पर्याप्तामृतज्ञानं ग्रहीतुं शक्नोति । भिन्न-भिन्न-रोगिणां कृते विविधानि औषधानि उपलभ्यन्ते, परन्तु वैद्यः केवलं तस्य रोग-अनुकूलम् औषधम् उपयोजयति। अस्माभिः यत् आकांक्षितम् तस्य प्राप्तिमार्गः वेदेषु वर्तते। अस्माभिः यत्प्राप्तं तस्य संरक्षणविधानमपि वेदेषु विद्यते। कस्यापि वस्तुप्राप्तिः तथा च प्राप्तस्य संरक्षणचिन्ता इति सर्वासां समस्यानां समाधानं वेदेषु वर्तते एव । वेदेषु योगात्मिका दृष्टिरनुपालनीया । अनेन "निर्योगो न सर्वोऽग्निः पवित्रः इति मन्तव्यः। वेदेषु होमः सत्याग्निः इति गण्यते। ज्वालानाम् उपरि ईश्वरः निवसति इति विश्वासः अस्ति। वेदाः वदन्ति यद् वायुः मन्दं प्रवहतु न तु व्याघ्रवत्। सूर्यदेवः अस्मान्न भक्षेत्। अहोरात्रं, चन्द्रपक्षस्य, मासस्य, वर्षस्य, ऋतोः (सर्वसंस्कारस्य) प्रभारी आकाशाः अस्मान्सान्त्वनां दातव्याः। एतानि सर्वाणि वेदजपेन सम्भवन्ति। पञ्चतत्त्वैः, संकायैः च मनसा च वयम् अनेकाः त्रुटयः कुर्मः। वेदप्रसारकारणाय तत्साहाय्येन तासां समस्यानां समाधानं कर्तुं शक्यते इति।

वेदाः भारतस्य धार्मिक-ऐतिहासिक-महत्त्वयुक्ते समृद्धे प्राचीने साहित्ये श्रेष्ठाः सन्ति। ऋग्वेदस्य वा उपनिषदः वा विषये वदामः, वैदिकसाहित्यं वैदिकयुगस्य–संस्काराणां अनुष्ठानानां च न केवलं रूपरेखा वर्तते, अपितु वेदाः सनातनधर्मस्य आधारभूत-आकारं ददति। भिन्न-भिन्नचिन्तनविधि-विषये अपि कथयति। वैदिकसाहित्यस्य माध्यमेन वयं आर्यसभ्यतायाः सामाजिक-राजनैतिकवित्तीयसङ्घस्य विषये अवगताः भवामः अतः वेदाः प्राचीनभारतीयसाहित्यस्य च मुख्यानि स्रोतांसि सन्ति। वैदिकसाहित्यं प्रारम्भिकवैदिकसाहित्यं श्रुतिरूपेण तथा च परवर्तीवैदिकसाहित्यं (स्मृतिः) स्मृतिरूपेण विभक्तम् अस्ति। ब्राह्मणाः – जगति स्तुत्यादीनां प्राथमिक-उदाहरणरूपे ब्राह्मणग्रन्थाः। ब्राह्मणग्रन्थेषु यज्ञस्य महत्त्वं तस्य निष्पादनस्य पद्धतिश्च वर्णिताऽस्ति। ते ब्राह्मणग्रन्थाः सनातनप्रगतेः मूलाः सन्ति। येषु भिन्नानां मन्त्राणां बहुविधव्याख्याः सन्ति। आरण्यका-वनग्रन्थरूपे प्रसिद्धाः सन्ति। आरण्यकाः नगरेभ्यः दूरं ऋषिभ्यः यज्ज्ञानमर्जितम् तत्सङ्कलनरूपे सन्ति। ते ब्राह्मणानां परिष्करणरूपेण भवन्ति। उपनिषदः ब्राह्मणानां परिष्करणभागाः सन्ति। तासां पुरातन-आर्यसाहित्ये उच्चस्थानं वर्तते। यतः ते गहनविषयान्, ब्रह्माण्डस्य निर्माणस्य अन्वेषणं च प्रबन्धयन्ति। ते कासाञ्चन दार्शनिकजिज्ञासानाम् अपि उत्तरं ददति, यथा ईश्वरस्य (ब्रह्मणः) आत्मनः च वास्तविकस्वरूपं तयोः निश्चितसम्बन्धश्च। उत्तरवर्तीवैदिककाले वेदाः स्मृतिरूपे स्थिताः। कथितञ्चापि वर्तते यत् श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी। वैदिकसूत्रेभ्यः अनेकनूतनाः परम्पराः निर्मिताः, एताः च वर्तमानसमयेऽपि सङ्गृहीताः सन्ति। सूत्राणि अल्पाक्षरम्, असन्दिग्धम्, सारवत्, विश्वतोमुखम् इति रूपे भवन्ति आसन् । वैदिकसूत्रसाहित्यम् अस्ति - श्रौतसूत्रं, गृह्यसूत्रं, धर्मसूत्रं, शूल्बसूत्रञ्च। वेदाङ्गानि व्याकरणम्, निरुक्तम्, शिक्षा, कल्पसूत्रम्, ज्योतिष् छन्दः च। उपवेदाः चापि वेदस्य महत्त्वं प्रतिपादयति। प्रत्येकं वेदस्य उपवेदः भवति। ते मुख्यतया

चतुर्वर्गेषु पृथक्कृताः सन्ति। आयुर्वेदः (औषधशास्त्रम्), धनुर्वेदः (युद्धशास्त्रम्), गन्धर्ववेदः (सङ्गीतशास्त्रम्), शिल्पवेदः च। वेदाधारितदर्शनानि ईश्वरस्य, सामाजिकजीवनस्य मृत्योश्च विषये दार्शनिकजिज्ञासानाम् उत्तरं ददति। दर्शनानि षट् प्रकाराणि सन्ति । वेदमूलकत्वात् पुराणानि सनातनधर्मे ईश्वरीयकथानां माध्यमेन भिन्न-भिन्न-देवतानाम् विशेषरूपेण त्रिमूर्तिदेवानां (ब्रह्माविष्णु महेश्वराणां) प्रशंसां कुर्वन्ति। वेदपूरकरूपे पुराणानि सनातनधर्मस्य महत्त्वपूर्णग्रन्थाः सन्ति। महर्षिः वेदव्यासः पुराणानां संकलनकर्तारूपे दृश्यते। वेदमूलकत्वात् धर्मशास्त्रमपि वैदिकसाहित्यस्य महत्त्वपूर्णाधारशिलात्वेन वर्तते। वेदेभ्यः प्रायः सर्वाः विद्याः निस्सृताः। कथितञ्चापि वर्तते – वेदोऽखिलं धर्ममूलम्।

केचन विद्वांसः मन्यन्ते यत् वैदिकयुगस्य पुरातत्त्वस्रोतांसि न सन्ति तथापि यूनेस्को इति वैश्विकसंस्थाद्वारा वेदाः विश्वस्य प्राचीनतम-उपलब्धन्यासरूपे उद्घोषिताः। एवं प्रकारेण विश्वस्य मुख्यानि साहित्यिकस्रोतांसि वैदिकसाहित्ये सन्ति। वैदिकयुगस्य विषये अध्ययनस्य एकमात्रं स्रोतः वेदः वर्तते अस्मात् कारणात् वैदिकसाहित्यस्य महत्त्वम् अस्ति। निगमरूपे वैदिकसाहित्यं विश्वसाहित्ये सनातनधर्मस्य आधार शिलारूपेण इति ज्ञातुं शक्यते । तेन विना सनातनधर्मः कदापि स्वरीतीणां नियमानां च स्थापना कर्तुं न शक्यते स्म। आदिकालादारभ्य वर्तमानयुगपर्यन्तं वैदिकसाहित्ये प्राचीनभारतस्य सांस्कृतिकपरिवेशानाम्, अनुष्ठानानां, नियमानां च विविध पुस्तकानां, च विषये सटीकसूचनाः प्राप्यन्ते। वैदिकसाहित्यं सनातनधर्मस्य असाधारणं महत्त्वं प्रतिपादयति। अनेन कथितुं शक्यते यत् वेदाः न केवलं भारतवर्षस्य अपितु वैश्विकसाहित्यस्य आधारभूताः ग्रन्थाः सन्ति। वेदस्य महत्त्वविषये काश्चन सूक्तयः सन्ति-

**वेदोऽखिलम् धर्ममूलम्**

**वेदे सर्वं प्रतिष्ठितम्**

**इष्टप्राप्तिरनिष्टपरिहारयोरलौकिकमुपायो यो ग्रन्थो वेदयति स वेदः**

**अपौरुषेयं वाक्यं वेदः**

**वेदप्रतिपाद्यप्रयोजनवदर्थो धर्मः इति**

**वेदाः हि यज्ञार्थमभिप्रवृत्ताः ।**

## 1.3 वेदाङ्गानां महत्त्वम्

वेदशब्दः संस्कृतभाषायाः विद्धातुना घञ् प्रत्यय योजनेन निष्पन्नः अस्ति। यस्य अर्थः ज्ञानस्य राशिः अस्ति। वेदानां गूढार्थावबोधनाय वेदाङ्गानां महती आवश्यकता अस्ति। तैः वैदाङ्गैः वेदानां सम्यक्तया परिज्ञानं कर्तुं शक्यते। यथा शरीरस्य अङ्गानि तस्य साहाय्यं कुर्वन्ति तथा वेदपुरुषस्य अपि अङ्गानि वेदानां अर्थपरिज्ञाने तेषां स्वरूपावबोधने च सहायतां कुर्वन्ति। अङ्गस्य व्युत्पत्तिः अस्ति-

**अङ्गयन्ते ज्ञायन्ते एभिरिति अङ्गानि ।**

वेदार्थावबोधाय स्वराद्यवगमाय विनियोगज्ञानाय वेदाङ्गानां महत्यावश्यकता अस्ति। अस्य भावपूर्तये एव वेदाङ्गानां जनिरभूत्। वेदस्य अङ्गानि वेदाङ्गानि। अर्थात् मुख्यस्य यत् साहाय्यं करोति तदङ्गमिति कथ्यते। अङ्गस्य सहायकं उपाङ्गं तथा उपाङ्गानां सहायकं प्रत्यङ्गमपि कथितमस्ति। अत्र तु वेदसहायकानि वेदाङ्गानि वर्णितानि सन्ति। तानि षड्वेदाङ्गानि एवं प्रकारेण सन्ति-

(१) शिक्षा- स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षा। अर्थात् यत् स्वरवर्णादीनाम् उच्चारणप्रकाराणां शिक्षणम् उपदेशञ्च करोति सा शिक्षा वेदाङ्गम् इति कथितमस्ति।

(२) कल्पः – कल्पवेदाङ्गं वेदपुरुषस्य हस्तरूपेण गृहीतमस्ति। पाणिनीयशिक्षायां कथितं वर्तते यत्- हस्तौ कल्पोऽथ पठ्यते। अस्य वेदाङ्गस्य चत्वारो भेदाः वर्णिताः सन्ति – कल्पसूत्रं, गृह्यसूत्रं, धर्मसूत्रं शूल्बसूत्रञ्चेति।

(३) निरुक्तम् – वेदाङ्गेषु निरुक्तं वेदपुरुषस्य श्रोत्ररूपेण स्थितमस्ति। पाणिनीयशिक्षायां वर्णितमस्ति यत् - निरुक्तं श्रोत्रमुच्यते।

(४) व्याकरणम् – व्याकरणं तु वेदपुरुषस्य मुखरूपेण स्थितमस्ति। ध्वन्यालोककारेण आनन्दवर्धनाचार्येण निगदितम् यत् "प्रथमे विद्वांसो हि वैयाकरणाः।" पाणिनीयशिक्षायां तु कथितमस्ति यत् –"मुखं व्याकरणं स्मृतम्"।

(५) ज्योतिषः–ज्योतिष्वेदाङ्गं तु चक्षुरूपेण वर्तते। पाणिनीयशिक्षायां कथितं यत्- ज्योतिषामयनं चक्षुः। अपरे ज्योतिषमाहात्म्यविषये कथितमस्ति यत् वेदास्तु यज्ञानां कृते सन्ति। यज्ञाश्च कालक्रमेण भवन्ति। अनेन प्रकारेण यो कालविधानशास्त्रं ज्योतिषं जानाति स एव यज्ञमपि जानाति।

पाणिनीयशिक्षायां षण्णाम् एतेषां महत्त्वं निरीक्ष्यैव प्रतिपाद्यते यत्-

**छन्दः पादौ तु वेदस्य हस्तो कल्पोऽथ पठ्यते।**

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**

**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥**

महर्षिपतञ्जलिमतानुसारेण वेदानां रक्षा वेदाङ्गैः क्रियते। क्रमेण तेषां महत्त्वं प्रतिपाद्यते-

## १.शिक्षा

शिक्षा घ्राणं तु वेदस्य' इति कथनेन पाणिनिना शिक्षाग्रन्थाः वेदपुरुषस्य नासिकास्थाने स्वीक्रियन्ते।। वर्णोच्चारणविधिः शिक्षाग्रन्थेषु वर्णितमस्ति। ऋग्वेदभाष्यभूमिकायां शिक्षायाः लक्षणम् उच्यते- यत् वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते शिक्ष्यते या सा शिक्षा। शिक्षाग्रन्थानां महत्त्वं प्रतिपादियन् सायणाचार्यस्य कथनम् अस्ति -

**तस्मात् स्वरवर्णाद्यपराधपरिहाराय शिक्षाग्रन्थोऽपेक्षितः।**

वेदेषु स्वराणाम् उच्चारणदोषेण अनर्थः भवति। अस्य एकम् उदाहरणं पाणिनीयशिक्षायां वर्णितमस्ति -

**दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**

**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥**

पाणिनीयशिक्षायां शम्भोः मतानुसारं-

**त्रिषष्टिश्चतुर्षष्टिर्वा वर्णा शम्भुमते मताः ।**

**प्राकृतं संस्कृतं चापि स्वयं प्रोक्ता स्वयम्भुवा ॥**

पाणिनीयशिक्षायाम् उच्चारणप्रक्रियायाः  वर्णनं कुर्वन्  गुणदोषाणां विवेचनमपि अस्ति -

**गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः,**

**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ।**

**माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः,**

**धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥**

अस्मिन् वेदाङ्गे वर्णः अकारादिः, स्वराः- उदात्तानुदात्तस्वरिताः, मात्राः ह्रस्वदीर्घप्लुताः, बलं, स्थानप्रयत्नौ, सामविधिना माधुर्यादिगुणसमन्वितवर्णोच्चारणम्, सन्तानः- संहितापाठम् अनुसृत्य सन्धिनियमानुकूलं पदप्रयोगः च वर्णितः अस्ति।

साम्प्रतं  पाणिनीयशिक्षा उपलभ्यमानेषु शिक्षाग्रन्थेषु  प्रमुखा वर्तते । अन्ये च विशिष्टाः शिक्षाग्रन्थाः सन्ति- नारदीयशिक्षा, याज्ञवल्क्यशिक्षा, व्यासशिक्षा माण्डूकीशिक्षा चेति। वेदानां विशुद्धः पाठोऽर्थावगमः वर्णोच्चारणादिविधिज्ञानं च शिक्षाग्रन्थैः विना अशक्यमस्ति।

## २.व्याकरणम्

व्याकरणशब्दस्य व्युत्पत्तिरस्ति - व्याक्रियन्ते विविच्यन्ते प्रकृतिप्रत्ययादयो यत्र तद् व्याकरणम्। षडङ्गेषु व्याकरणमेव प्रधानम्। पाणिनीयशिक्षायां  व्याकरणं वेदपुरुषस्य मुखं स्वीक्रियते। आचार्यः पतञ्जलिः व्याकरणस्य अध्ययनं  समस्तगुणानाम् साधनं मन्यते। व्याकरणे प्रकृति-प्रत्ययस्य विचारः,  सन्धिनियमाः, शब्दरूप-धातुरूपादि-निर्माणनियमाः, प्रकृतेः प्रत्ययस्य च स्वरूपावधारणं तदर्थनिर्धारणं विहितमस्ति। पाणिनि-कात्यायन-पतञ्जलयः मुनित्रयम् इत्यभिधीयते। पाणिनीयसूत्रेषु कात्यायनेन वार्तिकं पतञ्जलिना च महाभाष्यं विरचितम्। आचार्यपतञ्जलिः वेदरक्षणाय व्याकरणस्य उपयोगितां स्वीकुर्वन् तस्य पञ्च मुख्यानि तथा च त्रयोदशगौणप्रयोजनानि स्वीकरोति –

**रक्षोहागमलघ्वसन्देहाः प्रयोजनम्। व्याकरणाध्ययनस्य एतानि मुख्यप्रयोजनानि ।**

भर्तृहरिः  शब्दम्  एव  ब्रह्म मन्यते अतः व्याकरणं  दर्शनस्य श्रेण्यां प्रतिष्ठितमिति -

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥**

## ३.छन्दस्

पाणिनीयशिक्षायां छन्दोवेदाङ्गस्य विषये कथितमस्ति यत्- छन्दः पादौ तु वेदस्य। अन्यत्र अपि कथितमस्ति यत् यदक्षरपरिमाणकं तच्छन्दः। वर्णानामावरणरूपे छन्दांसि वर्तन्ते- छन्दांसि छादनात्। छन्दसः विना वाणी न उच्चरति- न हि छन्दसि वागुच्चरति। अपरमपि कथितमस्ति यत् छन्दहीनो न शब्दोऽस्ति न शब्दः छन्दवर्जितम्। वेदमन्त्राणाम् उच्चारणं छन्दसाम् अधीनं भवति। आचार्य कात्यायनस्य अनुसारं छन्दांसि अक्षराणां परिमाणबोधकानि भवन्ति- यदक्षरपरिणामं तच्छन्दः स्यात्। छन्दःशब्दः छद्धातोः निष्पन्नः अस्ति। वेदेषु मन्त्राः प्रायशश्छन्दोबद्धा एव। छन्दःशास्त्रविषयको मुख्यो ग्रन्थः आचार्यपिङ्गलप्रणीतं वर्तते। छन्दोमञ्जरी, वृत्तरत्नाकरः इत्यादयः ग्रन्थाः अपि लौकिकछन्दसां ज्ञानाय महत्त्वपूर्णाः सन्ति। वर्णगणनाधारितानि वैदिकछन्दांसि निम्नलिखितानि सन्ति- यथा गायत्री, त्रिष्टुप् , अनुष्टुप्, जगती, बृहती, पङ्क्तिः, उष्णिक् इति। लौकिकछन्दांसि मात्रागणनाधारितानि सन्ति। छन्दः वृत्तमपि कथितं वर्तते। अतो वृत्तज्ञानाय छन्दःशास्त्रम् अनिवार्यम्। छन्दःशास्त्राधारितः पिङ्गलाचार्यरचितः छन्दःसूत्रग्रन्थः उपलभ्यते।

### ४ .निरुक्तम्

“निरुक्तं श्रोत्रमुच्यते” इति पाणिनीयशिक्षायां निरुक्तं वेदपुरुषस्य श्रोत्ररूपेण वर्तते। निरुक्ते क्लिष्टवैदिकशब्दानां निर्वचनं कृतम्। यास्कप्रणीतं निरुक्तमेव प्रमुखो ग्रन्थः। निरुक्तग्रन्थस्य विषये सायणाचार्यस्य कथनं अस्ति-

**अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्।**

वैदिकशब्दानां संग्रहात्मको ग्रन्थो निघण्टुरिति कथ्यते। निघण्टौ पञ्चाध्यायाः सन्ति। तस्यैव व्याख्यानभूतं निरुक्तमेतत्। यास्को निरुक्ते स्वपूर्ववर्तिनः सप्तदशनिरुक्तकारान् परिगणयति। निरुक्ते चतुर्दश अध्यायाः सन्ति त्रीणि काण्डानि च सन्ति - नैघण्टुककाण्डं, नैगमकाण्डं दैवतकाण्डञ्चेति। निरुक्तस्य पञ्चविधकार्यत्वम्। निरुक्तस्य पञ्चविधत्वे उक्तञ्च-

**वर्णागमो वर्णविपर्ययश्च, द्वौ चापरौ वर्णविकारनाशौ ।**

**धातोस्तदतिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ।।**

### ५ .ज्योतिषम्

पाणिनीयशिक्षायां ज्योतिषशास्त्रं नेत्ररुपेण स्वीक्रियते । आचार्यलगधेन ज्योतिषविषये निगदितम् यत्-

**यथा शिखा मयूराणां नागानां मणयो यथा ।**

**तद्वद्वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम् ॥**

शुभमुहूर्तम् आश्रित्यैव विशिष्टोऽध्वरः प्रावर्ततेति शुभमुहूर्ताकलनाय ज्योतिषस्योदयोऽभूत्। अत्र सूर्यचन्द्रमसोर्ग्रहयोः नक्षत्राणां च गतिर्निरीक्ष्यते परीक्ष्यते विविच्यते च। सौरमासश्चान्द्रमासश्चोभयं परिगण्यतेऽत्र। मखमुहूर्तनिर्धारणे चान्द्रमासस्य प्राधान्यं लक्ष्यते। विषयेऽस्मिन् आचार्यलगधप्रणीतं वेदाङ्गज्योतिषम् इति ग्रन्थ एव साम्प्रतम् उपलभ्यते। अतीव गूढार्थकोऽयं ग्रन्थः। अद्यावधि न कोऽप्यस्यार्थावधारणे समर्थः। ज्योतिषस्य महत्त्वं तत्रोच्यते-

**वेदा हि यज्ञार्थमभिप्रवृत्ताः, कालानुपूर्वा विहिताश्च यज्ञाः ।**

**तस्मादिदं कालविधानशास्त्रं, यो ज्योतिषं वेद स वेद वेदम् ॥**

## ६.कल्पः

कल्पशब्दस्य अर्थ: अस्ति - न्यायः, नियमः, विधिः, कर्म आदेशश्च। सूत्रसाहित्यं कल्पवेदाङ्गनाम्ना ज्ञायते । सूत्रस्य लक्षणम् अस्ति -

**अल्पाक्षरमसंदिग्धं सारवद् विश्वतोमुखम् ।**

**अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥**

यज्ञविधानं सम्यग्रूपेण ज्ञातुं कल्पसूत्राणां ज्ञानम् आवश्यकम् अस्ति। अस्मिन् विषये आचार्यकुमारिलभट्टस्य कथनं अस्ति -

**वेदादृते अपि कुर्वन्ति कल्पैः कर्म इति याज्ञिकाः ।**

**न तु कल्पैर्विना केचिन्मन्त्रं ब्राह्मणमात्रकात् ॥**

कल्पसूत्रेषु विविधाध्वराणां संस्कारादीनां च वर्णनं प्राप्यते। मन्त्राणां विविधकर्मसु विनियोगश्च तत्र प्रतिपाद्यते। कल्पसूत्राणि चतुर्धा विभज्यन्ते—(क) श्रौतसूत्रम् (ख) गृह्यसूत्रम् (ग) धर्मसूत्रम् (घ) शुल्बसूत्रञ्च।

(क) श्रौतसूत्रम् – श्रौत्रसूत्रेषु श्रुतिप्रतिपादितयज्ञीयविधानानां सूक्ष्मविवेचनम् अस्ति । अस्मिन् दक्षिणात्यगार्हपत्य-आह्वनीयाश्च त्रिस्रः अग्नय, सप्तहविर्यज्ञानां सप्तसोमयज्ञानाम् एवं चतुर्दशयज्ञानां विधिर्विनियोगादिकं च प्रतिपाद्यते। तत्र प्रमुखाणि श्रौतसूत्राणि सन्ति- आपस्तम्बश्रौतसूत्रम्, मानवश्रौतसूत्रम्, आश्वलायनश्रौतसूत्रम्, शांखायनश्रौतसूत्रम्, बौधायनश्रौतसूत्रम्, कात्यायनश्रौतसूत्रम्, लाट्यायनश्रौतसूत्रम्, द्राह्यायणश्रौतसूत्रम् वैतानश्रौतसूत्रञ्च।

(ख) गृह्यसूत्रम् –गृह्यसूत्रेषु गृहस्थाश्रमस्य आचारसंहिताया: विशद्वर्णनमस्ति। मानवानां व्यक्तित्वविकासः संस्काराश्रितः भवति। षोडशसंस्काराणां पञ्चमहायज्ञानां सप्तपाकयज्ञानाम् अन्येषां च गृह्यकर्मणां सविशेषं वर्णनम् अस्ति। गृह्यसूत्राण्यपि कमप्येकं वेदम् आश्रित्य वर्तन्ते। तत्र प्रमुखाणि सन्ति-आश्वलायनगृह्यसूत्रम्, पारस्करगृह्यसूत्रम्, शांखायनगृह्यसूत्रम्, बौधायन-गृह्यसूत्रम्, आपस्तम्बगृह्यसूत्रम्, मानवगृह्यसूत्रम्, हिरण्यकेशीगृह्यसूत्रम्, भारद्वाज-गृह्यसूत्रम्, काठकगृह्यसूत्रम्, लौगाक्षिगृह्यसूत्रम्, गोभिलगृह्यसूत्रम्, जैमिनीयगृह्यसूत्रम् , खादिरगृह्यसूत्रं चेति।

(ग) धर्मसूत्रम् – धर्मसूत्रेषु धर्मस्वरूपं,मानवानां कर्त्तव्यं,धर्मरीतयः, चतुर्वर्णाश्रमाणां कर्तव्यादिकम्, अपराधदण्डविधानं, सम्पत्तिविभाजनम् अन्यच्च सामाजिकनियमादिकं वर्णितमस्ति। तत्र प्रमुखा ग्रन्थाः सन्ति बौधायन-धर्मसूत्रम्, आपस्तम्बधर्मसूत्रम्, हिरण्यकेशीधर्मसूत्रम्, वसिष्ठधर्मसूत्रम्, आपस्तम्बधर्मसूत्रम्, कात्यायनधर्मसूत्रञ्च।

(घ) शुल्ब सूत्रम् – वेदिकायाः शुल्बसूत्रं वेदाङ्गान्तर्गतं कल्पसूत्रस्यान्यतमम् अङ्गमस्ति। शुल्बसूत्राणां यज्ञादिषु विशेषयोगदानं भवति। अत्र यज्ञवेदीमापनस्य वर्णनमस्ति। शुल्बसूत्रं एव भारतीयज्यामित्याः मूलं मन्यते। शुल्वसूत्रं भारतवर्षे रेखागणितस्य पुरातनेतिहासस्य ज्ञानाय नितान्तमावश्यकमस्ति। वैदिककर्मकाण्डमेव शुल्वसूत्रस्य मुख्यविषयोऽस्ति। शुल्वशब्दस्यार्थो भवति 'रज्जूः'। अतः 'रज्वामापित' शुल्वसूत्रस्य प्रतिपाद्यविषयोऽस्ति। तत्र प्रमुखाणि शुल्वसूत्राणि सन्ति बौधायन शुल्बसूत्रम्, आपस्तम्बशुल्वसूत्रम्, कात्यायनशुल्बसूत्रम्, मैत्रायणीयशुल्ब सूत्रम्, वाराहशुल्बसूत्रं च।

## 1.4 उपनिषदां महत्त्वम्

भारतीयसंस्कृतौ वेदाः अखिलज्ञानमूलम्। वेदानां विभागः मन्त्रब्राह्मणरूपयो: वर्तते। कथितञ्चापि – मन्त्रब्राह्मणयोर्वेदनामधेयम्। मन्त्राः संहितारूपेण विराजन्ते तथा ब्राह्मणपदेन ब्राह्मणग्रन्थाः आरण्यकयोग्रन्थाः उपनिषद्ग्रन्थाः च परिगण्यन्ते। प्रायः ब्राह्मणग्रन्थाः कर्मकाण्डात्मकाः वर्तन्ते, आरण्यकाः प्राणविद्यात्मकाः उपनिषदः ज्ञानकाण्डात्मकाः विद्यन्ते। प्रस्थानत्रय्यां (उपनिषद्ब्रह्मसूत्रश्रीमद्भगवद्गीतासु) उपनिषद् प्रमुखरूपेण विराजते। उपनिषत्सु - आत्मविद्या, अज्ञाननाशः, आध्यात्मिकं ज्ञानं, रहस्यविद्या, निष्कामकर्म, प्राणविद्या, ब्रह्मसत्यता, अद्वैतवादः, एकात्मवादश्चेति विषयाः प्रधानतया वर्णिताः। शिष्याः गुरोः समीपं गत्वा रहस्यविद्यायाः अध्ययनं कुर्वन्ति इदमेव उपनिषद् इति कथ्यते।

विद्वांसः उपनिषदां नाम वेदान्त इति मन्यन्ते। वेदानाम् अन्तिमभाष्यम् उपनिषदः उपोपसर्गेण सद्मूलस्य च संयोगेन निर्मितः अस्ति । सद्धातुः गतिज्ञानप्राप्त्यर्थे गतिः, ज्ञानं, प्राप्तिः सन्दर्भे प्रयुक्तः । अस्य अर्थः अस्ति यत् येन ज्ञानेन परमार्थं अर्थात् ईश्वरस्य समीपतां प्राप्य तस्य तादात्म्यं स्थाप्यते । सद्धातोः त्रयः अर्थाः सन्ति - विनाशः, गतिः अर्थात् ज्ञानप्राप्तिः शिथिलता च। एवं प्रकारेण पापनाशकं, सत्यं ज्ञानं प्रदातुम्, आत्मनः रहस्यं व्याख्यातुम्, अविद्यां शिथिलं च यत् ज्ञानं, अपेक्षितं ज्ञानं यत्र निबद्धं सा उपनिषद। विविधानि आध्यात्मिकज्ञानस्य स्रोतांसि दृश्यन्ते। जीवनं संस्कृतं परिष्कृतं च कर्तुं उद्भूताः। उपनिषद् जीवनमरणभयम् अपसारयति इति उक्तम्, भारतीयदर्शनस्य सर्वासु धारासु उपनिषदः वर्तन्ते इति स्वीक्रियते ।

सत्यस्य अन्वेषणं ब्रह्मतादात्म्यं वा तासाम् उपनिषदां मुख्यविषयः अस्ति । जन्ममृत्युपूर्वं पश्चात् च कुत्र आस्म कुत्र स्मः कुत्र च गमिष्यामः, समग्रसृष्टेः कः नियन्त्रकः यस्य इच्छया अयं संसारः प्रचलति, तेन सह अस्माकं कः सम्बन्धः, एतानि सर्वाणि कौतुकानि उपनिषद्भिरेव निवारयितुं शक्यन्ते। उपनिषदां मुख्यम् उद्देश्यं यत् आभि: मनुष्याणां आत्मतत्त्वस्य अथवा ब्रह्मज्ञानस्य परिचयः भवति । एतत् एव ज्ञानम् आध्यात्मिकं ज्ञानं जन्ममरणचक्रात् मुक्तं कृत्वा मोक्षं प्रति नयति। अनेन ज्ञानेन एव वयं ज्ञातुं समर्थाः स्म: यत् शरीरे यत् किमपि अस्ति तत् जगति अपि वर्तते। इदम् अस्माकं शरीरं मर्त्यम् अस्ति। परन्तु तस्मिन् या प्राणशक्तिः, स आत्मा। अयमात्मा नित्यः, न विनश्यतीति।अयं आत्मा एव विश्वे वर्तमानस्य ईश्वरस्य अंश: अस्ति। जन्मसमये अयम् आत्मा परमात्मनः विरक्तः भूत्वा शरीरं प्रविशति, मृत्योः अनन्तरं पुनः तस्यैव परमात्मनः दिव्यप्रकाशे विलीयते। यस्मिन् क्षणे एतत् यातायातचक्रं विरमति सः क्षणः मोक्षस्य क्षणः अस्ति। आत्मा अस्मात् आगमनगमनचक्रात् मुक्तं भवितुम् इच्छति सर्वदा। तस्य एषः प्रयासः ईश्वरेण सह योगः इति उच्यते, अन्यथा कर्मानुसारेण मर्त्यलोकं पुनः आगच्छति, अनेके क्लेशाः च भवितुमर्हन्ति। सः जीवात्मरूपेण ईश्वर: प्रत्येकं जीवे निवसति। आत्मसाक्षात्कारद्वारा कोऽपि तस्य सामीप्यताम् आप्तुं शक्नोति परन्तु कर्मफलभोगकारणात् प्रारब्धाद्वा सः पुनः पुनः आगमनगमनचक्रे भ्रमति एव। जीवः ईश्वरस्य साहचर्यं केवलं तस्य साक्षात्कारं कृत्वा एव प्राप्तुं शक्नोति। उपनिषत्सु लौकिक-अलौकिक-शक्तिः प्राप्तेः उपायाः, तासां दिव्य-शक्तयः कथं सदुपयोगः करणीयः इति च कथ्यते? ब्रह्मजीवप्रकृतेः सम्पूर्णविकासस्य पक्षः अथ च जीवस्य पुनः ब्रह्मविलीनीकरणस्य प्रक्रिया च उपनिषत्सु दृश्यते । उपनिषद्भ्य: आत्मनः अनुभवः भवति। छन्दोग्योपनिषद्ग्रन्थे श्वेतकेतुः स्वयं स्वीकरोति यत् सः वेदाध्ययनं कृतवान्, परन्तु सः अद्यापि तत् अनुभवं प्राप्तुं न शक्तवान् यस्य माध्यमेन श्रुतम्, अश्रुतम्, अज्ञातं च श्रूयते, अवगन्तुं च शक्यते इति। एतादृशी उपनिषत्सु आध्यात्मिकयात्रा अस्ति ।

बृहदारण्यकोपनिषदि ऋषिः पुरुषस्य चत्वारः अपि वर्णाः ब्रह्मरूपाः इति व्याख्यापयति । एते चत्वारो वर्णा: केवलं विविधकार्यं कर्तुम् ईश्वरेण निर्धारिता: सन्ति। उपनिषत्सु आत्मनः सर्वव्यापित्वं परमं लक्ष्यम्। तस्य आधारेण प्रत्येकं जीवं विकासस्य समानावकाशं प्रदातुं, जीवात्मनः प्रति प्रेमभावना प्रसारयितुं च उपनिषदाम् इच्छा अस्ति। उपनिषत्सु केषुचित् स्थानेषु अपि संस्कारोल्लेखः तद्परिणामश्च

प्राप्यते, परन्तु ताः उपनिषदः तत्पर्यन्तमेव सीमिताः न सन्ति। ऋष : संस्कारस्य भौतिकरूपं प्रविश्य तस्य तत्त्वं प्राप्तुं प्रयतन्ते। उपनिषदः संस्कारान् आत्मसंयमस्य आधारं मन्यन्ते।

उपनिषदो हि अध्यात्मविद्यायाः स्रोतस्वरूपाः। एतदुद्भूता नानानिर्झरिण्यो धर्मशास्त्र-आचारशास्त्र-नीतिशास्त्रादिरूपेण सकलमपि भुवनं भागीरथीप्रवाह इव पावयन्ति। अध्यात्मप्रधानायां प्रस्थानत्रय्याम् उपनिषदो मूर्धन्यभूताः। प्रस्थानत्रय्याम् अन्यद्-द्वयं ग्रन्थरत्नं गीता ब्रह्मसूत्रं चेति परिगण्येते। वस्तुतो गीता ब्रह्मसूत्रं चेति द्वयमपि उपनिषदाश्रितमेव। एवं प्रस्थानत्रय्याम् उपनिषद एव परमप्रमाणत्वेन संग्राह्याः। मुण्डकोपनिषदि वेदादीनां गणना अपराविद्यायां वर्तते, उपनिषदां च पराविद्यायाम्। अपरा विद्या लौकिकविषयप्रधाना, परा च ब्रह्मज्ञानप्रधाना। अतएवोच्यते-

**तत्रापरा ऋग्वेदो यजुर्वेदः, अथ परा यया तदक्षरमधिगम्यते। मुण्डकोपनिषद् १-१-५)**

उपनिषदां महत्त्वमवधायेव १७तमशताब्द्यां दाराशिकोहो नाम राजकुमारः ५० उपनिषदां पारसीकभाषायाम् अनुवादं कृतवान्। तन्मूलकमेव विहितं लेटिनभाषानुवादम् आधीत्य शर्मण्यदेशीयो विद्वान् प्रसिद्धदार्शनिकः शोपेनहावर उपनिषदां गुणानुवादं कुर्वन्नाह- एता उपनिषदो मम जीवनस्य शान्तिसाधिकाः, मरणान्तरं चापि शान्तिसाधिका भविष्यन्ति। कथितञ्चापि वर्तते-

**तस्य ब्रह्मणः सत्तयैव वाक्चक्षुर्मन आदिकं स्वकर्म कर्तुं प्रभवन्ति।**

**यन्मनसा न मनुते येनाहर्मनो मतम्।**

**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥ केनोपनिषद् १-५**

जीवनेऽस्मिन् यदि ब्रह्मज्ञानं न स्यात् तर्हि जीवनं निष्फलमेव। तत्त्वज्ञानेन ब्रह्मदर्शनेन च जीवो मुक्तिं लभते -

**इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः।**

**भूतेषु भूतेषु विचिन्त्य धीराः, प्रेत्यास्माल्लोकादमृता भवन्ति॥ केनोपनिषद् २-५**

कठोपनिषदि ब्रह्मप्राप्तेः साधनं साधु वर्ण्यते। रूपकम् आश्रित्याभिधीयते यत्-शरीरेऽस्मिन् आत्मा रथी, शरीरं रथः, बुद्धिः सारथिः, मनः प्रग्रहः, इन्द्रियाणि हयाः, संयमेनेन्द्रियाश्वान् वशे कृत्वा रथिनम् आत्मानं प्रेक्षेत-

**आत्मानं रथिनं विद्धि शरीरं रथमेव तु।**

**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥**

**इन्द्रियाणि हयान्याहुर्विषयांस्तेषु गोचरान्।**

**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥ कठोपनिषद् १-३-३-४**

ब्रह्मणोऽनिर्वचनीयत्वम् आश्रित्यैव उपनिषत्सु नेति नेति प्रोच्यते। ब्रह्मसाक्षात्कार एव उपनिषदां चरमं लक्ष्यम् ब्रह्मसाक्षात्कारेणैव सर्वपापनिरोधो मोक्षावाप्तिश्च-

**तमेव विदित्वातिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाय। श्वेताश्वतरोपनिषद् ३-८**

उपनिषत्सु वेदाभिमतः त्रैतवादोऽपि प्रस्तूयते। तत्रैक ईश्वरः अभोक्ता साक्षीरूपश्च, द्वितीयो जीवः कर्मफलभोक्ता, तृतीया प्रकृतिश्च अचेतना। दृष्टान्तरूपेण प्रकृतिः वृक्षः, जीवेश्वरौ च तत्रस्थौ पक्षिणौ-

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।**

**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ॥ श्वेताश्वतरोपनिषद् ४-६**

वेदान्तप्रतिपादितस्य 'तत्त्वमसि' इति महावाक्यस्य मूलं छान्दोग्योपनिषदि प्राप्यते-

**तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो । छान्दोग्योपनिषद् ६-१२-३**

भगवद्गीतायां मुख्यतः प्रतिपादितस्य निष्कामकर्मयोगस्य मूलम् ईशोपनिषदि प्राप्यते-

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।**

**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ ईशावास्योपनिषद् २**

उपनिषत्सु वेदानां सारभागः सरलया अभिव्यभक्त्या प्रश्नोत्तररूपेण आख्यायिकासमन्वयेन च रुचिरां शैलीम् आश्रित्य प्रतिपाद्यते। उपनिषदः जीवने शान्तिप्रदायिकाः, आधिव्याधिनिरोधिकाः मनसः शान्तिदाः, आत्मनश्च प्रसादिकाः, अविद्यातमसमपसार्य ज्ञानप्रभाप्रसारिकाः, सर्वशास्त्रमूर्धन्यत्वेन समादृताश्च सन्तीति। एतासां महत्त्वम् अक्षुण्णं निर्विवादञ्च ।

## 1.5 पुराणानां महत्त्वम्

पुराऽपि नवं भवतीति पुराणम्। भारतीयसंस्कृतौ पुराणानां महत्त्वम् अत्यधिकं वर्तते। पुराणानां महत्त्वस्य विषये कथितञ्चापि-

**पुराणं सर्वशास्त्रेषु ब्रह्मणा प्रथमं स्मृतम् ।**

**अनन्तरं च वक्त्रेभ्यो वेदाः तस्य विनिर्गताः ॥**

पुराणस्य' शाब्दिकार्थः अस्ति - 'प्राचीना कथा' अथवा 'पुराणी कथा'। वैदिकसाहित्ये पुराणानां विषये कथितं यत् "प्राचीनवृत्तान्तः" पुराणमिति। पुराणानां रचयिता वेदव्यासमुनिः अस्ति। पुराणानि सनातनस्मृतीनां प्रमुखाः भागाः सन्ति। सर्वयुगेषु पुराणसंकलनकर्ता व्यासमुनिः अस्ति। वर्तमानयुगस्य कृते सः पराशर-ऋषिपुत्रः कृष्णद्वैपायनः इति परिचयः। परम्परानुसारं एतानि महर्षिवेदव्यासेन द्वापरयुगस्य अन्ते लिखितानि, आधुनिकविद्वांसः तु प्रथमसहस्राब्दस्य अन्ते स्थापयन्ति। कथितञ्चापि वर्तते-

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।**

**वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम् ॥**

भारतीयधर्मग्रन्थेषु पुराणानां महत्त्वम् अस्ति। पुराणमाध्यमेन न केवलं भारतस्य विषये अपितु विश्वस्य विषये अपि ज्ञातुं शक्नुमः। अत्र भारतस्य, ऐतिहासिक-प्रागैतिहासिक-शासकानां, तेषां वंशजानां च विषये प्रामाणिकसूचनाः प्राप्यन्ते। अत्र भारतीयवैदिकदेवानां, दिव्यजीवानां, तेषाम् उत्पत्तिकथानां च सम्पूर्णं चित्रं दृश्यते। अस्मिन्शास्त्रे वर्णितानि वास्तुकलेत्यादीनि विविधानि विज्ञानानि अध्येतुं

शक्यन्ते। इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् इति महाभारतकृता वेदार्थस्य विशदीकरणार्थं पुराणानां महत्त्वरूपेण प्रतिपाद्यते। धर्मार्थकाममोक्षात्मक-चतुर्वर्ग-साधनाद् पुराणानां वेदत्वं प्रतिपाद्यते। पुराणं पञ्चमो वेद इत्याद्रियते। उक्तम् च भागवते-

**इतिहासपुराणं च पञ्चमो वेद उच्यते ।**

पुराणशब्दार्थो बहुधा निरुच्यते- (1) पुराणम् आख्यानं पुराणम् इति, अर्थात् प्राचीनानि आख्यानानि पुराणानीति। (2) यस्मात् पुरा हि अनति इदं पुराणम् (वायुपुराण), यत् पुरा सजीवम् आसीत् तत् पुराणम्। (3) जगतः प्रागवस्थाम् अनुक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम् (सायण, ऐ० ब्रा०, भूमिका), संसारोत्पत्तेः विकासक्रमस्य च बोधकं पुराणम्। (4) पुरार्थेषु आनयतीति पुराणम् (पद्मपुराण),पुराणेषु पञ्चलक्षणाःउक्ताः - सर्गः, प्रतिसर्गः (अर्थात्सृष्टिः ततः सृष्टिः), वंशः, मन्वन्तरः वंशानुचरितं। सरलरूपे वेदव्याख्यानं वेदानां महिमा च अपारं किन्तु तस्य शब्दावली कठिना, प्रतिपादनप्रक्रिया च अत्यन्तं जटिला अस्ति। एते ब्राह्मणग्रन्थानां, निरुक्तस्य, छन्दसः, व्याकरणस्य इत्यादीनाम् आधारेण कष्टेन अवगन्तुं शक्यन्ते परन्तु पुराणं सरलशब्दैः आख्यानशैल्या च सर्वान् अर्थान्प्रसारयति येन सामान्यबुद्धिपाठकानां कृते अपि आकर्षका भवन्ति । अतः वेदबोधाय पुराणसाहाय्यं ग्रहीतुं प्रशस्तम्। नारदपुराणे उक्तम् –

**सर्वेवेदाः पुराणेषु कालान्तरे पूज्यन्ते।**

**पुराणेषु वेदाः प्रतिष्ठिताः इति न संशयः ॥**

संस्कृतसाहित्ये पुराणानां विशेषं स्थानम् अस्ति। वेदानाम् अत्यन्तं रहस्यमयतत्त्वानां तथा च कर्मकाण्डस्य, उपसनाकाण्डस्य तेषां ज्ञानकाण्डस्य च सरलतमविवरणानां सरलभाषायां विविधकथाद्वारा सामान्यजनस्य समक्षं व्याख्यातुं तस्य सामर्थ्यं वर्तते। महाभारते उक्तम् ये अध्यात्मं प्रतिगच्छन्ति ते पौराणिककथानाम् अध्ययनेन दार्शनिकज्ञानं प्राप्नुवन्ति। वेदेषु संक्षेपेण वर्णिताः कथाः पुराणेषु विस्तरेण कथिताः सन्ति। राजनीतिः, धार्मिकनीतिः, इतिहासः, समाजशास्त्रं, ग्रहविज्ञानं, आयुर्वेदः, अलंकारशास्त्रं, व्याकरणं, भूगोलं, ज्योतिषशास्त्रं इत्यादयः सर्वे विज्ञानानि पुराणेषु प्रतिपादिताः सन्ति। न कश्चित्विषयः पुराणेषु न उल्लिखितः। भारतीयसंस्कृतेः विशिष्टज्ञानं केवलं पुराणात् एव प्राप्नुमः। महर्षिव्यासः पुराणद्वारा मानवसमाजस्य आध्यात्मिककल्याणाय, आदर्शपुरुषाणां सच्चरित्राय, भक्तिमयजीवनाय, धार्मिकाचरणाय च एतादृशीनां कृतीनां वर्णनं कृतवान् अस्ति। पुराणानां कथारूप-उपदेशानां कारणात् अद्यापि भारतजनानां मनसि तेषां पुरातनसंस्कृतिः अङ्किता अस्ति। पुराणेषु सनातनधर्मस्य कल्याणमार्गाः (कर्म, पूजा, ज्ञानम्) विविधरूपेण प्रस्तुताः सन्ति। पुराणेषु चतुर्णां पुरुषार्थानां (धर्म-अर्थ-काम-मोक्षाणाम्) अतीव सुन्दरं वर्णनं वर्तते। चतुर्णां परस्परं कः सम्बन्धोऽपि सुव्याख्यातः। स्त्रीणां विना मानवजीवनं समाजं च कल्पयितुं न शक्यते। स्त्रीणां महत्त्वं ज्ञात्वा पुराणेषु नारीणां गौरवम्, पितृसम्पत्तिविषयककन्याधिकारः, स्त्रीधनं, नारीणां शिक्षायाः स्वरूपं, भार्यास्थानमं, विधवानां स्थितिः सतीरीतिश्च इत्यादयः उल्लिखिताः सन्ति।

अष्टादशपुराणे भारतीयदर्शनस्य महत्त्वपूर्णसिद्धान्तानां संग्रहः अस्ति। एतेषु भक्तिः, ज्ञानं कर्ममार्गः च इति मुख्यविचाराः सन्ति ये धार्मिकानुयायिनां मार्गदर्शनं कुर्वन्ति एवं विशेषतया धार्मिक-सांस्कृतिक-शैक्षिक-दृष्ट्या अष्टादशपुराणानां महत्त्वम् अत्यन्तं महत्त्वपूर्णम् अस्ति । एते धर्मस्य, ज्ञानस्य समाजस्य च विविधपक्षम् अवगन्तुं धार्मिकजीवने सम्यक् दिशां च प्रदातुं साहाय्यं कुर्वन्ति। पुराणानि साहित्यिकाध्यात्मिकज्ञानस्य कोषरूपेण विद्यमानानि सन्ति। यानि अतीत-वर्तमान-भविष्याणां विषये ज्ञानं ददति। अस्मिन्जगति पुराणानि आधिदैविक-आधिभौतिक-आध्यात्मिकविद्यानां ग्रन्थाः कथ्यन्ते। अस्मभ्यः ग्रन्थेभ्यः न केवलं ब्रह्माण्डज्ञानं प्रादुर्भवति, अपितु व्रतोपवासानां महत्त्वमपि एभिः ज्ञातुं शक्यन्ते। जगति विकाराः अस्माकं जीवनं कथं प्रभावितं कुर्वन्ति तथा ईश्वरकृपामाध्यमेन सर्वाणि

कार्याणि केन प्रकारेण सम्यक्तया परिचलन्तीति पुराणेषु व्याख्यायते। परम्परागतरूपेण अत्र प्रमुखानि पुराणानि अष्टादश सन्ति। पुराणानि प्रायः प्रमुखतया आख्यान-रूपेण वर्णितानि सन्ति। कुत्रचित् रामायणीय-महाभारतीयप्रवाहशैल्यां लिखितानि सन्ति। कुत्रचित् स्थानीयभाषायाः प्रभावस्य, स्थानीयधर्मपरम्पराणां समावेशस्य च प्रमाणानि सन्ति। एतेषु धार्मिकग्रन्थेषु ईश्वरस्यभक्तिः, आयुर्वेदः, ज्योतिषशास्त्रं, ब्रह्माण्डशास्त्रं इत्यादीनि पारम्परिक-विज्ञानानि धर्मकर्मपुनर्जन्म इत्यादयः अनेके विषयाः च सन्ति। पुराणेषु सृष्टेः विनाशपर्यन्तम् इतिहासाः, राजा-वीर-सन्त-देवानां वंशावली, सनातन-ब्रह्माण्ड-विज्ञानस्य, दर्शनस्य, भूगोलस्य च वर्णनं विद्यते।

पुराणेभ्यः उत्पन्नानां ग्रन्थानां यथायोग्यं महत्त्वं दत्तम्। तेषां संकलनं ब्राह्मणानां विशेषसमूहेन दृष्टिकोणविशेषस्य प्रचारार्थं कृतम् आसीत्। एतेषु ग्रन्थेषु विष्णुशिवदेवीदुर्गा-इत्यादीनां अनेकदेवतानां कथाः, आख्यानानि च वर्णिताः सन्ति। पुराणानां विविधस्थानीयभाषासु अनुवादः, भवति। एते ग्रन्थाः वंशपरम्परानुसारेण मौखिकरूपेण प्रसारिताः भवन्ति। अष्टादशप्रमुखानि पुराणानि तथा च केचन लघु-पुराणानि सन्ति। येषु देवदेव्याः विविधाः कथाः, स्तोत्राणि, प्राचीन इतिहासस्य रूपरेखा, ब्रह्माण्डविज्ञानं, जीवनस्य नियमाः, संस्काराः, आध्यात्मिकज्ञानस्य निर्देशाः च सन्ति। अष्टादशपुराणानां विषये निगदितम् यत् –

**मद्वयं भद्वयं चैव बत्रयं वचतुष्टयम् ।**

**अनापलिङ्गकूस्कानि पुराणानि पृथक्-पृथक् ॥**

पुराणस्य अष्टादशपुराणानि सन्ति- ब्रह्मपुराणं, ब्रह्मवैवर्तपुराणं, ब्रह्माण्डपुराणं, भागवतपुराणं, विष्णुपुराणं, मत्स्यपुराणं, कूर्मपुराणं, वाराहपुराणं, वामनपुराणं, शिवपुराणं, लिङ्गपुराणं, स्कन्दपुराणं, मार्कण्डेयपुराणं, अग्निपुराणं, नारदपुराणं, पद्मपुराणं भविष्यपुराणं तथा गरुडपुराणं च। केचन प्रमुखाःउपपुराणेषु देवीभागवतं, नरसिंहं, वायुपुराणं, स्थलपुराणं, नीलमतपुराणंचअन्तर्भवति।प्रमुखपुराणरूपे अष्टादशपुराणानि, अधोलिखित विभाजेनविधिना अवगन्तुं शक्यन्ते-

- सात्विकपुराणानि – (1)विष्णुपुराणम् (2) नारदपुराणम् (3) श्रीमद्भागवतपुराणम् (4) गरुडपुराणम् (सुपर्ण) (5) पद्मपुराणम् (6) वराहपुराणम्
- राजसिकपुराणानि – (7)ब्रह्मपुराणम् (8) ब्रह्माण्डपुराणम् (9) ब्रह्मवैवर्तपुराणम् (10) मार्कण्डेयपुराणम् (11) भविष्यपुराणम् (12) वामनपुराणम्
- तामसिकपुराणानि – (13) मत्स्यपुराणम् (14) कूर्मपुराणम् (15) लिङ्गपुराणम् (16) शिवपुराणम् (17) स्कन्दपुराणम् (18) अग्निपुराणम्

पुराणेषु उल्लिखितानां विविधानां विषयाणां चर्चा विश्लेषणं च भवति तदा स्वयमेव स्पष्टं भवति यत्पुराणानां महत्त्वं किमर्थम् इति। न कश्चित्जीवनस्य पक्षो विद्यते यः पुराणेषु न उल्लिखितः। पुराणेषु न केवलं विविधविषयाणाम् उल्लेखः भवति अपितु वेदानां जटिलसूत्राणां सरलभाषया आख्यानरूपेण व्याख्यानं भवति। अस्मिन्युगे धर्मरक्षणस्य भक्तेः सुन्दरविकासस्य च सर्वं श्रेयः पुराणसाहित्ये गच्छति।

## 1.6 अभ्यासार्थ प्रश्ना :

**1.6.1वस्तुनिष्ठ प्रश्न**

1. कति वेदाङ्गानि -

(क) त्रीणि(ख) चत्वारि (ग) पञ्च(घ) षट्

2. सर्वप्राचीनतमः वेदः -

(क) ऋग्वेदः (ख) यजुर्वेदः (ग) सामवेदः (घ) अथर्ववेदः

3. पुराणम् -

(क) चतुर्लक्षणम् (ख) त्रिलक्षणम् (ग) पञ्चलक्षणम् (घ) एतेषु नास्ति

4. एतत् सात्त्विकपुराणेषु गण्यते -

(क) विष्णुपुराणम् (ख) मत्स्यपुराणम् (ग) कूर्मपुराणम् (घ) लिङ्गपुराणम्

5. आध्यात्मिविद्यायाः प्रमुखस्रोतरूपेण विद्यते -

(क) ब्राह्मणग्रन्थाः (ख) उपनिषद्ग्रन्थाः (ग) पुराणग्रन्थाः (घ) एतेषु नास्ति

**1.6.2लघु-उत्तरीय प्रश्ना :**

1. पुराणंपञ्चलक्षणम् इत्यस्य समीक्षा कार्या।
2. वेदाङ्गानां परिचयो देयः ।
3. उपनिषद्-पदस्य व्याख्या कार्या।
4. वेदानां परिचयो देयः।
5. सात्त्विकपुराणानां वर्णनं कुरुत।

**1.6.3दीर्घ-उत्तरीय प्रश्ना :**

1. पुराणानां महत्त्वं प्रतिपादयत।
2.वेदानां उपयोगिता प्रदर्शयत।
3. उपनिषदः आध्यात्मिकतायाः वर्णनं कुरुत।
4.वेदाङ्गानां सविस्तरं वर्णनं कुरुत।
5. पुराणानां भेदानां सविस्तरं वर्णनं कुरुत।

# इकाई 2– दार्शनिक निबन्ध

इकाई की रूपरेखा

2.0 उद्देश्य
2.2 प्रस्तावना
2.2 भारतीयदर्शनानां महत्त्वं वैशिष्ट्यञ्च
2.3 ब्रह्म सत्यं जगन्मिथ्या
2.4 गीता सुगीता कर्त्तव्या
2.5 एवं नास्ति योगसमं बलम्
2.6 अभ्यासार्थ प्रश्न
2.6.1वस्तुनिष्ठ प्रश्ना :
2.6.2 लघु-उत्तरीय प्रश्ना :
2.6.3 दीर्घ-उत्तरीय प्रश्ना :

## 2.0 उद्देश्य

इस इकाई के अध्ययन के पश्चात् शिक्षार्थी निम्नलिखित बिन्दुओं से सम्बन्धित विषयों का अवबोध कर सकेंगे-

- संस्कृत भाषा में उपनिबद्ध दार्शनिक विषयों का अवबोध प्राप्त कर सकेंगे।
- भारतीय दर्शन के महत्त्व एवं वैशिष्ट्य को जान सकेंगे।
- ब्रह्म की सार्वभौमिकता एवं सर्वव्यापकता का अवबोध कर सकेंगे।
- श्रीमद्भगवद्गीता के महत्त्व का अभिज्ञान कर सकेंगे।
- योग के बल एवं कौशल से आत्मबल को जागृत करने का ज्ञान प्राप्त कर सकेंगे।

## 2.1 प्रस्तावना

भाषायी विविधता एवं व्यापकता में निश्चित बन्ध को निबन्ध कहते हैं। निबन्ध  किसी भी विषय का निश्चयात्मक वर्णन करता है। उसमें शब्द विन्यास, वाक्य विन्यास, भाषा, शैली आदि का शास्त्रीय सौन्दर्य दृष्टिगोचर होता है। संस्कृत भाषा में निबन्ध का लेखन शुद्धता का परम सोपान है। भाषायी शुद्धता के साथ ही विषयावबोध का इसमें अभिज्ञान होता है। इस द्वितीय इकाई में आप दार्शनिक निबन्धों के अन्तर्गत भारतीयदर्शनों के महत्त्व एवं वैशिष्ट्य, सृष्टि की सर्वोच्च सत्ता ब्रह्म की सार्वभौमिकता एवं व्यापकता,श्रीमद्भगवद्गीता के महत्त्व, उपनिषदों के महत्त्व एवं पुराणों के महत्त्व को जान सकेंगे।

## 2.2 भारतीयदर्शनानां महत्त्वं वैशिष्ट्यञ्च

दर्शनपदं दृश्-धातोः ल्युट्-प्रत्ययपूर्वकं निष्पन्नम्। अस्य दर्शनपदस्य व्युत्पत्तिरस्ति यत् "दृश्यते अनेन इति दर्शनम्" तथा च दृश्यते यत् तत् दर्शनम्। प्रथमे दर्शनपदं साधनरूपेऽस्ति अपरे च साध्यरूपेऽपि वर्तते। दर्शनं आत्मसाक्षात्कारस्य प्रमुखः सोपानः वर्तते। शैवदर्शने कथितं वर्तते यत् – सिद्धविषयज्ञानं दर्शनम्। अर्थात् यत्र विषयज्ञानं (तत्त्वमीमांसात्मकं, प्रमाणमीमांसात्मकं तथा आचारमीमांसात्मकं) सिद्धं भवति तदेव दर्शनपदेन अभिधीयते। सांख्यमते निगदितं यत् एकमेव दर्शनं ख्यातिरेव दर्शनम्। तत्र दर्शनस्य विशेषता वर्तते यत् दर्शनचक्षुषा मनुष्यः सृष्टौ आध्यात्मिकं जीवनं जीवति। दुःखनिवृत्तिः,सुखप्राप्तिःच दर्शनस्य प्रमुखं लक्ष्ये वर्तेते। भारतीयदर्शने सर्वविचाराणां सम्यग्रूपेण समादरं वर्तते। भारतीयदर्शनशास्त्रं प्रमुखरूपेण द्विविधात्मकं (नास्तिकास्तिकात्मकं) वर्तते-

❖ आस्तिकदर्शनम् – आस्तिकदर्शनस्य अभिप्रायः वर्तते यत् यानि दर्शनानि प्रधानतया

- वेदान् प्रमाणरूपेण स्वीक्रियन्ते|
- ईश्वरस्य सत्ता मन्यन्ते|
- पुनर्जन्म अस्तीति विश्वसन्ति|

तानि दर्शनानि प्रमुखरूपेण निम्नलिखितानि सन्ति -

१. न्यायदर्शनम् (प्रवर्तकः महर्षिः गौतमः)
२. वैशेषिकदर्शनम् (प्रवर्तकः महर्षिः कणादः)
३. साङ्ख्यदर्शनम् (प्रवर्तकः महर्षिः कपिलः)
४. योगदर्शनम् (प्रवर्तकः महर्षिः पतञ्जलिः)
५. पूर्वमीमांसादर्शनम् (प्रवर्तकः महर्षिः जैमिनिः)
६. उत्तरमीमांसादर्शनम् (प्रवर्तकः महर्षिः बादरायणव्यासः)

नास्तिकदर्शनम् –

❖ नास्तिकदर्शनम् – नास्तिकदर्शनस्य अभिप्रायः वर्तते यत् यानि दर्शनानि प्रधानतया

- वेदान प्रमाणरूपे न स्वीकुर्वन्ति|
- ईश्वरस्य सत्तां न मन्यन्ते |
- पुनर्जन्म नास्तीति विश्वसन्ति|

तानि दर्शनानि प्रमुखरूपेण निम्नलिखितानि सन्ति -

१. चार्वाकदर्शनम् (प्रवर्तकः चार्वाक: बृहस्पतिः)
२. बौद्धदर्शनम् (प्रवर्तकः गौतमबुद्धः)
३. जैनदर्शनम् (प्रवर्तकः महावीरस्वामी)

अत्र शास्त्रार्थपरम्परायां वादे वादे जायते तत्त्वबोधः इति विश्वसन्ति। अत्र तर्कः केवलं बौद्धिकविलासः नास्ति अपितु जीवनपद्धतिः वर्तते। भारतीयदर्शने त्यागतपोमयता, आध्यात्मिकता, वसुधैवकुटुम्बकत्वं, जिज्ञासा, एकत्वेवादश्च प्रमुखरूपेण विराजन्ते। अत्र द्वैतरूपे सक्रमात्मिका, सखण्डात्मिका, साकारात्मिका, द्वैतात्मिका,च अद्वैतरूपे सत्ता अक्रमात्मिका, अखण्डात्मिका, निराकारात्मिका, अद्वैतात्मिका विद्यते।

प्रेक्षणार्थकाद् दृश् धातोः (दृशिर् प्रेक्षणे) ल्युट्-प्रत्यये कृते दर्शनशब्दो निष्पद्यन्ते। किं नाम दर्शनम् ? दृश्यते अनेन इति दर्शनम् । येन साधनेन इदं विश्वं , इदं वस्तुजातं , ब्रह्म, जीवात्मा, प्रकृतिश्च याथातथ्येन दृश्यन्ते निरीक्ष्यन्ते परीक्ष्यन्ते विविच्यन्ते च तद् दर्शनम् । अतः समग्रमपि आध्यात्मिकम् आधिभौतिकं च विवेचनं दर्शनशब्दान्तर्गतं भवति । किं ब्रह्म ? तस्य किं स्वरूपम् ? कः ईश्वरः ? के तस्य प्राप्तेरुपायाः ? अस्मिन् जगति किं शाश्वतं तत्त्वम् ? इयं सृष्टिः कुत आबभूव ? जीवात्मनः किं स्वरूपम् ? कः पुनर्जायते ? किं लिङ्गशरीरम् ? जीवस्य कुत उद्भूतिः ? किं तस्य लक्ष्यम् ? कथं मोक्षावाप्तिः ? आत्मा चेतनोऽचेतनो वा ? कः सृष्टेः कर्ता ? किं जीवनस्य कर्तव्यम् ? कश्च जीवनस्य साधिष्ठः पन्थाः ? इत्यादयोऽनुयोगा यत्र सूक्ष्मेण रूपेण विविच्यन्ते तद् दर्शनम् । सूक्ष्मेक्षिकया तत्त्वार्थदर्शनमेव दर्शनम् इत्यवगन्तव्यम् । यथोच्यतेः –

केनेषितं पतति प्रेषितं मनः, केन प्राणः प्रथमः प्रति युक्तः ।

केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति ॥ केनोपनिषद् १-१

भारतीयदर्शनानि स्थूलरूपेण द्विधा विभज्यन्ते-आस्तिकदर्शनानि, नास्तिकदर्शनानि च। यानि दर्शनानि वेदानां प्रामाण्यम् स्वीकुर्वन्ति, तानि आस्तिकदर्शनानीति व्यवह्रियन्ते । यानि च वेदानां प्रामाण्यं न स्वीकुर्वते तानि नास्तिकदर्शनानि । तत्र न्याय-वैशेषिक- सांख्य-योग-मीमांसा-वेदान्ताख्यानि षड्दर्शनानि आस्तिकदर्शनानीभिधीयन्ते । चार्वाक-जैन-बौद्धदर्शनानि नास्तिकदर्शनानि इति निश्चीयन्ते । विभाजनं चैतद् वेदानां प्रामाण्याप्रामाण्यमूलकमेवेति सम्यग् अवधारणीयम् ।

भारतीयदर्शनानां महत्त्वं मोदावहं यद् निखिलेऽपि भुवने पाश्चात्त्याः पौरस्त्याश्च विपश्चितो भारतीयदर्शनानां मुक्तकण्ठेन एकस्वरेण महत्त्वं स्वीकुर्वन्ति। सत्यपि मतभेदे, सत्यपि राष्ट्रियपक्षपाते, सत्यपि स्वोत्कर्षचारे च भारतीयदर्शनानां महत्त्वविषये न कस्यापि विदुषो विप्रतिपत्तिः। विश्ववाङ्मये भारतीयदर्शनानि ज्ञान-प्रभाभास्वरेण चिन्तनेन, स्वपरपक्षालोचननिपुणेन वैदुष्येण, तत्त्वार्थग्रहणैकप्रवणेन विवेकेन, अधृष्येण धीप्रकर्षेण, संकीर्णतादोषानवलिप्तेन विवेचनेन, पूर्वाग्रहरहितेन विश्लेषणेन, मनोज्ञया विवेचनशैल्या, हृद्यया भावाभिव्यक्त्या, रुचिरया पदावल्या च तरणिवत् तेजसमुच्चयेन चकासति ।

भारतीयदर्शनानां वैशिष्ट्यम् भारतीयदर्शनानां चिन्तनपद्धतिरेव पाश्चात्त्यदर्शनेभ्यो भिन्ना । पाश्चात्त्यदर्शनेषु दर्शनानाम् उद्भवविषये विविधा वादाः प्रस्तूयन्ते, तद्यथा- आश्चर्यजन्यत्वं, सन्देहमूलकत्वं , मानवव्यवहाराध्ययनमूलकत्वं ,ज्ञानानुरागमूलकत्वं वा।

परं भारतीयदर्शनानां मूलम् आश्चर्यादिकं नास्ति । तस्य मूलं त्रिविधदुःखात्यन्तनिवृत्तिरस्ति । त्रिविध- दुःखात्यन्तनिवृत्तिश्च अध्यात्मज्ञानेन आध्यात्मिकप्रवृत्त्या वा भवतीति भारतीय ज्ञान संमतम् -

दुःखत्रयाभिघातात् जिज्ञासा तदपघातके हेतौ ।

दृष्टे साऽपार्था चेत् नैकान्तात्यन्ततोऽभावात् ॥ सांख्यकारिका.1

सांख्यानुसारं 'व्यक्ताव्यक्तज्ञविज्ञानाद्' दुःखात्यन्तनिवृत्तिः संजायते । भारतीयदर्शनेषु अध्यात्म-भावना अनुस्यूता ओता प्रोता च। आध्यात्मिकीं भावनां विना दर्शनानां स्थितिरेव न संभाव्यते । किं आत्मतत्त्वम् ? कथं च तदवाप्तिः ? इति सर्वेषामेव दर्शनानां प्रमुखः चिन्तनविषयः । आत्मज्ञानम्, आत्मसाक्षात्कारः ब्रह्मणा तादात्म्यानुभूतिः, तन्मूलकं च सर्वज्ञत्वम् इत्यादयो विषया दर्शनानां विवेच्यत्वेनोपत्तिष्ठन्ते ।

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।

आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम् । बृहदारण्यकोपनिषद् २-४-५

पाश्चात्त्यदर्शनेषु धर्मदर्शनयोर्वैयधिकरण्यं, न तु सामानाधिकरण्यं, स्वीक्रियते । तत्र धर्मदर्शनयोः पन्थानौ विभिन्नौ, अनपेक्षित्वं चेतरेतरयोः । भारतीयदर्शनेषु तयोः सामानाधिकरण्यं परस्परापेक्षित्वं चाङ्गीक्रियते । यदेव दर्शनेन विविच्यते, तदेव धर्मेण व्यवह्रियते । एकत्र धर्मतत्त्व- समीक्षा अपरत्र च धर्मत्तत्त्वव्यवहृतिः । दर्शने चिन्तनं मुख्यम्, धर्मे च कर्म- निर्धारणम् । एवं परस्परानुबद्धे धर्मदर्शने भोगापवर्गयोः सोपानरूपे स्तः । एतदेव कणादेन पतञ्जलिना चोद्घोष्यते -

यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः । (वैशेषिकसूत्रम् २)

भोगापवर्गार्थं दृश्यम् । (योगदर्शनम् २-१८)

भारतीयदर्शनेषु षड् आस्तिकदर्शनानि वेदानां प्रामाण्यं स्वीकुर्वते । जैन-बौद्धदर्शनयोरपि वेदानां प्रामाण्यं रूपान्तरेण व्यवहारबुद्धया वा स्वीक्रियते एव। केवलं चार्वाकदर्शनं वेदानाम् अप्रामाण्यं प्रस्तौतितराम| भारतीयदर्शनेषु आध्यात्मिक-आधिदैविक-आधिभौतिकं चेति त्रिविधदुःखानाम् आत्यन्तिक निवारणाय दर्शनानां जनिरभूत् । एतदेव च दर्शनानां लक्ष्यम् । एतच्च पतञ्जलिना प्रकारचतुष्टयेन स्फुटीक्रयतेः- (क) हेयम्-दुःखंहेयं त्याज्यं वा । (ख) हेयहेतुः किमिति दुःखानि हेयानि? (ग) हानम्-दुःखानां शाश्वतिकोऽभावः । (घ) हानोपायः दुःख नाशस्य के उपायाः?एवं विविच्य दुःखप्रणाशोपाया: दर्शनैः प्रस्तूयन्ते ।

कर्मफलस्यानिवार्यत्वम् कृतं क्रियमाणं करिष्यमाणं च कर्मभाग् भवति । कृतकर्मणां विपाकरूपेण विविधयोनिषु उच्चावचकुलादिषु च जन्म भवति । 'अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्' इति भारतीय- दर्शनानां मतम् । अतः कर्मविशुद्धौ आचारशुद्धौ च बलम् आधीयते तज्ज्ञैः ।

चार्वाकव्यतिरिक्तानि भारतीयदर्शननानि कर्मफलानुसारं मानवस्य पुनर्जन्म स्वीकुर्वन्ति ।

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च । (गीता २-२७)

भारतीयदर्शनानि आचारमीमांसायां मानवस्य कर्तव्याकर्तव्यानां विशदं विवेचनं प्रस्तुवन्ति । किम् कर्तव्यम् ? किं अकर्तव्यम् ? कथम् अभ्युदयः ? कथम् अवनतिः ? मानवजीवनस्य समस्यानां कथं निरोधः प्रतिकारो वा विधेयः इत्यादयो, जीवनसंबद्धा अनुयोगा दर्शनैः समाधीयन्ते । भारतीयदर्शनेषु चारित्रिकोन्नं प्रति महद् बलम् आधीयते । आस्तिकानि नास्तिकानि चोभयान्यपि दर्शनानि चारित्रिकविशुद्धिम् उन्नति च जीवनस्यावश्यकर्तव्यत्वेन उपन्यस्यन्ति ।

'संभावितस्य चाकीतिर्मरणादतिरिच्यते' (गीता २-३४)

जीवोऽज्ञानवशगो भूत्वा बन्धनम् आपद्यते । स भूयो भूयो जायते म्रियते च । अज्ञाननाशम् अन्तरेण जन्म-मृत्युबन्धनाद् न हि मुच्यते जीवः ।मोक्षो मुक्तिनिर्वाणं वा जीवनस्य परमं लक्ष्यम् । मोक्षमधिगम्त्यैव जीवः स्वजीवनस्य चरमम् उद्देश्यं विन्दति । ज्ञानाग्निना सर्वकर्मणां विनाशे आत्मसाक्षात्कारे च मोक्षावाप्तिः संजायते -

ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा । (गीता ४-३७)

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ (वेदान्तसारः)

भारतीयदर्शनानि वैदिककालाद् आरभ्य अद्यावधि अविच्छिन्नरूपेण प्रवहन्ति । सेयं दर्शनधारा पुण्यसलिलाया भागीरथ्या धारेवाविच्छिन्ना भारते विराजते। पाश्चात्त्यदर्शनानाम् ईसवीयसंवत्सरात् सप्तमशताब्द पूर्वं प्रसूताऽपि धारा काले काले विच्छेदमाप पुनरुद्भूता च । भारतीयदर्शनेषु विचारस्वातन्त्र्यं प्रतिपदम् उपलभ्यते । खण्डनं मण्डनं वा स्यात्, हेयम् उपादेयं वा स्यात्, विरुद्धम् अविरुद्धं वा स्यात्, यदि युक्तियुक्तं विचारपूर्णं वा किं चिद् उपस्थाप्यते तद् विदुषां विचारपथम् आरोहति । न पूर्वां ग्रहमात्रेण किंचित् तिरस्क्रियते ।सत्यान्वेषणं दर्शनानां लक्ष्यम् । अतो न भारतीयदर्शनेषु संकुचिता दृष्टिरुपलभ्यते। अस्वीकार्योपि परपक्ष: सयुक्ति समुपस्थाप्य प्रमाणपुरःसरं तन्निराकरणं क्रियते । 'आत्मानं विद्धि' इत्याश्रित्य स्वानुभूतीनां प्रकाशनं दर्शनेषूपलभ्यते । भारतीयदर्शनेषु विवेचनात्मकतायाः प्राधान्यं लक्ष्यते । यदेव किंचित् प्रतिपाद्यं स्यात् तत् सयुक्तिकं सप्रमाणं परीक्ष्यैव हेयम् उपादेयं वा जायते, न प्रतिज्ञामात्रेण। अत एव भारतीयदर्शनानि दर्शन-जगति रत्नवद् बहुमूल्यानि आकल्प्यन्ते ।भारतीयदर्शनेषु समाजस्य संस्कृतेश्च समुत्थापनस्य महती कामना दृश्यते । दर्शनेषु तथाविधानां तत्त्वानां समवायः दृश्यते येन सामाजिकी सांस्कृतिकी च समुन्नतिः संभविष्यति । अतएवानेके दर्शनकाराः समाजसुधारकरूपेण प्रथिताः सन्ति ।भारतीयदर्शनेषु समन्वय- भावना प्रमुखा वर्तते । विविधानि दर्शनानि एकस्यैव पादपस्य विविधशाखारूपेण परिगण्यन्ते, तत्र समन्वयश्चावलोक्यते। दर्शनेषु विविधविज्ञानानाम् एकत्रावस्थापनस्य समीकरणस्य च प्रयासो निरीक्ष्यते।एवं भारतीय-दर्शनानि विवेचनगाम्भीर्येण, आलोचनाचातुर्येण, गूढार्थनिरीक्षणेन, संवेदनशीलानुभूतिप्रकर्षेण, सत्यान्वेषणानुरागित्वेन, तत्त्वार्थग्रहणप्रवणेक्षणेन, समन्वयभावनया, मनःस्थित्यनुशीलनेन, अतीतानुरागित्वेन, अध्यात्माभिमुख्येन, पुरुषार्थचतुष्टय-साधकत्वेन, जोवनोन्नायकत्वेन, दुःखत्रयविनाशपूर्वक-ब्रह्मसाक्षात्कारकरणत्वेन समेषामपि सुधियां समादृतिं समधिगच्छन्ति ।

## 2.3 ब्रह्म सत्यं जगन्मिथ्या

दर्शनपदं दृश्-धातोः ल्युट्-प्रत्ययपूर्वकं निष्पन्नम्। “दृश्यते अनेन इति दर्शनम्” तथा दृश्यते यत् तत् दर्शनम् । तस्मिन् दर्शने सर्वप्रमुखं लक्ष्यं वर्तते सुखप्राप्तिः दुःखनिवृत्तिश्च। सुखप्राप्तिविषये कथितं यत् यो वै भूमा तत्सुखम् अर्थात् भूमा यत्सुखमस्ति तत् बृहत्तमं सुखं वर्तते। यत्सुखम् कदापि समाप्तं न भविष्यति। तत्सुखमपि ब्रह्मज्ञानमिति कथ्यते। ब्रह्मविषये उपनिषत्सु बृहद् विवेचनं वर्तते। संसारस्य सर्वोच्च सत्ता ब्रह्म इति कथ्यते। बृहत्तमत्वात् ब्रह्म इत्यपि कथितं वर्तते।

ब्रह्मणः द्विविधं लक्षणं –

तटस्थलक्षणम् – यावल्लक्ष्यकालानवस्थितत्वे सति यद् व्यावर्तकं तदेव तटस्थलक्षणम्। यथा – शास्त्रयोनित्वात् (यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्ब्रह्म तद् विजिज्ञासस्व)

स्वरूपलक्षणम् – स्वरूपमेव स्वरूपलक्षणम् । यथा – सत्यं ज्ञानमनन्तं ब्रह्म।

आधिव्याधिपरिपीडितो जराजन्म-मरणादिदुःख-दावाग्निदग्धः, क्लेशायासविषण्णः, अज्ञानान्धतमसनिमीलितनयनः, जीव आनन्दावाप्तये मोक्षाधिगमाय त्रिविधतापविनाशाय मोहापहाराय च जगच्छरण्यं शुद्ध-बुद्ध-मुक्त-स्वभावं जगदीश्वरम् आश्रयते। जगदीश्वरो वेदान्तमतेन ब्रह्मेत्याख्यायते। तस्य ब्रह्मणः स्वरूपम् उपनिषत्सु बहुधा प्रतिपाद्यते। माण्डूक्योपनिषदि तत्स्वरूपं निगद्यते यत्-

**एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ६ नान्तः प्रज्ञं न बहिःप्रज्ञं नोभयतः प्रज्ञं अवृष्टमव्यवहार्यमग्राह्यम् एकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थ मन्यन्ते स आत्मा स विज्ञेयः।माण्डूक्योपनिषद् ७**

स परमात्मा अद्वितीयः सर्वव्यापकः सर्वान्तर्यामी साक्षी चैतन्यस्वरूपो निर्गुणश्चेति। न तत्समश्चाभ्यधिकश्च कश्चन। अस्य शक्तिरपूर्वा विविधगुणमयी च। स एव ऊर्णनाभ इव मायया सकलं जगत् सृजत्यवति संहरति च। उक्तञ्च-

**एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।**

**कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता निर्गुणो निष्क्रियश्च॥श्वेताश्वतरोपनिषद् ६-११**

**न तस्य कार्यं करणं च विद्यते न तत्समञ्चाभ्यधिकश्च दृश्यते।**

**परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानवलक्रिया च॥श्वेताश्वतरोपनिषद् ६-८**

**यस्तूर्णनाभ इव तन्तुभिः प्रधानजैः स्वभावतः।**

**देव एकः स्वमावृणोति स नो वधातु ब्रह्माव्ययम्॥ श्वेताश्वतरोपनिषद् ६-१०**

तस्यैव तेजसा निखिलं जगद् द्योतते। स एव प्रकाशानामपि प्रकाशः, तेजसां तेजश्च। सूर्यचन्द्रतारकादयो न तस्य प्रकाशने प्रभवः। अग्न्यादीनां तु का कथा।

स एवैको विश्वरूपः सर्वदेवमयश्चेति बहुधा वर्यण्ते । उक्तञ्च-

**अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।**

**एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च॥ कठोपनिषद् २-५-९**

**तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।**

**तदेव शुक्रं तद्ब्रह्म तदापस्तत् प्रजापतिः॥ श्वेताश्वतरोपनिषद् ४-२**

किं सत्यं किं असत्यं मिथ्या वा, इति जिज्ञासायाम् आचार्यः श्रीशंकरोऽभिधत्ते यद्- 'यद् रूपेण यन्निश्चितं तद् रूपं न व्यभिचरत्ति तत् सत्यम्'। अर्थात् यद् वस्तु शाश्वतिकं परिवर्तनरहितम् अविनश्वरं च तत् सत्यम्, अत्तोऽन्यद् असत्यं मिथ्या वा। एवं चिन्तनेन सिध्यति यद् जगद् असत्यं जगतः परिवर्तनशीलत्वात्। ब्रह्म च सत्यं शाश्वतिकम् अपरिवर्तनशीलम्, अतः तस्य सत्यता न केनापि रूपेणाक्षेप्तुं शक्या।वेदान्तदर्शने ब्रह्म निर्विकल्पं निरुपाधि निर्विकारं चेति स्वीक्रियते। ब्रह्म द्विविधं निर्गुणं सगुणं च। निर्गुणं ब्रह्म परमार्थदृष्ट्या

सच्चिदानन्दस्वरूपम् । तदेव जगतः प्रकाशकम् । तत्सत्तयैव सूर्यचन्द्रादिकं प्रकाशते । अज्ञानोपाध्यवच्छिन्नं ब्रह्म सगुणरूपताम् आपद्यते। तदेव नामरूपादिभेदेन नानादेवतारूपताम् आसादयति। तथा च कठोपनिषदि स्वीक्रियते -

**एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च । कठोपनिषद् २-५-१०**

**एकं रूपं बहुधा यः करोति । कठोपनिषद् २-५-१२**

तस्य ब्रह्मणोऽविद्योपाध्यवच्छिन्नं कारणशरीरं समष्टिरूपेण 'ईश्वरः' व्यष्टिरूपेण च 'प्राज्ञः' जीवो वा मन्यते । तस्यैव ज्ञानेन सर्वं विज्ञायते । तदेव जगति ओतं प्रोतं च । ब्रह्म ज्ञाने च मोहो न शोकः। न च तदन्यद् वस्तु अन्तरम् । एतदेव श्रुतिषु बहुधा प्रतिपाद्यते -

**'ईशावास्यमिदं सर्वम् ' (ईशावास्योपनिषद् १),'ऐतदात्म्यमिदं सर्वं, 'यस्मिन् विज्ञाते सर्वं विज्ञातं भवति', 'स आत्मा तत्त्वमसि श्वेतकेतो' (छान्दोग्योपनिषद्), 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ईशावास्योपनिषद् ७), मृत्योः स मृत्युमाप्नोति य इह नानेन पश्यति' ।**

वेदान्तनुसारं जगन्मिथ्येति मन्यते । विषयेऽस्मिन् बह्वयो विप्रतिपत्तयो वर्तन्ते । वेदान्तानुसारं मायायाः शक्तिद्वयम् - आवरणविक्षेप-नामकम् । आवरण-शक्तिर्ब्रह्मणः शुद्धस्वरूपम् आवृणोति । विक्षेपशक्तिश्च तत्र आकाशादिप्रपञ्चं सृजति । विशदीकृतं चैतद् दृग्दृश्यविवेकेः-

**शक्तिद्वयं हि मायाया विक्षेपावृतिरूपकम् ।**

**विक्षेपशक्तिलिङ्गादिब्रह्माण्डान्तं जगत्सृजेत् ।।**

**अन्तर्हग्दृश्ययोर्भेवं बहिश्च ब्रह्मसर्गयोः ।**

**आवृणोत्यपरा शक्तिः सा संसारस्य कारणम् ।। १३, १५.**

मायैव अविद्या-अज्ञान-अध्यास-अध्यारोप-विवर्तादिशब्दै: व्यवह्रियते । अज्ञानोपाध्यवच्छिन्नं स्थूलं शरीरं व्यष्टिरूपं सद् विश्वं जगद् वा भवति । तत्त्वदृशा परिवर्तनशीलत्वाच्च विनाशित्वाच्च जगद् मिथ्येत्युच्यते ।

वेदान्तानुसारं त्रिविधा सत्ता स्वीक्रियते - प्रातिभासिकी, व्यावहारिकी, पारमार्थिकी च । प्रातिभासिकी सत्ता किंचित्कालावस्थायिनी, पश्चात् प्रतिबाधिता च । यथा-रज्जौ सर्पबुद्धिः, शुक्तौ रजतबुद्धिश्च । व्यावहारिकी सत्ता जगद्-व्यवहारप्रधाना। नामरूपात्मकं जगद् व्यवहारदृष्टयैव सत्यम्, परमार्थदृष्ट्या असत्यं मिथ्या वा। जगद् विपरिणामि नश्वरं परिवर्तनधर्मि अशाश्वतं चेति अवधार्य असत्यं मिथ्या वेत्युच्यते, न तु लौकिकज्ञाननिर्मूलताऽऽपादनाय । पारमार्थिकी सत्ता सा या न क्वचिद् व्यापद्यते विहन्यते वा। यत् तत्त्वतोऽक्षरं शाश्वतं वा तदेव पारमार्थिकं सत्यम् । एवं ब्रह्मैव केवलं पारमार्थिकी सत्ता । तात्त्विकदृष्ट्यैव जगन्मिथ्येति वेदान्तविदाम् अभिमतम् । व्यवहारदृष्ट्या तु तदनुभूतिर्न निर्मूला ।अज्ञानोपाध्यवच्छिन्नं व्यष्टिरूपं सत् कारणशरीरं प्राज्ञो जीवो वेत्याख्यायते । समष्टेरीश्वरस्य व्यष्टिरूपो जीवः । सर्वज्ञत्वाल्पज्ञत्वादिभेदेन ब्रह्मजीवात्मनोर्भेदः । आत्मत्तत्त्वरूपेण चैतन्यरूपेण च तयोरभेदः । अतएव 'तत् त्वमसि' इति महावाक्येन जीव-ब्रह्मणोरैक्यं प्रतिपाद्यते । सर्वज्ञत्वाल्पज्ञत्वादिभेदवारणेन तयोरैकात्म्यम् । एकस्यैव तत्त्वस्य समष्टि-व्यष्टि- रूपेण नामान्तरं ब्रह्मजीवात्मानौ इति । ब्रह्मसाक्षात्कारे द्वयोरैक्यस्यानुभूतेः 'तत् त्वमसि' इति संगच्छते । अत्र भागलक्षणाया जहदजहल्लक्षणाया वा स्वीकरणाद् ब्रह्मजीवयोरेकत्वं साध्यते । सुरेश्वराचार्यो नैष्कर्म्यसिद्धौ एतदेव प्रतिपादयतिः-

**सामानाधिकरण्यं च विशेषणविशेष्यता**

**लक्ष्यलक्षणसंबन्धः पदार्थप्रत्यगात्मनाम् ॥ नैष्कर्म्यसिद्धिः ३-३**

पन्चदश्यां विद्यारण्यः 'तत्त्वमसि' इत्यस्य महावाक्यस्य अखण्डैकरसत्वमेव वाक्यार्थं विवृणुते । उक्तञ्च-

**संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः ।**

**अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः ॥ पञ्चदशी ७-७५**

एवं सुकरम् एतद् अभिधातुं यद्-

**ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ।॥**

## 2.4 गीता सुगीता कर्त्तव्या

महाभारतस्य भीष्मपर्वणि श्रीमता भगवता कृष्णेन अर्जुनाय महत् श्रीमद्भगवद्गीताशास्त्रं उपदिष्टम्। गीता महत् दर्शनशास्त्रं वर्तते। दर्शनपदं दृश्-धातोः ल्युट्-प्रत्ययपूर्वकं निष्पन्नम्। "दृश्यते अनेन इति दर्शनम्" तथा दृश्यते यत् तत् दर्शनम्। दर्शनशास्त्रे गीतायाः महत्त्वं केन न विदितम्। भगवद्गीतायाः गुणगौरवं सर्वस्मिन् जगति वर्तते। गीतेयं न केवलं उपनिषदां सारभागरूपे वर्तते, अपितु श्रुतिसारमपि वर्तते। सांख्ययोगदर्शनयोः सिद्धान्तानां विवेचनात् प्रतिपादनाच्च दर्शनसारसंग्रहोऽप्यत्र उपलभ्यते। वेदान्तदर्शनप्रतिपादितस्य 'तत्त्वमसि' इति महावाक्यस्यापि व्याख्या अस्यां विद्यते। गीता सामान्यमानवानां कृते उपनिषद् गूढज्ञानस्य प्रदात्री अस्ति। सेयं सरलया भावाभिव्यक्तिप्रक्रियया, भूयिष्ठयार्थ गभीरतया, प्रेष्ठया पद्धत्या, श्रेष्ठया विवृत्तिसरण्या, साधिष्ठया योगसाधनादीक्षया, वरिष्ठया आत्मविशुद्धिशिक्षया सर्वस्यापि लोकस्य विश्वकोषरूपे वर्तते।

अस्या: ज्ञानदुग्धं गीतामृतम् इति कथ्यते। गीतायाम् अस्यां सर्वासामपि उपनिषदां सारः सरलभाषायां समाहितः वर्तते। उपनिषत्सु ये भावाः केवलं दार्शनिकपद्धत्या नीरसशैल्या च समभिहिताः सन्ति, ते एव भावाः साधिष्ठया भावप्रकाशनशैल्या विशदं समासतश्च प्रस्तूयन्ते। गीता न केवलम् उपनिषादामेव अपि तु समग्रस्यापि पूर्ववर्तिनो वाङ्मयस्य सारम् उपस्थापयति । अत एव गीता लोकप्रिया विश्वप्रिया चाभवत् । उक्तञ्च-

सर्वोपनिषदो गावो दोग्धा गोपालगन्दनः ।

पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥

गीता सर्वविषयावगाहित्वेन, ज्ञानविज्ञानसमन्वयेन, अध्यात्मविद्याचरमोत्कर्षेण, जगतो विनश्वरताप्रतिपादनेन, साधनापद्धतेः विवृत्या, आचारविचारशिक्षया, कर्तव्याकर्तव्यप्रबोधनेन, निष्कामकर्मदीक्षया अनासक्तियोगशिक्षया चेयं समेषामपि विपश्चितां हृद्या अपचितिभाक् च संजाता । अस्या भाषाशैली तादृशी मनोरमा, प्रसादगुणोपेता, माधुर्यावगाहिनी च यत् स्वल्प-शिक्षा-प्रबुद्धोऽपि मानवोऽस्याः सामान्यमर्थम् अवगन्तुं पारयति। अतएव 'गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः' इति वचने न संशयलेशोऽपि ।

गीतायां  विषयप्रतिपादनं केचन दार्शनिका भावा ये दर्शनानां सारभूता आदर्शरूपाश्च सन्ति ते तथा रुचिरया भाषयाऽभिहिताः सन्ति, यथा सर्वजन-ग्राह्यत्वं भजन्ते। यथा- आत्मनः अजरत्वम् अमरत्वम् अविनाशित्वं च यद् दर्शनानां सारमस्ति तत् कथमिव हृद्यरूपेण माधुर्येण च प्रस्तूयते –

**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ (गीता २-२०)**

आत्मनः अवध्यत्वं शाश्वतत्वं चोपदिशता प्रोच्यते-

**नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।**

**न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ।।(गीता २-२३)**

मृत्युना शरीरनाशो न त्वात्मविनाशः अन्यजन्मधारणं जीर्णवस्त्रपरिवर्तनेन नववस्त्रधारणामेव विज्ञेयम् । तद्यथा-

**वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।**

**तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ।। (२-२२)**

सांख्याभिमतः सत्कार्यवादः श्लोकद्वयेन साधूपस्थाप्यते-

**नासतो विद्यते भावो नाभावो विद्यते सतः । (२-१६)**

**अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।**

**अव्यक्तनिधनान्येव तत्र का परिवेदना ।। (गीता २-२८)**

स्वकर्तव्यपालनं मानवस्य परमं दायित्वम् । कर्तव्यपालनेनैव जीवनस्य साफल्यं सिद्धलाभश्च तद्यथा-

स्वे स्वे कर्मण्यभिरतः संसिद्धिं  लभते नरः ॥ (१८-४५)

कीर्तिरक्षा मानवस्य मुख्यं लक्ष्यम् । अयशोदूषितस्य नरस्य जीवनेन अलम् ।

यशो  हि परमं भूषणम् । संभावितस्य चाकीतिर्मरणादतिरिच्यते ।। (२-३४)

कर्मफलस्य अवश्यम्भावित्वम् उपपादेयत्वंच  साधु निरूप्यते यत् नहि कर्मनाशः न च कर्मफले प्रत्यवायः ।

स्वल्पमपि सुकृतं महद्भयविनाशकम् इति

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते । स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ (२-४०)

अनासक्तभावेनैव कार्यकरणं गीतायाः परमोपदेशः । तदुच्यते-

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।**

**मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि। (२०४७)**

अनासक्तिभावनया क्रियमाणं कर्म न बन्धनहेतुः न च विषयोपलेपसाधनम्, अपि तु दुःख-पाप-विनाशनत्वाद् योगरूपं सत् त्रिविधतापापहं संजायते। उच्यते च -

**बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।**

**तस्माद् योगाय युज्यस्व योगः कर्मसु कौशलम्॥ (२-५०)**

विषयासक्तेः दुष्परिणामित्वं कथमिव मनोवैज्ञानिक्या शैल्या प्रतिपाद्यते यद्-

**ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते।**

**संगात् संजायते कामः कामात् क्रोधोऽभिजायते॥**

**क्रोधाद् भवति संमोहः संमोहात् स्मृतिविभ्रमः।**

**स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति॥ (२-६२, ६३)**

इन्द्रियसंयमः साफल्यस्य साधनमिति न केनापि व्यपदेष्टुं पार्यते। अतएवोच्यते यत् संयमिन एव प्रज्ञा प्रतिष्ठिता भवति -

**तस्माद् यस्य महाबाहो निगृहीतानि सर्वशः।**

**इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता। (२-६८)**

कर्तव्यस्य कर्मणः अनिवार्यत्वम् उपपादेयता उपस्थाप्यते यत् कर्तव्यानुष्ठानम् अन्तरेण लोकयात्राऽपि न प्रवर्तेत -

**नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।**

**शरीरयात्रापि च ते न प्रसिध्येदकर्मणः॥ (३-८)**

यज्ञस्य महत्त्वम् वर्णयता तस्य सर्वाभीष्टप्रदत्वम् उपपाद्यते-

**देवान् भावयतानेन ते देवा भावयन्तु वः।**

**परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥ (३-११)**

**तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्॥ (३-११)**

आत्मसमर्पणस्य आत्मप्राप्तिसाधकत्वं प्रतिपाद्यते-

**ब्रह्मर्पणं ब्रह्महविर्ब्रह्माग्नी ब्रह्मणा हुतम्।**

**ब्रह्मैव तेन गन्तध्वं ब्रह्मकर्मसमाधिना॥ (गीता ४-२४)**

ज्ञानस्य परमपावनत्वं सर्वकर्मनाशकत्वं सर्वदुःखनिवारकत्वं च प्रतिपाद्यते-

**ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ।। (४-३७)**

**नहि ज्ञानेन सदृशं पवित्रमिह विद्यते। (४-३८)**

जीवने श्रद्धायाः किं महत्त्व किं च तदुपयोगित्वमिति निरूपयता प्रोच्यते-

**श्रद्धावांल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।**

**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥ (४-३९)**

युक्ताहारविहार एव योगसाधने सक्षमः। तादृशस्यैव जनस्य आत्यन्तिकी दुःखप्रहाणिः संजायते-

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।**

**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा । (६-१७)**

अभ्यासाद् ज्ञानम्, ज्ञानाद् ध्यानम्, ध्यानात् कर्मफलत्यागो विशिष्यते । कर्मफलत्यागः शान्तेः प्रमुखं सोपानम् -

**श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद् ध्यानं विशिष्यते ।**

**ध्यानात कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥ (१२-१२)**

ध्यानात् ऊर्ध्वमूलस्याश्वथस्य वर्णनं दर्शनसारसंग्रहम् उपलक्षयति-

**ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।**

**छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ (१५-१)**

श्रद्धाया मनोवैज्ञानिक रूपम् उपस्थापयता प्रोच्यते यत् पुरुषोऽयं श्रद्धामयः । यादृशी मानवस्य श्रद्धा तादृशः सोऽवगन्तव्यः ।

**श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ।। (१७-३)**

जीवने सर्वकर्मपरित्यागेऽपि यज्ञ-दान-तपसाम् अपरिहार्यत्वम् अवश्यकर्तव्यत्वं च गृहमेधिनां यतीनां च कृते निरूप्यते । जीवनस्य पावनत्वं त्रयाणामप्येषां फलम् ।

**यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।**

**यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ (१८-५)**

स्वधर्मानुशिष्टं कर्म कथमपि न परिहेयम्। स्वधर्मे निधनमपि श्रेयोवहम्-

**श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।**

**स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ (३-३५)**

**सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् । (१८-४८)**

एवमिह गीता-प्रतिपादितानां केषांचिद् राद्धान्तानां समासतोऽत्र वर्णनम् उपस्थापित्तम् । एतस्यावलोकनेन निश्चप्रचम् एतत् सिध्यत्ति यद् गीतायां सर्वेषां दर्शनानाम् उपनिषदां च सारः प्रस्तूयते। यदि केवलं गीतैका एव अधीयते, विविच्यते, चिन्त्यते, लौकिकजीवने अवधार्यते च तर्हि मानवजीवनं सर्वथा सुखशान्तिसमन्वितं च भविष्यति । अतः साधूच्यते-

**गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ।**

**या स्वयं पद्मनाभस्य मुखपद्माद् विनिःसृता ॥**

## 2.5 नास्ति योगसमं बलम्

दर्शनपदं दृश्-धातोः ल्युट्-प्रत्ययपूर्वकं निष्पन्नम्। "दृश्यते अनेन इति दर्शनम्" तथा दृश्यते यत् तत् दर्शनम् । योगदर्शनस्य प्रणेता महर्षिः पतञ्जलि: वर्तते। तेन प्रणीतं पातञ्जलयोगसूत्रं च योगस्य स्वरूपम्- **'योगश्चित्तवृत्तिनिरोधः'**। चित्त- वृत्तीनां निरोधेनैव योगस्य संसिद्धिः । अवस्थायामस्यां जीवः स्वरूपम् अधितिष्ठति । चित्तस्य पञ्च भूमयः 'क्षिप्तं मूढं विक्षिप्तम् एकाग्रं निरुद्धमिति चित्तभूमयः' । तत्र क्षिप्तं मूढं विक्षिप्तमिति भूमित्रयं योगानुपकारि। एकाग्रे चित्ते बहिर्वृत्तीनां निरोधेन संप्रज्ञातः समाधिरभीष्यते । निरुद्धे चेतसि सर्वासां वृत्तीनां संस्काराणां च निरोधेन असंप्रज्ञातसमाधिः सिध्यति । कास्ताः चित्तवृत्तय इति जिज्ञासायां पतञ्जलिः ब्रूते-

**वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः । योगसूत्रम् १-५**

**प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयः । योगसूत्रम् १-६**

पञ्च वृत्तयः क्लिष्टा अक्लिष्टाश्च । क्लेशहेतुकाः क्लिष्टाः, ख्यातिविषया गुणाधिकारविरोधिन्यश्च अक्लिष्टाः। पञ्च वृत्तय: सन्तिः- प्रमाण- विपर्यय-विकल्प-निद्रा-स्मृति-नामधेयाः ।

(१) तत्र प्रमाणानि त्रीणि-प्रत्यक्ष- अनुमान-आगम (शब्द) नामकानि। (२) विपर्ययो मिथ्याज्ञानम् अविद्या वा। सेयम् अविद्या पञ्चविधा- अविद्याऽस्मिता-राग-द्वेषाभिनिवेशेतिपञ्चक्लेश समायुक्ता । एते एव पञ्च क्लेशाः तमस्-मोह-महामोह-तामिस्त्र-अन्धतामिस्रा इति कथ्यन्ते । (३) 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' (४) 'अभावप्रत्ययालम्बना वृत्तिर्निद्रा' अभावबोधस्वरूपा तमोमूला च वृत्तिर्निद्रा । (५) 'अनुभूतविषयासम्प्रमोषः स्मृतिः' अनुभूतविषयानुरूपा वृत्तिः स्मृतिरित्युच्यते । वृत्तिभिः संस्काराः क्रियन्ते, संस्कारैश्च वृत्तय: इति वृत्ति- संस्कारयोश्चक्रम् अनिशं परिवर्तते । वृत्तयश्चित्ते क्षयावस्थां संप्राप्ताः संस्कार- रूपेणावतिष्ठन्ते । वृत्तीनां निरोधे संस्काराणामपि निरोधो जायते।

द्विविधो योगः- सम्प्रज्ञात: असम्प्रज्ञातश्च । यश्चित्तस्य एकाग्रतावस्थायां सद्भूतमर्थं प्रकाशयति, क्लेशान् शमयति, कर्मबन्धनानि शिथिलयति, निरोधावस्याम् अभिमुखं करोति, स सम्प्रज्ञातो नाम योगः। सम्प्रज्ञात: समाधिः सबीजः समाधिरप्युच्यते, अत्र बीजस्यावलम्बनस्य वा सद्भावात् । सम्प्रज्ञातो योगश्चतुर्विधो भवति-वितर्कानुगतः, विचारानुगतः, आनन्दानुगतः, अस्मितानुगतश्चेति ।

सर्ववृत्तीनां निरोधे असम्प्रज्ञातः समाधिः । अयमेव निर्बीजः समाधिरप्युच्यते, अत्र बीजस्यावलम्बनस्य वा असद्भावात् । असम्प्रज्ञातः समाधिर्द्विधा- भवप्रत्ययः उपायप्रत्ययश्चेति । ज्ञानोन्मेषाभावेन विदेहानां प्रकृतिलीनानां च भवप्रत्ययः समाधिः । **'भवप्रत्ययो**

**विदेहप्रकृतिलयानाम्'** (१-१९) । **'श्रद्धा-वीर्य स्मृति-समाधि-प्रज्ञापूर्वक इतरेषाम्' (१-२०),**श्रद्धा-वीर्य-स्मृति-समाधि-प्रज्ञा-सम-वेतानाम् उपायप्रत्ययः समाधिः। उपायप्रत्यये प्रज्ञाया उदयात् संस्काराणां दाहाच्च व्युत्थानाशङ्का न संभवति । उपायप्रत्यय एव वास्तविकः समाधिः ।

पञ्च क्लेशाः, क्लेशापगमेनैव योगमार्ग-प्रसूतिः । क्लेशा विघ्नस्वरूपाः । 'अविद्यास्मिता-राग-द्वेषाभिनिवेशाः पञ्च क्लेशाः' (२-३) । अस्मित्तादिक्लेश- चतुष्टयस्य मूलम् अविद्यैव । 'अनित्याशुचिदुःखात्मसु नित्य-शुचि-सुखात्मख्यातिरविद्या' (योग० २-५) । अनित्ये नित्यबुद्धिः, अशुचौ शुचिबुद्धिः, दुःखे सुखबुद्धिः, अनात्मनि आत्मबुद्धिश्च अविद्यैव । 'दृग्दर्शनशक्त्योरेकात्मतैवास्मिता' (२-६)। दृग्दर्शनशक्त्योः पुरुष-बुद्ध्योः एकात्मतारूपेण ज्ञानम् अस्मिता । 'सुखानुशयी रागः' (२-७), सुखजनकेषु वस्तुषु तृष्णा राग इति । 'दुःखानुशायी द्वेषः' (२-८), दुःखदेषु वस्तुषु क्रोधपरिजिहीर्षा वा द्वेष इति ।मृत्युभीतिः अभिनिवेश इति । एषां प्रणाशेनैव योगाभिरुचिस्तत्साफल्यं च । योगाङ्गानि समाधिम् अधिजिगांसूनां कर्तव्यमीमांसां बोधयन्ति । योगसाफल्याय कायस्य मनस इन्द्रियाणां च शुद्धिरभीष्टा । तदर्थं साधनाष्टकं योगसूत्रे प्रतिपाद्यते । एतद् योगाङ्गनाम्ना व्यवह्रियते -

**यम-नियमासन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयोऽष्टावङ्गानि।योग० २-२९ (१)**

(1) यमाः- 'अहिंसा-सत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः' (२-३०), अहिंसादिपञ्चकं यम-नाम्ना व्यवह्रियते । अहिंसा-सर्वभूतानाम् अनभिद्रोहः । सत्यम्-वाङ्मनसो: एकरूपता। अस्तेयम्- चौर्याभावः, परद्रव्यस्य अहरणं वा। ब्रह्मचर्यम्-जितेन्द्रियता, इन्द्रियवशीकरणं च। अपरिग्रहः- भौतिकविषयाणां परिहारः । यमा ह्येते देशकालाद्यनविच्छिन्नाः सार्वभौमा महाव्रतानि मन्यन्ते। 'जाति-देश-काल-समयानवच्छिन्ना: सार्वभौमा महाव्रतम्' (२-३१)

(२) नियमाः- 'शोच-संतोष-तपः-स्वाध्याययेश्वरप्रणिधानानि नियमाः (२-३२) । तत्र शौचं-बाह्याभ्यन्तर-शुद्धिः । सन्तोषः यथाप्राप्तेन सन्तुष्टिः । तपः-सुखदुःख-शोकहर्षादिद्वन्द्वानां सहनम् । स्वाध्यायः-अध्यात्मपराणां शास्त्रीयानां च ग्रन्थानाम् अध्ययनं प्रणवस्य जपो वा। ईश्वरप्रणिधानं- ईश्वर- चिन्तनम् ईश्वरार्पणं च ।

(३) आसनम्- 'स्थिरसुखमासनम्' (२-४६) स्थिरतया दीर्घकालं यावत् सुखेन निषदनम् आसनमिति । पद्मासन-सिद्धासन-शीर्षासनादीनि योगासनान्यत्र संगृह्यन्ते । योगासनैः कायरोगचिकित्सापि संजायते ।

(४) प्राणायामः 'तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः । बाह्यस्य वायोराचमनं श्वासः, अन्तर्गतवायोनिःसारणं प्रश्वासः, तयोर्गतिविच्छेदः प्राणायामः स च चतुर्विधः- पूरकः- गृहीतश्वासस्य अन्तर्निरोधः । रेचकः- अन्तर्गतप्रश्वासस्य बहिर्निरोधः । बाह्य-कुम्भकः बहिर्निरुद्धस्य वायोर्बहिरेव यावच्छक्यं निरोधः । आभ्यन्तरकुम्भकः- अन्तर्निरुद्धस्य वायोरन्तरेव यावच्छक्यं निरोधः । प्राणयामेन शरीरमलप्रक्षयः शरीरशुद्धिर्नैरोग्यं च । भस्त्रिकया यथा धातुमलं संशोध्यते तथैव शरीरमलं प्राणायामेन शोध्यते । उक्तञ्च मनुना-

**दह्यन्ते ध्मायमानानां धातूनां हि यथा मला:।**

**तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥ मनु० ६-११**

(५) प्रत्याहारः 'स्वविषयासंप्रयोगे चित्तस्य स्वानुकार इवेन्द्रियाणां प्रत्याहारः' । इन्द्रियाणां स्वविषयेभ्यो निवृत्तिः अन्तर्मुखी वृत्तिश्च प्रत्याहार इत्यभिधीयते । एतस्माद् इन्द्रियाणां वशित्वम् उपपद्यते । यमादीनि पञ्च योगाङ्गानि बहिरङ्गसाधनानि मन्यन्ते, धारणा-ध्यान-

समाधिश्चेति त्रयोऽन्तरङ्गसाधनानीति (६) धारणा - 'देहबन्धश्चित्तस्य धारणा' । हृत्कमले, भ्रूमध्ये, अन्यत्र वा कस्मिश्चित् निर्दिष्टे स्थाने चित्तस्यैकाग्रता धारणेति व्यवह्रियते । धारणया मनसो निग्रहः, एकाग्रतया विषयैक्ये मनसोऽभिरुचिश्च प्रवर्तते ।

(७) ध्यानम्- 'तत्र प्रत्ययैकतानता ध्यानम्' । एकाग्रीकृते चित्ते ध्येयस्य वस्तुनः एकाकाररूपेण प्रवाहो ध्यानमित्युच्यते । एकस्यैव वस्तुनः ऐकाग्र्येण चेतसा चिन्तनं तल्लीनत्वं च ध्यानमित्यनेन संसूच्यते ।

(८) समाधिः 'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः' । सम्यग् आधीयते एकाग्रीक्रियते विक्षेपान् परित्यज्य मनो यत्र स समाधिः । यदा ध्यानं ध्येयाकाररूपं स्वरूपशून्यमिव वा भवति तदा समाधिरित्युच्यते । समाध्यवस्थायां ध्यान-ध्यातृ-ध्येयानाम् एकरूपता संपद्यते ।

धारणा-ध्यान-समाधयः त्रयमेतत् 'संयमः' इत्युच्यते । 'त्रयमेकत्र संयमः' । 'तज्जयात् प्रज्ञालोकः' संयमस्य वशीकरणेन विवेकख्यातेः तत्त्वज्ञानस्य वा समुदयः संजायते ।एवम् अष्टाङ्गयोगसाधनेन साधकः स्वचित्तवृत्तिनिरोधाद् ऐकान्तिकम् आत्यन्तिकं च सुखं विन्दति मोक्षम् चाधिगच्छति । अतएव पतञ्जलेस्तत्त्वज्ञतां प्रशंसयन्नाह कविः –

योगेन चित्तस्य पदेन वाचां, मलं शरीरस्य च वैद्यकेन ।

योऽपाकरोत् तं प्रवरं मुनीनां, पतञ्जलिः प्राञ्जलिरानतोऽस्मि ॥

## 2.6अभ्यासार्थप्रश्न

### 2.6.1 वस्तुनिष्ठ प्रश्न

1.एतेषु दर्शनपदे कः प्रत्ययः वर्तते -

(क) ण्वुल्(ख) ल्युट् (ग) शानच् (घ)शतृ

2. योगसूत्रस्य प्रणेता कः वर्तते -

(क) महर्षिः पतञ्जलिः (ख) महर्षिः कणादः (ग) महर्षिः गौतमः (घ) एतेषु नास्ति

3. गीता इति पदं कस्मिन्लिङ्गे वर्तते –

(क) पुल्लिङ्गे (ख) नपुंसकलिङ्गे (ग) स्त्रीलिङ्गे (घ) उभयलिङ्गे

4. यत् दर्शनं प्रायः पुनर्जन्म-ईश्वरवेदान् मन्यते, तद्दर्शनम् –

(क) नास्तिकदर्शनम् (ख) आस्तिकदर्शनम् (ग) अदर्शनम् (घ) एतेषु नास्ति

5. अष्टाङ्गयोगेषु नास्ति –

(क) धारणा (ख) ध्यानम् (ग) नियमः (घ) विवर्तः

### 2.6.2 लघु-उत्तरीय प्रश्न

1. अष्टाङ्गयोगानां वर्णनं कुरुत।
2. गीतायां कर्मकौशलस्य चर्चा कुरुत।
3. आस्तिकदर्शनानां सङ्क्षेपेण वर्णनं कुरुत।
4. नास्तिकदर्शनानां सङ्क्षेपेण वर्णनं कुरुत।
5. ब्रह्मस्वरूपं सङ्क्षेपेण प्रतिपादयत।

### 2.6.3दीर्घ-उत्तरीय प्रश्न

1. आधुनिकयुगे योगस्य महत्त्वं प्रतिपादयत।
2. गीतायाः महत्त्वं प्रदर्शयत।
3. ब्रह्ममात्रसत्यं वर्तते जगत्मिथ्यास्ति इति वर्णनं कुरुत।

4. आस्तिकदर्शनानां महत्त्वं प्रतिपादयत।
5. भारतीयदर्शनस्य वैशिष्ट्यं प्रतिपादयत।

# इकाई3 - साहित्यशास्त्रीय निबन्ध

इकाई की रूपरेखा

3.0 उद्देश्य
3.1 प्रस्तावना
3.2 काव्यस्यात्मा ध्वनिः
3.3 विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः
3.4 अपारे काव्यसंसारे कविरेव प्रजापतिः
3.5 भारवेरर्थगौरवम्
3.6 दण्डिनः पदलालित्यम्
3.7 काव्येषु नाटकं रम्यम्
3.8 अभ्यासार्थ प्रश्न
3.8.1 वस्तुनिष्ठ प्रश्न
3.8.2 लघु-उत्तरीय प्रश्न
3.8.3 दीर्घ-उत्तरीय प्रश्न

## 3.0 उद्देश्य

इस इकाई के अध्ययन के पश्चात् शिक्षार्थी निम्नलिखित बिन्दुओं से सम्बन्धित विषयों का अवबोध कर सकेंगे-

- संस्कृत भाषा में उपनिबद्ध संस्कृत काव्य सम्प्रदाय का सामान्य परिचय प्राप्त कर सकेंगे।
- ध्वनि काव्य की आत्मा है, इसका अवबोध कर सकेंगे।
- विभाव, अनुभाव एवं व्यभिचारिभाव के संयोग से रस की निष्पत्ति होती है, इसका अवबोध कर सकेंगे।
- इस सम्पूर्ण सृष्टि में कवि ही ब्रह्मा के रूप में विद्यमान है, इस माहात्म्य का अवबोध कर सकेंगे।
- महाकवि भारवि के अर्थगौरव का ज्ञान कर सकेंगे।
- महाकवि दण्डी के पदलालित्य को जान सकेंगे।
- काव्यों में नाटक की रमणीयता को जान सकेंगे।

## 3.1 प्रस्तावना

तृतीय ईकाइ के अन्तर्गत संस्कृत भाषा में उपनिबद्ध साहित्यशास्त्रीय निबन्धों में हम काव्य की आत्मा ध्वनि, विभाव, अनुभाव एवं व्यभिचारिभाव के संयोग से रस की निष्पत्ति, कवि का माहात्म्य, महाकवि भारवि के अर्थगौरव, महाकवि दण्डी के पदलालित्य तथा काव्यों में नाटक की रमणीयता का ज्ञान करेंगे। काव्य के सौन्दर्य का बोध संस्कृत भाषा के अन्तर्गत करेंगे।

## 3.2 काव्यस्यात्मा ध्वनिः

आचार्य-आनन्दवर्धनमतानुसारेण ध्वनिः काव्यस्य आत्म रूपेण विराजते। ध्वनिशब्दो बहुधा निरुच्यते। निर्वचनानुसारं चास्य बहवोऽर्था गृह्यन्ते । पञ्चधा निर्वचनेन पञ्चापि ध्वनिसंबद्धा अर्था गृह्यन्ते। तद्यथा- (१) ध्वनति यः स व्यञ्जकः शब्दो ध्वनिः । (२) ध्वनति , ध्वनयति वा यः सव्यञ्जकोऽर्थः ध्वनिः । (३) ध्वन्यते इति ध्वनिः।यद् ध्वन्यते इत्यनेन रसालंकारवस्तुरूपं व्यङ्ग्यार्थत्रयमुपतिष्ठते । (४) ध्वन्यते अनेनेति ध्वनिः, इत्यनेन व्यञ्जनादिशक्तीनां ग्रहणम् । (५) ध्वन्यतेऽस्मिन्नितिध्वनिः, इत्यनेन व्यङ्ग्यार्थप्रधानं काव्यमपि संगृह्यते। एवं ध्वनिशब्देन व्यञ्जकशब्दस्य, व्यञ्जकार्थस्य, व्यङ्ग्यार्थस्य, व्यञ्जनाव्यापारस्य, व्यङ्ग्यप्रधानकाव्यस्य च बोध: संजायते ।वाच्यार्थपेक्षया व्यङ्ग्येऽर्थे मुख्ये सति ध्वनिरिति कथ्यते । तथाविधं च काव्यं सर्वोत्कृष्टं मन्यते ।

**इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः ।**काव्यप्रकाशः १-४

**वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम् ।** साहित्य-दर्पणः ४-१

आनन्दवर्धनाचार्यो ध्वनिं लक्षयति-

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।**

**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥** ध्वन्यालोकः १-१३

यत्र शब्द: स्वार्थं गौणरूपेणोपस्थाप्य व्यङ्ग्यमर्थम् अभिव्यनयक्ति अर्थश्च आत्मानं गौणत्वेन व्यनक्ति , तदा ध्वनिः । तथाविधं काव्यं ध्वनिः ध्वनिकाव्यं वा निगद्यते। शब्दार्थयोरेकस्य व्यञ्जकत्वे तदन्यस्य सहकारित्वं प्रतिपद्यते ।

**शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः ।**

**एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता ।। साहित्यदर्पणः २-१८**

वाच्यार्थातिरिक्तः को ध्वनिः व्यङ्ग्योऽर्थो वेति जिज्ञासायां ध्वनिकारेण स्फुटीक्रियते यत् कामिनीलावण्यमिव यत् प्रसिद्धातिरिक्तम् अन्यदेव किंचित् प्रतीयते वाच्यातिरिक्तं व्यङ्ग्यरूपं स ध्वनिः-

**प्रतीयमानं पुनरन्यदेववस्त्वस्ति वाणीषु महाकवीनाम् ।**

**यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ।।ध्वन्यालोकः १-४**

एतदाश्रित्येव लावण्यलक्षणमपि प्रस्तूयते यत्-

**मुक्ताफलेषुच्छायायास्तरलत्वमिवान्तरा ।**

**संलक्ष्यते यदङ्गेषु तल्लावण्यमिहोच्यते ।।**

इयं व्यङ्ग्यार्थबोधनक्षमतैव प्रतिभावैशिष्ट्येन महाकवीनां यशः प्रसारयति । व्यङ्ग्यार्थाभिव्यक्तिरेव महाकवित्वस्य निकषः ।अतो ध्वनिकृतोच्यते-

**सरस्वतीस्वादुतदर्थवस्तुः निःष्यन्दमाना महतां कवीनाम् ।**

**अलोकसामान्यमभिव्यनक्तिःपरिस्फुरन्तं प्रतिभाविशेषम्॥ ध्वन्यालोकः १-६**

व्यङ्ग्यार्थस्य तथा वैशिष्टयं यथैष नीरसं सरसम्, असुन्दरं सुन्दरम्, अमधुरं मधुरं जनयति ।ध्वनिसिद्धान्तस्य स्थापना व्याकरणं, विशेषतो भर्तृहरिकृतं वाक्यपदीयम्, आश्रित्य वर्तते । वाक्यपदीये नादस्फोटयोः स्वरूपं निरूप्यते-

**यः संयोगविभागाभ्यां करणैरुपजन्यते ।**

**स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः ।। वाक्यपदीयम् १-१०३**

तत्रोच्चारणावयवानां संयोगेन विभागेन च यः शब्द उत्पद्यते स स्फोटः, अन्ये च शब्दजाः शब्दा ध्वनिशब्दवाच्याः। घण्टानादादिषु अनुरणनरूपः शब्दो यथा, तथैव शब्दजा व्यङ्ग्योऽर्थो ध्वनिरित्युच्यते । स्फोटनादयोः व्यङ्ग्यव्यञ्जकसंबन्धो मन्यते, तथैव काव्येऽपि ध्वनेर्व्यञ्जकत्वं प्रतीयमानस्यार्थस्य च व्यङ्ग्यत्वं सिध्यति-

**ग्रहणग्राह्ययोः सिद्धा योग्यता नियता यथा ।**

**व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोटनादयोः ।। वाक्यपदीयम् १०९८**

नादैराहितबीजायां बुद्धौ अन्त्यवर्णश्रवणेन समं शब्दस्य रूपमवधार्यते । ध्वनिरेव शब्दस्वरूपं प्रकाशयति ।

**नादैराहितबीजायामन्त्येन ध्वनिना सह ।**

**आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते ।। वाक्यपदीयम् १-८५**

**प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा ।**

**ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ।। वाक्यपदीयम् १-८४**

स्फोटव्यञ्जका वर्णा ध्वनिनाम्ना व्यवह्रियन्ते, एवं व्यञ्जकशब्दार्थयोः ध्वनित्वं सिध्यति । लोचनकृता अभिनवगुप्तेन ध्वनेः पञ्चस्वरूपार्थं व्याकरणस्य ऋणित्वं स्वीक्रियते । अतएव आनन्दवर्धनाचार्येण मम्मटेन च वैयाकरणप्रशंसायाम् उच्यते-**'प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम् । ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति ।' ध्वन्यालोकः १-१३**

**'बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः ।' काव्यप्रकाशः १-४**

अभिधा-लक्षणा-व्यापारानन्तरं व्यञ्जनावृत्तिः स्वीक्रियते । व्यञ्जनायाः प्राधान्येन काव्ये कल्पनायाश्चिन्तनस्य अनुभूत्यादित्तत्त्वानां च समावेशोऽभूत् । कल्पनाया अभावे लक्षणाया व्यञ्जनाया वा प्रवृत्तिर्न प्रसरति। नानुभूतिं विना भावावेशः,भावावेशमन्तरेण न लक्षणा व्यञ्जना वोद्भवति। व्यञ्जना-शक्तिः काव्ये प्रभविष्णुतां रमणीयतां रागात्मकतां च सन्निवेशयति। तदैव काव्ये रमणीयत्वं जायते ।

**क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः । शिशुपालवधः ४-१७**

तादृशी रमणीयता काव्ये व्यञ्जनाशक्तेः ध्वनेर्वा संजायते। यथा रमणीशरीरे लावण्यम्, मेषे विद्युत्, चन्द्रमसि ज्योत्स्ना, उषसि ज्योतिर्वाऽन्तर्निहिता, तथैव काव्ये ध्वनेरधिष्ठानम्। ध्वनितत्त्वं न काव्यस्यावयवरूपम्, अपि तु अवयविरूपेण आत्मरूपेण वा प्रतितिष्ठति ।काव्यशास्त्रे अभिधा लक्षणा व्यञ्जना चेति तिस्रो वृत्तयः स्वीक्रियन्ते । अभिधा वाच्यार्थप्रधाना, लक्षणा लक्ष्यार्थप्रधाना, व्यञ्जना व्यङ्ग्यार्थप्रधाना। व्यञ्जनाशक्तेः स्वीकरणे ये दोषा विविधैः शास्त्रज्ञैरुद्भाविताः, ते दोषा आनन्दवर्धनेन ध्वन्यालोके मम्मटेन च काव्यप्रकाशे निरस्ताः । उक्तञ्च-

**यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ।**

**फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ।। काव्यप्रकाशः २-१४**

**नाभिधा समयाभावात: हेत्वभावान्न लक्षणा । काव्यप्रकाशः २-१**

**विरतास्वभिधाद्यासु ययार्थो बोध्यते परः ।**

**सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ।। साहित्य-दर्पणः २-१२, १३**

व्यञ्जना द्विविधा-शाब्दी आर्थी च। तत्र शाब्दी द्विधा-अभिधामूला लक्षणामूला च। आर्थी व्यञ्जना च वक्तृ-बोद्धव्यादीनां वैशिष्ट्याद् अन्यदर्थं बोधयति ।

ध्वनेर्मुख्यतया द्वौ भेदौ स्तः (१) लक्षणामूलो ध्वनिः, अविवक्षितवाच्यध्वनिर्वा। (२) अभिधामूलो ध्वनिः, विवक्षितान्यपरवाच्य-ध्वनिर्वा। लक्षणामूले ध्वनौ वाच्यार्थस्य विवक्षा प्रयोजनं वा न भवति । व्यङ्ग्यार्थो लक्ष्यार्थम् आश्रित्यावतिष्ठते। अस्यापि द्वौ भेदौ अर्थान्तरसंक्रमित- वाच्यध्वनिः, अत्यन्ततिरस्कृत वाच्यध्वनिश्च । अर्थान्तरसंक्रमिते वाच्यार्थः स्वार्थं बोधयन्नपि अर्थान्तरं संक्रामति । अत्यन्ततिरस्कृते वाच्यध्वनौ च वाच्यार्थः सर्वथा तिरस्क्रियते। लक्षणामूलश्चैष ध्वनिः ।

अभिधामूले विवक्षितान्यपरवाच्ये ध्वनौ वा व्यङ्ग्यार्थो आश्रयते । अस्यापि द्वौ भेदौ- संलक्ष्यक्रम-व्यङ्ग्यध्वनिः असंलक्ष्यक्रम-व्यङ्ग्य-ध्वनिश्च । संलक्ष्यक्रमे व्यङ्ग्यध्वनौ व्यङ्ग्यार्थप्रकाशस्य पौर्वापर्यक्रमो लक्ष्यते । असंलक्ष्यक्रमे व्यङ्ग्यध्वनौ च शतपत्रभेदनन्यायेन पौर्वापर्यं न लक्ष्यते। तत्र सत्यपि पौर्वापर्ये यौगपद्यात् न तत्र क्रमज्ञानम्। द्वयोरप्येतयोर्भेदयोरनेके भेदा वर्ण्यन्ते।गुणीभूतव्यङ्ग्ये वाच्यादपेक्षया व्यङ्ग्यार्थस्य नाधिकं महत्त्वम्। जगन्नाथमतेन गुणीभूतव्यङ्ग्यं काव्यमपि उत्तमकाव्यान्तर्गतं स्वीकरणीयम्। अस्य अगूढ-अपराङ्गव्यङ्ग्यादिभेदेन अष्टौ भेदाः।

ध्वनिवादिमतेन काव्यं त्रिधा विभज्यते- उत्तमं मध्यमम् अवरं (अधमं) चेति। व्यङ्ग्यार्थस्य प्राधान्ये काव्यमुत्तमम्। **'वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम्' (साहित्यदर्पणः ५० ४-१)**। उत्तमकाव्यस्यापि भेदत्रयम्- **रसध्वनिः**, **अलंकारध्वनिः वस्तुध्वनिश्च**। तत्र रसध्वनिः सर्वोत्तमः ।

गुणीभूतव्यङ्ग्यं काव्यं मध्यमम्। **'अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्'** (काव्यप्रकाशः १-५)।

अत्र व्यङ्ग्यार्थस्य सत्त्वेऽपि वाच्यार्थापेक्षया तस्य गौणत्वं भवति। अधमकाव्ये अवरकाव्ये वा शब्दचित्रादिकम् अलंकारप्रदर्शनादिकं च भवति। अत्र रसाभावादस्याधमत्वम्। **'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरंस्मृतम्', काव्यप्रकाशः १-५ ।**

ध्वनिवादस्य महत्त्वस्य कारणं यदत्र सर्वेषामपि काव्यमूलतत्त्वानां रसालंकार-वक्रोक्त्यादीनां समावेशो भवति। अत्र रीतिवद् न केवलं पाण्डित्यप्रदर्शनम्, अपि तु चित्ताह्लादकत्वं चेतो विकासकत्वं च भवति। ध्वनिवादस्य रमणीयत्वं शब्दमूलकम् अर्थमूलकं शब्दार्थोभयमूलकं च। ध्वनिः काव्ये ललनालावण्यवद् अपूर्वरम्यत्वं प्रतीयमानमर्थं च द्योतयति।खण्डनमण्डनादिभिः पुष्टः सर्वमान्योऽयं काव्यसिद्धान्तः। नैतादृशः काव्यसिद्धान्तो भुवनेऽन्यत्रावलोक्यते। अतएवैत्तस्य प्रतीयमानमर्थं महत्त्वम्।

## 3.3 विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पतिः

काव्यं हि आनन्दानुभूतिसाधनम् आनन्दानुभूतिश्च रसास्वादमूला। रसास्वादनादेव आनन्दावाप्तिः। अतएव काव्यप्रयोजने मम्मटो 'सद्यः परनिर्वृतये' इति व्याचष्टे-

**सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादसमुदन्गातं तं विगलितवेद्यान्तरम् आनन्दम् । काव्यप्रकाशः १-२**

विश्वनाथः साहित्यदर्पणे रसस्वरूपं प्रतिपादयति यद् रसो ब्रह्मास्वादसहोदरः-

**वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः ।**

**स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ।। साहित्यदर्पणः ३-२,३ ।।**

रसस्य आस्वाद्यत्वम् अनुभूतिविषयत्वं च मम्मटेन वर्ण्यते :-

**'पानकरसन्यायेन चर्व्यर्माणः, हृदयमिव प्रविशन्, अन्यत्सर्वमिव तिरोदधत्, ब्रह्मास्वादमिवानुभावयन्, अलौकिकचमत्कारकारी शृङ्गारादिको रसः' काव्यप्रकाशे उल्लासः ४।**

तैत्तिरीयोपनिषदि **'रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति' (तैत्तिरीयोपनिषद् २०७)** इत्यत्र ब्रह्मणो रसरूपत्वं तदवाप्तौ च आनन्दोपलब्धिवर्यण्ते । नाट्यशास्त्रे भरतेन निर्दिश्यतेः-'रस इति कः पदार्थः ?उच्यते- आस्वाद्यमानत्वात् । कथमास्वाद्यते रसः ? यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषा हर्षादींश्चाधिगच्छन्ति, तथा नानाभावाभिनयव्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावान् आस्वादयन्ति सुमनसः प्रेक्षकाः हर्षादीश्चाधिगच्छन्ति ।' –नाट्यशास्त्रे अध्यायः ६

यथा नानाव्यञ्जनमिश्रम् अन्नं भुञ्जाना रसान् आस्वादयन्ति, तथैव नानाभावाभिव्यञ्जितान् स्थायिभावान् सहृदया आस्वादयन्ति, हर्षं चानुभवन्ति । रसभावयोश्च परस्परं पोषकत्वम्। न भावहीनो रसः, न च रसहीनो भावः । एवं द्वावपि परस्परं भावयतः । (नाट्यशास्त्र ६-३७)। रसः सर्वेषां भावानां मूलम्, यथा बीजं वृक्षपुष्पादेः । (नाट्यशास्त्रम् ६-३९)

भरतेन नाट्यशास्त्रे उच्यते- **'नहि रसाद् ऋते कश्चिदर्थः प्रवर्तते' (नाट्यशास्त्रम् ६-३२)**। कथं रसनिष्पत्तिरिति जिज्ञासायां तेनोच्यते- **विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः।**

अत्र विभावाः कारणानि, अनुभावाः कार्याणि, व्यभिचारिणश्च सहकारिणः, एषां संयोगाद् रसस्य निष्पत्तिः । उक्तञ्च मम्मटेन-

**कारणान्यथ कार्याणि सहकारीणि यानि च।**

**रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ।।**

**विभावा: अनुभावास्तत् कथ्यन्ते व्यभिचारिणः ।**

**व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ।। काव्यप्रकाशः ४-२७-२८**

अत्र संयोगशब्दं निष्पत्तिशब्दं चाश्रित्य विविधा वादाः प्रादुरभवन् । प्राधान्येन चत्वारो वादा विविधदर्शनविद्भिः प्रतिपादिताः । तत्र (१) **भट्टलोल्लटेन मीमांसादर्शनम् आश्रित्य 'उत्पत्तिवादः', (२) शंकुकेन न्यायदर्शनमाश्रित्य 'अनुमितिवादः', (३) भट्टनायकेन सांख्यदर्शनमाश्रित्य 'भुक्तिवादः', (४) अभिनवगुप्तेन च वेदान्तदर्शनमाश्रित्य 'अभिव्यक्तिवादः'** प्रस्ताविताः ।

(१) **भट्टलोल्लटस्य रसोत्पत्तिवादः-** तन्मतानुसारं विभावानाम् अनुभावानां व्यभिचारिभावानां च संयोगेन रसस्य उत्पत्तिर्भवति । तत्र विभावैर्ललनादिभिः आलम्बनोद्दीपनकारणैः रत्यादिरूपः स्थायिभावो जायते । अनुभावैः कटाक्षादिभिः कार्यैः प्रतीतियोग्यः क्रियते । व्यभिचारिभिर्निर्वेदादिभिः पोष्यते । स च रसो मुख्यतया अनुकार्ये रामादौ वर्तते । तद्रूपानुकरणात् नटेऽपि स रसः प्रतीयते ।

अत्र संयोगशब्दस्य निष्पत्तिशब्दस्य च अर्थत्रयं गृह्यते । (१) विभावैः सह स्थायिभावानाम् उत्पाद्य-उत्पादकभावः संबन्धः, तेन रसस्य निष्पत्तिः उत्पत्तिरित्यर्थः । (२) अनुभावैः सह स्थायिभावानां गम्य-गमकसंबन्धः, तेन रसस्य निष्पत्तिः प्रतीतिरित्यर्थः । (३) व्यभिचारिभावैः सह स्थायिभावानां पोष्य-पोषकभावः संबन्धः, तेन रसस्य निष्पत्तिः पुष्टिरित्यर्थः ।

रसो मुख्यतया अनुकार्ये रामादावेव भवति । नटे तु केवलं तद्रूपानुसंधानाद् रसप्रतीतिः। नटादीनां वेशभूषादिभिः दर्शकानां तथाविधं रसाप्लुतत्वं यथा नटेऽपि तेषां रामादिबुद्धिः। एतादृशो भ्रम एवानन्दानुभूतेः कारणम् । एतन्मतानुसारं रसास्वादः अनुकार्याणां रामादीनामेव, दर्शकानां रसानुभूतिः नटादीनां माध्यमेन संजायते। तेषां रसानुभूतिः गौणी परानुभूतिमूला च ।भट्टलोल्लटो मीमांसादर्शनमाश्रयते । तन्मतानुसारं विषये एवं रसोत्पादनस्य क्षमता। अत्र रसो वाच्यः, न तु व्यङ्ग्यः, अतोमतमिदम् उत्पत्तिवादः तात्पर्यवादः, आरोपवादो वा कथ्यते। यथा मीमांसामते यजमानः पुरोहितादि-माध्यमेन यज्ञस्य फलम् अवाप्नोति, तथैव दर्शकानां रसप्रतीतिः अभिनेतृणां माध्यमेन संजायते ।अस्मिन् मते केचन दोषाः समापतन्ति (१) रसानुभूतिर्मुख्यतया अनुकार्ये, गौणरूपेण च नटे वर्तते। सामाजिकानां दर्शकानां वा कथं रसानुभूतिरिरिति न स्फुटीक्रियते । (२) अनुकार्ये रामादौ रसः, तेषां जगत्यभावेन तन्निमित्तकेनाभिनयेन अभिनेतृषु अपि कथं रसोत्पत्तिः ?(३) प्रेक्षकेषु रसप्रतीतिरेव रसानुभूतिः, अथवा तेषु स्वाभाविकी हार्दिकी चानुभूतिः?एतेषां दोषाणां निराकरणं नात्र क्रियते ।

**(२) शङ्कुकस्य अनुमितिवादः-** शङ्कुको न्यायसंमतम् अनुमितिवादं प्रस्तौति । तत्र 'चित्रतुरगन्यायेन' यथा अवास्तविकेऽश्वे वास्तविकाश्वबुद्धिः, तथैव सामाजिकैः अभिनेतृषु रामादिबुद्धिम् आरोप्य अभिनयादिकौशलहेतुत्वाद् रसानुभूतिः क्रियते। अत्र सामाजिकेषु विद्यमानया वासनया अनुमिति- साहाय्येन रसानुभूतिः । सामाजिकाः चित्रतुरगन्यायेन अभिनेतृषु अनुकार्य रामादिरूपताग्रहणाद् रसानुभूत्तिम् अनुमाय स्ववासनया तत्र रसानुभूति कुर्वन्ति। अत्र सम्यग्-मिथ्या-संशय-सादृश्य-प्रतीतिभ्यो विलक्षणया 'चित्रतुरगन्यायेन' रामोऽयमिति प्रतिपत्त्या सामाजिकानां वासनया रसानुभूतिः। अत्र अनुमानेन रसानुभूतिर्जायते।अत्र संयोगाद् इत्यस्य गम्य-गमकभावसंबन्धाद् इत्यर्थः। रसनिष्पत्तिरित्यस्य च रसानुमितिरित्यर्थः। तन्मूला च रसानुभूतिः।

अस्मिन् वादेऽपि केचन दोषा आपतन्ति। (१) अस्मिन् मतेऽनुमानेन रसानुभूतिः । किं पर्वते धूमदर्शनेन अग्नेः अनुमाने कृतेऽपि अग्नेः उष्णताऽनुमानेन प्राप्तुं शक्यते ? एवम् अनुकर्तृषु नटादिषु रसानुभूतेरनुमानेऽपि कथं तन्निमित्ता प्रेक्षकाणां रसानुभूत्तिः? एषा रसानुभूतिः

नानुमितिमूला, अपि तु स्वानुभूतिमूला । (२) अनुमानं बुद्धेविषयः, न त्वनुभूतेः । (३) रसानुभूतिः प्रत्यक्षा स्वानुभूतिमूला च । न साऽनुमानेन साध्या ।

**(३) भट्टनायकस्य भुक्तिवादः-** भट्टनायको रसं नानुमेयं मन्यते, अपितु भोज्यं मन्यते । तन्मते संयोगस्याभिप्रायो भोज्यभोजकभावोऽस्ति, निष्पत्तेः तात्पर्यं च 'भुक्तिः' वर्तते। रसानुभूतिप्रक्रियाया अवस्थात्रयम्-अभिधा, भावकत्वं भोजकत्वं च। तत्र अभिधया शब्दार्थेऽवगते भावकत्वव्यापारेण विभावादीनां साधारणीकरणं भवति। साधारणीकरणेन व्यक्तिवैशिष्ट्यादेः अभावो भवति, अतो विभावादेः निर्वैयक्तिकत्वं भवति। ततश्च भोजकत्व- व्यापारेण रजस्तमसोः क्षये सत्त्वोद्रेकाद् रसो भुज्यते नास्वाद्यते इत्यर्थः। स च रसो ब्रह्मास्वादसहोदरः।

भट्टनायकस्य मतेऽपि केचन दोषा उपस्थाप्यन्ते- (१) भट्टनायको ध्वनिवादविरोधी आचार्यः। स भावकत्व-भोजकत्व-व्यापारयोः कल्पनां प्रस्तौति। द्वावेतौ व्यापारौ नानुभवसिद्धौ। (२) अत्र स्थायिभावस्य भोगः स्वीक्रियते।स स्थायिभावः किं रामादिगतः, नटादिगतः, आहोस्वित् सामाजिकगतः। एतत् नात्र विशदीक्रियते।भोजकत्व-व्यापाराश्रयेण तस्य मतं 'भुक्तिवादः' इत्येवं गृह्यते। भट्टनायकेन या साधारणीकरण-प्रक्रिया प्रस्तुता, सा सर्वमान्या सर्वाभिनन्दिता च। भट्टनायकस्य काव्यशास्त्रे एतदपूर्व योगदानं वर्तते। एतन्मतं सांख्यसिद्धान्तानुयायि । यथा सांख्ये सुखदुःखादयोऽन्तःकरणधर्माः न त्वात्मनः। परन्तु अन्तःकरणसंबद्धत्वाद् पुरुषेऽपि सुखदुःखादीनाम् औपाधिकी प्रतीतिः । तथैव प्रेक्षकेषु अविद्यमानोऽपि रसः औपाधिकरूपेण भुज्यते ।

(४) **अभिनवगुप्तस्य अभिव्यक्तिवादः-** अभिनवगुप्तो भट्टनायकाभिमतं भावकत्व-भोजकत्व-व्यापारद्वयं निषिध्य अभिव्यञ्जनावादं प्रतिष्ठापयति। स च 'रसनिष्पत्तिः' इत्यस्य रसाभिव्यक्तिः इत्यर्थ स्वीकुरुते । एतन्मतं च आचार्यभरतस्य मतेनापि संगच्छते ।

अभिनवगुप्तो भावकत्व-भोजकत्वव्यापारद्वयम् अशास्त्रीयं मनुते। 'आस्वाद्यत्वाद् रसः' इति भोजकत्वं रसस्वभाव एव । 'काव्यार्थान् भावयन्ति इति भावाः', एवं भावकत्वमपि भावानां वैशिष्ट्यमेव । अतो भावकत्व-भोजकत्व द्वयम् अग्राह्यम् ।स रसं व्यङ्ग्यं मनुते। रसो व्यञ्जनया सहृदयं प्रभावयति । रसास्वादश्च सहृदयानामेव । अत्र संयोगशब्देन व्यङ्ग्य-व्यञ्जकसम्बन्धो गृह्यते । स्थायिभावो व्यङ्ग्यः, विभावादयश्च व्यञ्जकाः। व्यञ्जनाया विभावनव्यापारेण विभावानां स्थायिभावानां च साधारणीकरणं भवति। तन्मतानुसारम् 'न ह्येतत्चित्तवृत्तिवासनाशून्यः कश्चित् प्राणी भवति '। वासनैषा सुप्तावस्थायां विद्यमाना अभिनयादिभिः जागर्ति । यथा मृद्गन्धो जलसेचनेन प्रादुर्भवति, तथैव वासनाया अपि उदयः ।

साधारणीकरणेन सहृदयस्य वासनासंवादो भवति, सुषुप्तश्च स्थायिभावो निर्वैयक्तिकरूपेणाभिव्यक्तः सन् आनन्दास्वादं कारयति, एष एव रसास्वादः । अस्मिन् आस्वादे एव रसस्य स्थितिः। संवित्विश्रान्तिजन्य एष आनन्दः । अत्र चैतन्यं विश्रान्ति-स्थितौ संतिष्ठते। रसानुभूतिरियं सामान्यानुभूतिभिन्नत्वाद् उदात्तत्वात् सर्वजनवेद्यत्वाच्च अलौकिक इति कथ्यते । अत्र संबन्धविशेषस्य परिहारः । रसोऽयं सहृदयसंवेद्यः । मतमिदं शैवाद्वैतवादम् आनन्दवादं वा आश्रित्य प्रवर्तते । तत्र चेतनायाः पूर्णविश्रान्तेः स्थितिः स्वीक्रियते ।अभिनवगुप्तस्य मतमिदं दर्शनमूलत्वात् मनोवैज्ञानिकचिन्तनपरत्वाद् यथार्थभावेन रसविश्लेषणाच्च अद्यत्वेऽपि सर्वैरेव काव्यतत्त्वज्ञैः गृह्यते स्वीक्रियते प्रशस्यते च ।

## 3.4 अपारे काव्यसंसारे कविरेव प्रजापतिः

कविपदस्य अर्थः भवति वर्णनकर्ता इति। यः स वर्णनं करोति। कविः मनीषी अस्ति। कवेः विषये कथितं वर्तते यत "कविः मनीषी परिभूः स्वयम्भूः" अर्थात् कविः यत् यथा च इच्छति तदेव तथा च वर्णयति। अपरञ्च उक्तं वर्तते यत् – कवयो क्रान्तद्रष्टारः। कविः यदवलोकयति तत् सामान्यमानवाः न पश्यन्ति।काव्यहेतुवर्णने कथितमस्ति यत्

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥

अर्थात् येषां पार्श्वे एते गुणाः सन्ति, ते काव्यरचनायां प्रवीणाः सन्ति। शक्तेः अर्थोऽस्ति प्रतिभा। प्रतिभा नाम गुणविशेषः। प्रतिभाविषये कथितमस्ति यत्- अपूर्ववस्तु-निर्माणक्षमा प्रज्ञा प्रतिभा, नवनवोन्मेषशालिनी प्रज्ञा प्रतिभा,। कवि प्रतिभासम्पन्नो भवति। हिन्दीभाषायां प्रसिद्धं कथनमस्ति- जहाँ न जाए रवि, वहाँ जाए कवि अर्थात् आदित्यस्य रश्मयः यत्र न गच्छन्ति तत्रापि कविः गच्छति, तद्दृशस्य वर्णनमपि करोति। यत् सूक्ष्मं वर्तते तस्य विशालरूपेण वर्णनं करोति, तथा यत् विशालं वर्तते तच्सूक्ष्मरूपेण वर्णनं करोति। ते सौभाग्यशालिनः सन्ति ये हि कवित्वं लभन्ते। कथितमप्यस्ति-

नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।

कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा ॥

कवीनां महिमाविषये ब्रूते कोऽपि बुधः

अपारे काव्यसंसारे कविरेकः प्रजापतिः ।

यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥

कवेः वर्णनशैली प्रभावकारी भवति। सः साक्षात् यश: कायरूपे तिष्ठति। तस्य कृतकाव्यमाध्यमेन जनाः स्वकार्येषु आनन्दं प्राप्नुवन्ति। रसानुभूतिं कृत्वा शान्तिमधिच्छन्ति मानवाः। कविः उपलब्धानाम् अनुपलब्धानाम् उपस्थितानाम् अनुपस्थितानां वस्तूनाञ्च वर्णने समर्थः अस्ति। अनेन प्रकारेण इदं उक्तमस्ति यत् अपारे काव्यसंसारे कविरेव प्रजापतिः। नायकानां, प्रतिनायकानां, नायिकानां, नाटकपात्राणां अङ्गानाम् उपाङ्गानां प्रत्यङ्गानामपि वर्णनं सहजतया करोति। काव्यशास्त्रविषयकानि यानि तत्त्वानि सन्ति- यथा- अलङ्काराः, गुणाः, रसाः, रीतयः, वृत्तयः, प्रवृत्तयः, सन्धयः, कार्यावस्थाः, अर्थप्रकृतयः इति एतेषां सर्वेषां सूक्ष्माति-सूक्ष्मवर्णने कविः अलमस्ति। कविः सर्वविषयाणां ज्ञाता भवति। स अन्यथा वर्णनं न करोति। न केवलं जागतिकवस्तूनां वर्णने तेषां ख्यातिरस्ति अपितु अलौकिकवस्तूनां वर्णनेऽपि स सफलतामर्जयति। वर्णनाय स ब्रह्मणः कृतिरवलोकयति, स यदा इच्छति तदा अस्यां कृतौ स परिवर्तनमपि करोति। यथा – ब्रह्मणः सृष्टौ षड्-रसाः एव सन्ति- मधुराम्लतिक्तकटुकषायलवणाः इति किन्तु कविकृतजगति अधिकरसाः सन्ति- श्रृंगारहास्यकरुणरौद्रवीरभयानकबीभत्साद्भुतशान्तवात्सल्याः इति। केचन भक्तिमपि रसरूपेण मन्यन्ते। स अलङ्काराणां चमत्कारिकप्रयोगं कृत्वा विश्वस्य अद्भुतवर्णनं करोति। देवानां स्तुतिवर्णने अद्भुतवर्णनमस्ति। यथा शिवमहिम्नस्तोत्रे-

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे
सुरवरतरुशाखा लेखनीपत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ॥

कविः जानाति यत् केषां पाठकानां कृते अहं लिखामि। अतः पाठकानां लक्ष्यं कृत्वा लिखति किन्तु कुत्रचित् स्वान्तःसुखाय अपि कविः रचनां करोति, यथा – गोस्वामीतुलसीदासरामचरितमानसे कथयति यत् - स्वान्तःसुखाय तुलसीरघुनाथगाथा तथा च स्वान्तःतमःशान्तये। महर्षिवेदव्यासः, महर्षिः वाल्मीकिः, महर्षिः पराशरः, महाकविः कालिदासः इत्यादयः अत्यन्ताः महान्तः कवयः आसन्। महाकवि-कालिदासस्य प्रशंसां कुर्वन् केनापि उक्तं यत् –

पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठित कालिदासः ।
अद्यापि तत्तुल्यकवेराभावात्,अनामिका सार्थवती बभूव ॥

अनेन प्रकारेण निश्चितरूपेण कवीनां महत्ता जगति प्रसिद्धा वर्तते। ते प्रजापतिसदृशाः सन्तीति भावः।

## 3.5 भारवेरर्थगौरवम्

महाकविभारविविषये कथितं वर्तते यत् यथा सूर्यस्य प्रकाशः अस्ति तादृशः भारविः वर्तते- यथा “भारवेः भारविः”। आचार्यकपिलदेवद्विवेदीमते कथितं यत् -

**अर्थदीधितिसंदीप्ता, विज्ञपद्मविकासिनी ।**

**ज्ञानालोकसदावर्शा, भा रवेरिव भारवेः ॥ (कपिलस्य)**

महाकवेः भारवेः ईसवीयाब्दस्य षष्ठ्यां शताब्द्यां जन्म अभवत् । ६३४ तमे ईसवीये वर्षे लिखितेन 'ऐहोल' शिलालेखे इदं वर्णितमस्ति। कथितञ्चापि तत्र रविकीर्तिना- **येनायोजि नवेऽश्मस्थिरमर्थविधौ विवेकिना जिनवेश्म ।**

**स विजयतां रविकीर्तिः कविताश्रितकालिदासभारविकीर्तिः ॥**

अवन्तिसुन्दरीकथायां महाकविः भारविः दाक्षिणात्यः वर्णितोऽस्ति। स पुलकेशिद्वितीयस्यानुजस्य विष्णुवर्धनस्य सभापण्डितः आसीत्। तस्य एका एव कृतिः 'किरातार्जुनीयम्' अस्ति। महाकवेः भारवेः अर्थगौरवं किरातार्जुनीयग्रन्थमाध्यमेन सर्वैरेव ज्ञायते। किरातार्जुनीयग्रन्थे गुणत्रय-समन्वितत्वाद् भाषासौष्ठवाद् भावागाम्भीर्यारसान्वितत्वाद् अलंकारालंकृतत्वात् कल्पनाप्रचुरत्वात् सायासरचनानैपुण्याद् अत्यधिकं महत्त्वं वर्तते। अस्मात् कृतिकारणात्वं भारवेरर्थगौरवत्म् प्रसिद्धमिति। एतस्य महाकाव्यस्य टीका मल्लिनाथेन कृता अस्ति। मल्लिनाथः अस्य विषये कथयति यत्-

**नारिकेलफलसंमितं वचोभारवेः सपदि तद् विभज्यते ।**

**स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम् ।।**

काव्यमेतद् बृहत्त्रय्यामन्यतमं गण्यते । ग्रन्थद्वयं चान्यद् वर्तते माघ- विरचितं शिशुपालवधम्, श्रीहर्षप्रणीतं नैषधीयचरितं च। समग्रेऽपि संस्कृतवाङ्मये नैतादृशम् ओजोगुणसमन्वितं काव्यान्तरम् । अष्टादशात्र सर्गाः । किरातवेषधारिणा शिवेन सहार्जुनस्य संगरोऽत्र वर्ण्यते। वीररसोऽत्र प्रधानः, रसाश्चान्ये गौणाः। श्रीसमन्वितं काव्यमेतदिति संसूचनाय 'श्री'शब्देन महाकाव्यमारभते, प्रतिसर्गान्ते च 'लक्ष्मी' शब्दं प्रयुङ्क्ते।

**'दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु' किरातार्जुनीयम् १.४६** इत्यनेन भारवेस्तरणिवत् काव्याकाशे भासमानत्वं ज्योतिर्वलयितत्वं च व्यज्यते। निराशासन्त्रस्तस्वान्ते प्रकाशकिरणप्रकाशनेन व्यपगमयति मोहतिमिरम्-

**पुरुषस्तावदेवासौ यावन्मानान्न हीयते - किरातार्जुनीयम् ११-६१**

**जन्मिनो मानहीनस्य तृणस्य च समा गतिः- किरातार्जुनीयम् ११-५९**

भारविः संस्कृतवाङ्मये अभिनवायाः शैल्याः प्रवर्तकः । काव्ये किम् अर्थगौरवमेव स्यात्, भाषालावण्यं वा, भावगाम्भीर्यं वा , सरसा परिष्कृता पदावली वा, प्रौढो बन्धो वेति प्रतिपुरुषं रुचिवैचित्र्यात् नैकः साधीयान् अध्वा। एतदेव विव्रियमाणेन तेन रुचिभेदोऽभिधीयते -

**स्तुवन्ति गुर्वीमभिधेयसम्पदं विशुद्धिमुक्तेरपरे विपश्चितः ।**

**इति स्थितायां प्रतिपूरुषं रुचौ, सुदुर्लभाः सर्वमनोरमा गिरः ॥ किरातार्जुनीयम् १४-५**

इति विप्रतिपत्तौ कतमा सरणिरास्थेयेति विवेचयता तेन स्वाभिमतम् उपस्थाप्यते यत् काव्ये प्रसाद-माधुर्यगुणसंयोजनेन पदानां विशदत्वम्, अर्थगौरवसमन्वितत्वं, पुनरुक्तिदोषाभावः, वर्णनानां क्रमबद्धत्वम् अनिवार्यम् । एवं स गुणालंकाररसभावानां समन्वयम् ईहते-

**स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् ।**

**रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित् ।। किरातार्जुनीयम् २-२७**

**'शक्तिर्निपुणता.........काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे'** (काव्यप्रकाशः १-३) इति मम्मटोक्तिमनुसृत्य शक्तिं नैपुण्यम् अभ्यासं चान्तरेण न काव्यत्वं सिद्धयति । भारविस्तत्र प्राक्कृतपुण्यकर्मणां परिपाकेनैव प्रसन्नगम्भीरपदायाः सरस्वत्या उद्भवं प्रतिपादयति । पुण्यपारिपाकेनैव श्रुतिमधुरा वाग् उदेति-

**विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम् ।**

**प्रवर्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती ।। किरातार्जुनीयम् १४-३**

न केवलम् अगाधपाण्डित्यमेव काव्यत्वजनकम्, अपि तु निरन्तराभ्यासेन उत्कटसाधनया च गम्भीरार्थस्य सरल्या शैल्याऽभिव्यक्तिः संभाव्यते । साधनयेव स्वाभीष्टभावाभिव्यक्तिः -

**भवन्ति ते सभ्यतमा विपश्चितां मनोगतं वाचि निवेशयन्ति ये ।**

**नयन्ति तेऽप्युपपन्ननैपुणा गभीरमर्थं कतिचित् प्रकाशताम् ।। किरातार्जुनीयम् १४-४**

काव्ये विस्तारमपास्य अर्थगौरवसमन्वितस्य संक्षिप्तस्य वाक्यजातस्य प्रयोगस्तथैव सुखदः परिणामसुखश्च, महाप्रभावस्य भेषजस्य प्रयोगो महाव्याधिनिराकरणेन सुखावहः । तादृश्येव वचोयुक्तिः काव्ये साधीयसी-

**परिणामसुखे गरीयति व्यथकेऽस्मिन् वचसि क्षतौजसाम् ।**

**अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः ।।। किरातार्जुनीयम् २-४**

भारवेः काव्यसौन्दर्यं उद्वीक्ष्यैवास्य 'आतपत्र-भारविः' इत्युपनाम संजातम् । वात्ययोद्गतः पद्मरागो वियति सुवर्ण-आतपत्र-लक्ष्मीं धत्ते। सुवर्ण- छत्रस्य व्योम्नि कल्पनैव कविम् 'आतपत्रत्व' आपादयति।

किरातार्जुनीये शतशः सूक्तिमुक्तानां विनिवेशो भारवेर्गुणगौरवं व्यनक्ति । तस्य विविधशास्त्रावगाहिनी नवनवोन्मेषशालिनी च प्रज्ञा सततम् अभिनवम् अर्थं प्रसूते। विद्युदवद् विद्योतमानास्तस्य सूक्तयः तमःप्रसरमलिनेऽपि चेतसि प्रखरांशुवद् ज्ञानज्योतिः प्रसारयन्ति । प्रतिपदम् अर्थ- गाम्भीर्यावेक्षणादेव 'भारवेरर्थगौरवम्' इति सामोदमुद्घोष्यते । अविमृश्यकारित्वस्य दोषस्तेनोद्भाव्यते-

**सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।**

**वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः ।। किरातार्जुनीयम् २-३०**

मृदुत्वतीक्ष्णत्वयोः समन्वयेनैव लोके विजयश्रीलाभः-

**समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम् ।**

**अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः ॥ किरातार्जुनीयम् २०३८**

भौतिकविषयाणां दुःखोदर्कत्वं नश्वरत्वं च कथं साधूपस्थाप्यते-

**शरदम्बुधरच्छायागत्वर्यो यौवनधियः।**

**आपातरम्या विषयाः पर्यन्तपरितापिनः । किरातार्जुनीयम् ११-१२**

शौर्यस्य कोपस्य च समन्वयेनैव लोकजयित्वं संभाव्यते-

**अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।**

**अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥ किरातार्जुनीयम् १-३३**

'शठे शाठ्यं समाचरेत्' इति नीर्ति न जातु विस्मरणीया-

**व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः । किरातार्जुनीयम् १.३०**

तेन गुणार्जनस्य महत्त्वं बहुधा प्रतिपाद्यते- 'सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम्' (किरातार्जुनीयम् ११-११), 'गुरुतां नयन्ति हि गुणा न संहतिः' (किरातार्जुनीयम् १२-१०), 'गुणाः प्रियत्वेऽधिकृता न संस्तवः' (किरातार्जुनीयम् ४-२५),स्वावलम्बनेनैव सततं समुन्नतिः 'विनिपातनिवर्तनक्षमं, मतमालम्बनमात्मपौरुषम्' (किरातार्जुनीयम् २-१३) ।

राजनीतिविषयकाः शतशः सूक्तयोऽत्रोपलभ्यन्ते- 'प्रकर्षतन्त्रा हि रणे जयश्रीः' (३-१७), 'परमं लाभमरातिभङ्गमाहुः' (किरातार्जुनीयम् १३-१२), अधिकबलवता विरोधो नोचितः 'प्रार्थनाधिकबले विपत्फला' (किं रातार्जुनीयम् १३-६१), नीतेराश्रयणेनैव लोकप्रियत्वम् 'नन्नयहीनादपरज्यते जनः' (किरातार्जुनीयम् २-४९), नृपसचिवयोः ऐकमत्यं सर्वसिद्धिकरं 'सदाऽनुकूलेषु हि कुर्वते रतिं , नृपेष्वमात्येषु च सर्वसंपदः' (किं रातार्जुनीयम् १-५)। यथा च 'हितं मनोहारि च दुर्लभं वचः' (१-४), 'सुदुर्लभाः सर्वमनोरमा गिरः' (१४-५), 'वसन्ति हि प्रेम्णि गुणा न वस्तुनि' (८-३७), 'वरं विरोधोऽपि समं महात्मभिः' (१-८), 'ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः (२-२०), 'न रम्यमाहार्यमपेक्षते गुणम् (४-२३), 'कामाः कष्टा हि शत्रवः' (११-३५), 'गुणगृहा वचने विपश्चितः' (२-५), 'भवन्ति गोमायुसखा न दन्तिनः' (१४-२२)।

एवं भारवेः प्रतिपदं भावसौष्ठवम् अर्थगाम्भीर्यं च संलक्ष्यते ।

## 3.6दण्डिनः पदलालित्यम्

महाकविर्दण्डेविषये प्रशंसारूपेण प्रसिद्धाः उक्तयः सन्ति -

उपमा कालिदासस्य भारवेरर्थगौरवम् ।

दण्डिनः पदलालित्यम् माघे सन्ति त्रयो गुणाः ॥
कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः ।

त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः ॥

निर्दण्डोऽपि यो दण्डी यतिर्दशकुमारकृत् ।

काव्यादर्शोनिरादर्शः सुन्दरी धयते मुनिः ॥ १ ॥

सकषायोऽपि यो दण्डी नाम्ना दण्डी न चेतसा ।

विरक्तो योऽविरक्तोऽपि यतिसंज्ञो यतिच्युतः ॥ २ ॥ (कपिलस्य)

महाकवेर्दण्डिनो जीवनकालविषये सन्ति बहवो विप्रतिपत्तयः। समासतः पक्षद्वयं मुख्यत्वेनाङ्गीक्रियते। केचन ईसवीयाब्दस्य षष्ठशताब्द्या अन्तिमे चरणेऽस्य जन्म स्वीकुर्वन्ति, अन्ये च सप्तमशताब्द्या उत्तरार्धे। राजशेखरेण कविरसौ प्रबन्धत्रयस्य प्रणेतेति प्रतिपाद्यते । विषयेऽस्मिन्नपि प्रचुरो विवादः। काव्यादर्शो दशकुमारचरितं चेति ग्रन्थद्वयं तु सर्वैरेव स्वीक्रियते दण्डिनः कृतित्वेन । अवन्तिसुन्दरीकथेति खण्डश: उपलब्धा कृतिस्तु तस्यैव मन्यते मनीषिभिः कैश्चित् ।

दशकुमारचरितमाश्रित्यैव अस्य महती महनीयतेति नात्र विप्रतिपत्तिविदुषाम् । गद्यकाव्यस्यैतस्य गौरवं पदलालित्यं च प्रेक्ष प्रेक्षं प्रेक्षावतां प्राप्यन्ते प्रभूतानि प्रचुरप्रशस्तिपूर्णानि पद्यानि । यथा- "कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः" इत्यादीनि । केचन वाल्मीकेः-व्यासस्य चानन्तरं दण्डिनमेव महाकवित्वेन आकलयन्ति । "जाते जगति वाल्मीको कविरित्यभिधाऽभवत्। कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि ।" मथुराविजयमहाकाव्यस्य रचयित्री गङ्गादेवी (१३८० ई०) तु दण्डिनो वाचं सरस्वत्या: मणिदर्पणमेव मनुते। 'आचार्यदण्डिनो वाचामाचान्तामृतसम्पदाम् । विकासो वेषसः पल्ल्या विलासमणिदर्पणम् ।'

किं नाम पदलालित्यम् ? कथं चैतेन काव्यस्य महत्त्वमभिवर्तते ? सुप्तिङन्तं पदमिति, सुबन्तं तिङन्तं वा पदमित्यभिधीयते । ललितस्य भावो लालित्यं माधुर्यमिति । यत्र पदेषु वाक्येषु शब्दसंघटनायां माधुर्य श्रुतिसुखदत्वं वा समुपलभ्यते, तत्र पदलालित्यमिति मन्यते । पद-लालित्यं शब्दसौष्ठवं चावर्जयति सचेतसां चेतांसीति गुणोऽयं गरिमाणं तनुते काव्यस्य । दशकुमारचरिते दृश्यते गुणस्यैतस्य गौरवम् । तच्चेह समासतो व्याख्यातम् ।

मृद्वीकारस-भारभरिता भारती दण्डिन आचार्यस्य । सुधीभिरास्वादनीयं चैतस्या माधुर्यम्। राजहंसस्येव राज्ञो राजहंसस्य सुषमां समवलोकयन्तु सन्तः । "अनवरतयागदक्षिणारक्षितशिष्टविशिष्टविद्यासंभारभानुरभूसुरनिकरः," "राजहंसो नाम घनदर्पकन्दर्पसौन्दर्य सौन्दर्यहृद्यनिरवद्यरूपो भूपो बभूव" (पूर्वपीठिका उच्छ्वास १)। राजहंसस्य महिषी वसुमती ललना- कुलललामभूताऽभूत् । "तस्य वसुमती नाम सुमती लीलावतो कुलशेखरमणी रमणी बभूव" (पूर्वपीठिका उच्छवास १) ।मालवेश्वरस्य प्रस्थानवर्णनं कुर्वताऽभिधीयते तेन- 'मालवनाथोऽप्यनेकानेकपयूथसनाथो विग्रहः सविग्रह इव साग्रहोऽभिमुखीभूय भूयो निर्जगाम (पूर्वपो० उ०१) राजहंसश्च मालवराजचमूं स्वसैन्यसहितोऽवारुणत् । 'राजहंसस्तुप्रशस्तवीत्तदैन्यसैन्यसमेतस्तीव्रगत्या निर्गत्याधिकरुषं द्विषं रुरोध" (पूर्वपी० उ०१)।

विजयार्थं प्रस्थातुकामानां कुमाराणां यमकालंकारालंकृतं वर्णनमदो दण्डिनो वाग्वैभवमेवाविर्भावयति । "कुमाराभिरामा रामाद्यपौरुषा रुपा भस्मीकृतारयो रयोपहसितसमीरणा रणाभियानेन यानेनाभ्युदयाशंसं राजानमकार्षुः" (पूर्वपी० उ०२)। ऐन्द्रजालिककृतेन्द्रजालप्रदर्शनरूपेण

फणिनां वर्णनमेतत्- 'तदनु विषमं विषमुल्वणं वमन्तः फणालंकरणा रत्नराजिनीरा- जितराजमन्दिराभोगा भोगिनो भयं जनयन्तो निश्चेरुः' (पूर्वपी० उ०५)।

कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः- दण्डिनो भावभाषामाधुर्यं रचनाकौशलं मनोभावाभिव्यञ्जनदक्षत्वं रसप्रवणत्वं सालंकृतत्वं च निरीक्ष्य विपश्चित्तल्लजैः दण्डी एवं कविपदमर्हतीति 'कविर्दण्डी' इति सादरम् उद्घोष्यते। निदर्शनरूपेण केचन सन्दर्भाः प्रस्तूयन्ते।

आस्तरणमधिशयानाया राजकन्याया वर्णनमेतद् दण्डिनः सूक्ष्मेक्षिकया ईक्षणं वर्णनवैदग्ध्यं चाविष्करोति । 'अवगाह्य कन्यान्तःपुरं प्रज्वलत्सु मणि- प्रदीपेषु कुसुमलवच्छुरितपर्यन्ते पर्यङ्कतले ईषद्विवृतमधुरगुल्मसंधि, आभग्नश्रोणिमण्डलम्, अतिश्लिष्टचीनांशुकोत्तरीयम्, अनतिवलिततनुतरोदरम्, अर्धलक्ष्याधरकर्णपाशनिभृत-कुण्डलम्, आमीलितलोचनेन्दीवरम्, अविभ्रान्तभ्रूपताकम् चिरविलसनखेदनिश्चलां शरदम्भोघरोत्सङ्गशायिनीमिव सौदामिनीं राजकन्यामपश्यत्' (उत्तर पी० उ० २)।

राज्ञो धर्मवर्धनस्य दुहितरमुपवर्णयति । 'तस्य दुहिता प्रत्यादेश इव श्रियः, प्राणा इव कुसुमधन्वनः, सौकुमार्य-विडम्बितनवमालिका, नवमालिका नाम कन्यका' (उ० पी० उ०५)। गिरिवरं च वर्णयन्नाह-अहो रमणीयोऽयं पर्वतनितम्बभागः, कान्ततरेयं गन्धपाषाणवत्युपत्यका, शिशिरमिदमिन्दीवरारविन्दमकरन्दविन्दुचन्द्रकोत्तरं गोत्रवारि, रम्योऽयमनेकवर्ण-कुसुममञ्जरी- भरस्तरुवनाभोगः।'उत्तरपीठिकायां समग्रः सप्तमोच्छ्वास ओण्ठ्यवर्णरहितः । एतादृशं निबन्धनमपूर्वमदृष्टचरं च विशालेऽपि विश्ववाङ्मये । ओष्ठ्यवर्णपरिहारेऽपि न परिहीयतेऽत्र शब्दसौष्ठवं पदलालित्यं च। यथा- 'आर्य, कदर्यस्यास्य कदर्थ- नाम्न कदाचिन्निद्रायाति नेत्रे'। ''सखे सैषा सज्जनाचरिता सरणिः, यदणीयसि कारणेऽनणीयानादरः संदृश्यते'। 'असत्येन नास्यास्यं संसृज्यते'। 'चिरं चरितार्था दीक्षा'। 'न तस्य शक्यं शक्तेरियत्ताज्ञानम्'। 'दिष्टया दृष्टेष्टसिद्धिः । इह जगति हि न निरीह-देहिनं श्रियः संधयन्ते। श्रेयांसि च सकलान्यनलसानां हस्ते सन्निहितानि' । 'असिद्धिरेषा सिद्धिः, यदसन्निधिरिहार्याणाम् । कष्टा चेयं निःसङ्गता, या निरागसदासजनं त्याजयति । न च निषेधनीया गरीयसां गिरः'। 'तच्छरीरं छिद्रे निधाय नीरात्रिरयासिषम्'। 'दृश्यतां शक्तिरार्थी, यत्तस्य यतेरजेयस्येन्द्रियाणां संस्कारेण नीरजसा नीरजसान्निध्यशालिनि सरसि सरसिजदलसंनिकाशच्छायस्याधिकतरदर्शनीयस्याकारान्तरस्य सिद्धिरासीत्' । 'बहुश्रुते विश्रुते विकचराजीव सदृशं दृशं चिक्षेप देवो राजवाहनः' (उत्तर पी० उ० ७)।

पदमाधुर्यम् - यथा- 'न मां स्निग्धं पश्यति, न स्मितपूर्वं भाषते, न रहस्यानि विवृणोति, न हस्ते स्पृशति , न व्यसनेष्वनुकम्पते, नोत्सवेषु अनुगृह्णाति। मृगयालाभांश्च निर्दिशति । शाकुन्तले द्वितीयाङ्के वर्णितेन मृगयालाभेन साम्यमेतद् भजते। 'यथा मृगया ह्यौपकारिकी,न तयान्यत् मेदोऽपकुर्यादङ्गानां स्थैर्यकार्कश्यातिलाघवादोनि, शीतोष्णवातवर्षक्षुत्पिपासासहत्वम्, सत्त्वानामवस्थान्तरेषु चित्तचेष्टितज्ञानम्' (उत्तर पी० उ० ८)।

एवं संलक्ष्यते दण्डिनः कृती शब्दयोजनसौष्ठवमनुप्रासमाधुर्यं यमकयोजनं वर्णनवैशद्यम्, ओष्ठ्यवर्णपरिहाराञ्चितं रम्यं वर्णनम्, उक्तिप्रत्युक्तिप्रशस्तं पदे पदे पदलालित्यम्। सर्वमदस्तस्य कृतौ कमनीयतामादधाति।

त्रयो दण्डिप्रबन्धाश्च०- राजशेखरेण शार्ङ्गधरपद्धतौ पद्यमिदं प्रस्तूयते यत्-

त्रयोऽग्नयस्त्रयो देवास्त्रयो वेदास्त्रयो गुणाः।

त्रयो दण्डिप्रबन्धाञ्च विषु लोकेषु विश्रुताः॥

अत्र 'त्रयो दण्डिप्रवन्धाश्च' इत्याश्रित्य सुधीभिः दण्डिनो ग्रन्थत्रयस्यान्वेषणम् आरब्धम् । दण्डिनः कृतित्वेन ग्रन्थषट्कं मन्यते- १. दशकुमारचरितम्, २. काव्यादर्शः, ३. अवन्तिसुन्दरीकथा, ४. छन्दोविचितिः, ५. कलापरिच्छेदः, ६. द्विसन्धानकाव्यम्।

दण्डिनो ग्रन्थद्वयम्-दशकुमारचरितं काव्यादर्शश्च प्राप्येते। दशकुमारचरितं काव्यादर्शश्च तद्विरचिते इति नात्र संशीतिः। केचन 'अवन्ति-सुन्दरीकथा' इति ग्रन्थं तृतीयं मन्यन्ते, परं डा० कीथमहोदयस्य मतमत्र समीचीनं प्रतिभाति यत् शैल्या भिन्नत्वाद् अप्रामाणिकत्वाच्च नेयं दण्डिनः कृतिः, अपितु कस्यचिदन्यस्य लेखकस्य कृतिः ।

काव्यादर्शो छन्दोविचित्तिः, कलापरिच्छेदश्चेति ग्रन्थद्वयं तस्य कृतित्वेन निर्दिश्यते, परं ग्रन्थद्वयमेतत् छन्दः कलाविषयकं लघुकायं परिशिष्टरूपात्मकं प्रतीयते। तस्य 'द्विसन्धानकाव्यम्' अद्यावधि अप्राप्यम्। तदुपलब्धौ तस्य प्रामाण्यं वक्तुं सुकरम् । एवं तस्य ग्रन्थद्वयमेव प्राप्तम्। तृतीयं चानुसन्धेयम् ।

## 3.7 काव्येषु नाटकं रम्यम्

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।
तत्राऽपि चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम् ॥

अस्मिन् संसारे कवीनां महिमा महीयान् । ते खलु सौभाग्यशालिनः सन्ति ये हि कवित्वं लभन्ते। कथितमप्यस्ति-

नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।

कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा ॥

कवीनां महिमाविषये ब्रूते कोऽपि बुधः

अपारे काव्यसंसारे कविरेकः प्रजापतिः ।

यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥

काव्यस्य दृश्यश्रव्ययोः भेदः अस्ति। काव्यस्य गद्यस्य च द्वौ प्रकारौ स्तः। यस्मिन्गद्यस्य पद्यस्य च प्रयोगः भवति तत् चम्पूकाव्यं इति उच्यते । पुनः मुक्तकः, प्रबन्धः (महाकाव्यम्), कथा-आख्यायिका-इत्यादीनां-काव्यानां अनेके भेदाः सन्ति। काव्यस्य दृश्यभेदस्य अन्तर्गत रूपं (नाटकम्) भवति। अभिनयः तेषां मुख्यविशेषता अस्ति तथा च तेषु गद्य-काव्ययोः प्रयोगः भवति। एतानि नाट्यानि प्रसिद्धकथायां लिखितानि सन्ति, संख्या: सुविभक्ताश्च सन्ति। रूपकाणां दशवर्गाः सन्ति- नाटकम्, प्रकरणं, भाणः, व्ययोगः, समवकारः, डिमः, ईहामृगः, अङ्कः, वीथी, प्रहसनञ्च।

भरतस्य नाट्यशास्त्रे, नाटकानाम् उत्पत्तिविषये कथितम् अस्ति यत्लौकिकजनान् अतीवदुःखितान्दृष्ट्वा इन्द्रादिदेवाः ब्रह्मण: समीपं गत्वा एतादृशानां ग्रन्थानां निर्माणार्थं प्रार्थयन्ति स्म। सार्ववर्णिकग्रन्थस्य निर्माणार्थं प्रार्थनामपि कुर्वन्ति स्म। तेषां आनन्दार्थं पञ्चमवेदस्वरूपेण नाट्यशास्त्रं निर्मितम् इति। ते आनन्दन्ति स्म। ते सर्वं प्राप्तुं शक्नुवन्ति। इदं श्रुत्वा ब्रह्मा चतुर्णां वेदानां ध्यानं कृत्वा ऋग्वेदात्पाठ्यं, सामवेदात्गीतं, यजुर्वेदादभिनयं, अथर्ववेदात् रसञ्च स्वीकृत्य पञ्चवेदस्य रचनाम् अकरोत्।

इत्थं तावत्काव्यप्रणेतारः कवयः संसारे भृशं महत्त्वं भजन्ते। काव्यं खलु दृश्यश्रव्यत्वभेदेन द्विधा भवति। श्रव्यकाव्यं तु केवलं श्रूयते एव परन्तु दृश्यकाव्ये तु यत् श्रूयते, तस्य दर्शनमपि जायते। श्रवणतो दर्शनं वरमिति लोके प्रसिद्धम्। यतो हि श्रवणेन खलु तथा आनन्दोपलब्धिः रसानुभूतिश्च न यथा दर्शनेन। रसानुभूतिश्च नाम काव्यस्य परमप्रयोजनम्। अतः काव्येषु नाटकं रम्यम् अस्ति। कथितमप्यस्ति काव्यकलाकोविदैः-

न तच्छिल्पं न तच्छास्त्रं न सा विद्या न सा कला ।।

न स योगो न तत्कर्म नाटके यन्न दृश्यते ।।

तथा च त्रिवर्गसाधनं नाट्यमिति च प्रसिद्धम् अस्ति। नाटकानाम् अनुशीलनेन मानवजीवने नानानुभूतीनां सम्यक् अनुभूतिः जायते। इदमेव कारणमस्ति यत् संस्कृतसाहित्ये नाटकानां प्रचुरता वर्तते।

यद्यपि संस्कृतसाहित्ये बहूनि नाटकानि सन्ति परन्तु तेषु कालिदासप्रणीतम् अभिज्ञानशाकुन्तलं नाम नाटकं महत्त्वपूर्णं स्थानं भजते। तस्य ख्यातिः विदेशेष्वपि प्रसृता वर्तते। पाश्चात्याः अपि विद्वांसः अस्य नाटकस्य मुक्तकण्ठेन प्रशंसां कुर्वन्ति । अत एव बुधानाम् एतत्कथनं तु सर्वथा समीचीनम् अस्ति। कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्। अस्य भाषा सरसा, सरला, सुमधुरा, प्रसादगुणोपेता चास्ति। विश्वविश्रुतः सद्गुणोपेतः दुष्यन्त अत्र नायकोः मतः। ललितलावण्यकलिता ललनाललामभूता शकुन्तला चात्र नायिका। मन्ये नाटके मन्दस्मितवदना शकुन्तलेव कवेः भाषासुन्दरी सविलासं गच्छति। या खलु सहृदयानां हृदयानि हरति। शकुन्तलायाः स्वरूपवर्णनावसरे एवं कथयति राजा -

अनाघ्रातं पुष्पं किसलयमलूनं कररुहैरनाविद्धं रत्नं मधुनवमानास्वादितरसम्।

अखण्डं पुण्यानां फलमिव च तद्रूपमनघं न जाने भोक्तारं कमिह समुपस्थास्यति विधिः।।

अत्र संयोगविप्रलम्भयोरुभयोः श्रृङ्गारयोः मन्दाकिनीसलिलं प्रवहति| विप्रलम्भे राज्ञो दुष्यन्तस्य अधीरत्वं विलोकनीयं वर्तते -अयं स ते तिष्ठति संगमोत्सुको विशङ्कसे भीरु ! यतोऽवधीरणाम्। संयोगे सः तस्याः सेवां कर्तुम् ईहते- अङ्के निधाय करभोरु यथासुखं ते संवाहयामि चरणावुत पद्मताम्रौ ।

सर्वत्र तस्य कवितायां द्राक्षारसमिव रसमाधुरी वर्तते।

यामासाद्य को नाम भुवि कृतकृत्यतां न लप्स्यते ?

## 3.8 अभ्यासार्थ प्रश्न

### 3.8.1 वस्तुनिष्ठ प्रश्न

1. एतेषु महाकविकालिदासविरचितं किं वर्तते

(क) किरातार्जुनीयम् (ख) कादम्बरी (ग) स्वप्नवासवदत्तम् (घ) मेघदूतम्

2. काव्येषु किं रम्यं ?

(क)प्रकरणं (ख) व्यायोगः (ग) समवकारः (घ) नाटकं

3. महाकविभारविकृतं काव्यं वर्तते ?

(क) मेघदूतम् (ख) कादम्बरी (ग) स्वप्नवासवदत्तम् (घ) किरातार्जुनीयम्

4. दण्डिनः........... ?

(क)उपमा (ख) अर्थगौरवम् (ग) पदलालित्यम् (घ)एतेषु नास्ति

5. विभावानुभावसंचारिसंयोगात् ?

(क)अलङ्कारनिष्पत्तिः (ख) भावनिष्पत्तिः (ग) रसनिष्पत्तिः (घ)एतेषु नास्ति

### 3.8.2 लघु-उत्तरीय प्रश्न

1.रसनिष्पत्तेः वर्णनं सङ्क्षेपेण कुरुत।

2. महाकवेः भारवेः परिचयो देयः ।

3. महाकवेः दण्डिनः पदलालित्यं प्रदर्शयत।

4. नाटकस्य रमणीयतायाः वर्णनं कुरुत।

5. ध्वनिस्वरूपं प्रदर्शयत।

### 3.8.3 दीर्घ-उत्तरीय प्रश्न

1.रसस्वरूपस्य वर्णनं कुरुत।

2. भारवेरर्थगौरवम् इत्यस्य व्याख्या कार्या।

3. दण्डिनः पदलालित्यम् इत्यस्य व्याख्या कार्या।

4. काव्येषु नाटकं रम्यम् इत्यस्य वर्णनं कुरुत।

5. काव्यस्यात्मा ध्वनिः इत्यस्य व्याख्या कार्या।

# इकाई4- धर्मशास्त्रीय निबन्ध

## इकाई की रूपरेखा

4.0 उद्देश्य
4.1 प्रस्तावना
4.2 संस्काराः
4.3 धर्मशास्त्रं राष्ट्रोन्नतिश्च
4.4 धर्मशास्त्रस्य अनुशासनम्
4.5 सम्पत्तिविभाजनम्
4.6 अभ्यासार्थ प्रश्न
4.6.1 वस्तुनिष्ठ प्रश्न
4.6.2 लघु-उत्तरीय प्रश्न
4.6.3 दीर्घ-उत्तरीय प्रश्न

## 4.0 उद्देश्य

इस इकाई के अध्ययन के पश्चात् शिक्षार्थी निम्नलिखित बिन्दुओं से सम्बन्धित विषयों का अवबोध कर सकेंगे-

- संस्कृत भाषा में उपनिबद्ध धर्मशास्त्र का सामान्य परिचय प्राप्त कर सकेंगे।
- संस्कारों के विषय में जान सकेंगे।
- धर्मशास्त्र एवं राष्ट्रीय उन्नति के विषय को जान सकेंगे।

- धर्मशास्त्र के अनुशासन का अभिज्ञान कर सकेंगे।
- धर्मशास्त्र के अन्तर्गत वर्णित सम्पत्ति के विभाजन का परिचय प्राप्त कर सकेंगे।

## 4.1 प्रस्तावना

चतुर्थ ईकाई के अन्तर्गत संस्कृत भाषा में उपनिबद्ध धर्मशास्त्रीय निबन्धों में हम संस्कार, धर्मशास्त्र एवं राष्ट्रीय उन्नति, धर्मशास्त्र के अनुशासन तथा सम्पत्तिविभाजन का अभिज्ञान कर सकेंगे। धर्मशास्त्र भारतीयसंस्कृति का आधारतत्त्व है। हमें भारतीय संस्कृति में नैतिक, सामाजिक, आर्थिक तथा किसी भी प्रकार के अनुशासन का अवबोध करना है तो हमें धर्मशास्त्र का अवबोध करना चाहिए। इस इकाई में हमें धर्मशास्त्रीय निबन्धों के विषय में ज्ञान प्राप्त होगा।

## 4.2संस्काराः

संस्करोतीति संस्कारः। तत्र बहवः संस्काराः। भारतवर्षे नैव हिन्दूनामपित्वन्येषामपि धर्माणां सम्प्रदायानां प्रमुखान्यङ्गानि सन्तः समागच्छन्ति। सम्प्रत्यप्यस्मिन् विषमे विज्ञानप्रधानयुगे यदा सभ्यताया विकासस्वर: काष्ठां चुम्बति मनुष्यः स्वच्छन्दतामेवाधिकमाश्रयते संस्कारास्तस्मिन् निजं महत्त्वम् क्षुण्णं कृत्वा तिष्ठन्ति। इमे संस्काराचिरकालादेव सामाजिकधार्मिकैक्यस्य माध्यमभूताः भवन्तो भारते प्रधावन्ति । अतीतकाले प्राप्तप्रभवा एते कतिपयैः परिवर्तनैः सहाद्यापि जनेषु, जीवन्ति । एतेषां हिन्दूसंस्काराणां वर्णन वेदानां कतिपयेषु सूक्तेषु, ब्राह्मणग्रन्थेषु, गृह्यधर्मसूत्रेषु, स्मृतिषु च समुपलभ्यते। वैदिकसाहित्येषु यद्यपि कुत्रापि संस्कार इति शब्दस्योपलब्धिर्न भवति, तथापि विभिन्नस्थलेषूपनयनान्त्येष्टिप्रभृतिसंस्काराङ्गानां वर्णनमवश्यमेव प्राप्तं भवति।
संस्कारशब्दस्य व्युत्पत्तिः परिभाषा च- 'संस्कार' इति शब्दः समुपसर्गपूर्वकात् 'कृ' धातोः 'घञ्' प्रत्ययेन निष्पद्यते। यस्याभिप्रायो धार्मिक विधिविधानत्मकसौन्दर्यस्य बाह्यन्तरप्रतीकभूतं कृत्यं भवति। नैवेदमपि तु संस्कार इति शब्देन शिक्षा, संस्कृतिः प्रशिक्षणं, शुद्धिः, परिष्करणमाभूषणमित्यादयोऽप्यर्थाः प्रतीयन्ते। संस्कारस्य प्राच्यमान्यतासम्बन्धं वीरमित्रोदय संस्कृतप्रकाशाख्ये ग्रन्थे लिखितमस्ति- "आत्मशरीरान्यतरनिष्ठो विहितक्रियाजन्योऽतिशयविशेषः संस्कारः"। अर्थात् सविध्यनुष्ठानमेव संस्कारः, यः शारीरिकाध्यात्मिकयोः प्रकृत्याधायकत्वमावहति । संस्काराणां सविध्यनुष्ठानेन संस्कृतंजनविशेषेऽवर्णनीयगुणानामुद्भवो भवतीति सदा सर्वैर्मन्यते ।

यद्यपि संस्कारशब्दस्य प्रयोगस्तद्वास्तविकेऽर्थे न लभ्यते, तथापि शास्त्रीयदृष्ट्या संस्कारा गृह्यसूत्राणां विषयसीमानिबद्धा एव सन्ति। गृह्यसूत्रानुसारमपि मीमांसावत् संस्कारस्यार्थो ज्ञायते |

गृहसूत्रेषु सामान्यतया विवाहादारभ्य समावर्तनं यावद् दैहिका एव संस्कारा विरूपिता भवन्ति । प्रायोऽन्त्येष्टिसंस्कारस्योल्लेखो न लभ्यते। संस्काराः**आश्वलायन-गृह्यसूत्रे १२, पारस्करगृहसूत्रे. बौधायनगृह्यसूत्रे च १३ तथा वैखानसगृह्यसूत्रे, १८ संस्काराणामुल्लेखनमस्ति। एवमेव गौतमः चत्वारिंशत् संस्कारान्, मनुः त्रयोदशसंस्कारान् ।याज्ञवल्क्यश्च केशान्तं विहाय मनूक्तान् द्वादशसंस्कारान् स्वीकरोति । उत्तरवर्तिनीषु च स्मृतिषु प्रचलितानां संस्काराणा संख्या षोडशात्मिका लिखितास्ति। तेषां क्रमशो विवरणानीत्थम्-**

१. गर्भाधानम्, २. पुंसवन् ३.सीमन्तोन्नयनम्

४. जातकर्म,५. नामकरणम्,६. निष्क्रमणम्

७. अन्नप्राशनम्८. चूडाकर्म,९ . कर्णवेधः

१०. विद्यारम्भः,११. उपनयनम्१२. वेदारम्भः ,

१३. केशान्तः१४. समावर्तनम्,१५. विवाहः

१६. अन्त्येष्टिः ।

संस्काराणां प्रयोजनम् - संस्काराणां भारतेऽतीव महत्त्वम् अस्ति। घोरनास्तिकतासम्मतेऽस्मिन् वैज्ञानिकयुगेऽपि स्वकीयां महत्तां संस्कारा यथावद् रक्षन्ति।

**१. गर्भाधानसंस्कारः-** येन कर्मणा पुरुषः स्वकीयायां भार्यायां वीर्यं संस्थापयति. तद् गर्भाधान संस्कारः कथ्यते। महर्षिणा शौनकेनापि लिखितम्- "यस्य कर्मणः पूर्त्या स्त्री प्रदत्तं शुक्रं धारयति, तद्गर्भाधानमिति व्याह्रियतौ । महर्षिणो जैमिनेरपीदमेवास्ति कथनम्- "गर्भः सन्धार्यते येन कर्मणा तद् गर्भाधानम्। वैदिककाले सन्ततेः सृष्टेश्च विकासः ऋषिमुनिभिर्निर्दिष्टेषु प्रार्थनादिवचनेषु , तथापि सविशेषं ध्यातव्यं यद् गर्भाधानविषयकविधानानां सर्वप्रथमं व्यवस्थितं रूपं गृह्यसूत्रेष्वेवास्माभिः सम्प्राप्यते । परवर्तिषु धर्मशास्त्रस्मृत्यादिग्रन्थेषु संस्कार-सम्बन्धिनीनां सामग्रीणां वैज्ञानिकं विवेचनं मिलति यत्र गर्भाधानार्थं कालनक्षत्रराश्यादीनां विशदं विवेचनं कृतं वर्तते ।

**२. पुंसवनसंस्कारः** - संस्कारोऽपि सर्वेषु गृह्यसूत्रेषु उपलभ्यते । याज्ञवल्क्यस्य गौतमस्य चापि ग्रन्थयोरस्योपवर्णनं वर्तते। अयं संस्कारो गर्भधारणानन्तरं सम्पाद्यते। येन कर्मणा पुत्रस्योत्पत्तिर्भवति स्म, तत् पुंसवनमिति नाम्ना ख्यातमासीत् । यथोक्तम्-

**"पुमान् प्रसूयते येन कर्मणा तत्पुंसवनमीरितम्।"**

अस्मिन्नवसरे गीयमानासु ऋक्षुपुत्रस्य सुस्पष्टमुल्लेखोऽस्ति । अथर्ववेदे सामवेदे च पुत्रप्रसविन्याः जनन्याः प्रशंसा प्रार्थना च विद्येते। गृह्यसूत्राणीमं संस्कारं गर्भधारणानन्तरं द्वितीये तृतीये वा मासि सम्पादयितुमादिशन्ति। "अस्मिन्नवसरे गर्भवत्याः दक्षिणनासारन्ध्रे वटपादपस्य रसो गर्भपातस्य निरोधार्थं पुत्रलाभार्थञ्चोद्दिश्य निश्च्योत्यते स्म।

**३. सीमन्तोन्नयनम् -** सस्कारोऽयं सर्वेषु धर्मशास्त्रग्रन्थेषूल्लिखितोऽस्ति । याज्ञवल्क्येन तु केवलः 'सीमन्तः' इति शब्दो व्यवहृतः । गर्भकालस्य तृतीयसंस्कारे अस्मिन् तु केवलः 'सीमन्तः' इति शब्दो व्यवहृतः। अस्मिन संस्कारे गर्भवत्याः केशानामुन्नयनस्य क्रियायां विधानं विहितम्। यथास्यार्थः- "सीमन्त उन्नीयते यस्मिन् कर्मणि तत् सीमन्तोन्नयनम् ।" लोके गर्भवतीं नारीमङ्गलकारिण्य शक्तयो दुःखयन्ति, तन्निवारणं केशोन्नयनेन भवितुं शक्यते इत्यास्थां मनसि निधायैव संस्कारविशेषमाचरन्ति स्म। आश्वलायनगृह्यसूत्रे कथयति यद् राक्षस्यो प्रथमं गर्भं भक्षितुं प्रधावन्त्यतः पुरुषास्ता साममाङ्गलिकानां शक्तीनां विनाशाय श्रियमावाहयेत्। एतत्कर्मसम्पादनार्थमेवास्य संस्कारस्य प्रयोजनं मातुरैश्वर्यं तथा च गर्भस्थस्य शिशोः दीर्घायुष्यमप्यासीत्, ययोः कामना पुरुषेण क्रियते स्म। बौधायनगृह्यसूत्रं गर्भवत्याः प्रीणनमप्यपरं प्रयोजनमस्य संस्कारस्य सङ्केतयति।

संस्कारोऽयं गर्भधारणाच्चतुर्थे मासे कर्तुं व्यवस्थापितः ।

**"चतुर्थे गर्भमासे सीमन्तोन्नयनम्।** आश्वलायनगृह्यसूत्रे अ० १ क०१४। पारस्करेऽपरोऽपि समयो निर्दिष्ट :-

**"पुंसवनवत् प्रथमे गर्भे मासे षष्ठेऽष्टमे वा"। का १, क० १५।**

एवमेव गर्भिण्याः रक्षार्थमायुर्वेदग्रन्थे सुश्रुते लिखितम्-गर्भधारणकालादेव नारी मैथुनात्, श्रमात्, दिवा शयनात्, निशाजागरणात्, वाहनारोहणात्, दूरयात्रायाः, रेचनात्, रक्तश्रवणात्, मूत्रपुरीषयोरसामाजिकस्थलाच्च निवारिता । एवं सर्व वं संस्कारादयः शिशोः सम्यग् रक्षार्थमेव विहिता इति स्पष्टं भवति।

**४. जातकर्मसंस्कारः-** अस्य संस्कारस्य वर्णनं सर्वेषु सूत्रेषु सर्वासु च स्मृतिषु कृतमस्ति। उद्देश्यं चास्य संस्कारस्य निर्विघ्नप्रसवेन सह जातकं वीरं यशस्विनं वर्चस्विनञ्च कर्तुमासीत्। अस्य संस्कारस्य सम्पादनावसरे नवप्रसूतस्य जातकस्य रसनायां स्वर्णशलाकया मधुना 'ओम्' शब्दो लिख्यते स्म। अथ च कर्णे वेदोऽसि' इत्युच्यते स्म। अथर्ववेदस्य सम्पूर्णे एव (१। ११) सूक्ते सुरक्षितस्य सहजस्य च प्रसवस्य कृते प्रार्थना उपचाराश्च समुपवर्णितास्सन्ति। मध्ययुगीनासु धर्मव्याख्याप्रधानासु पद्धतिषु तत्सम्बन्धिनः परेऽपि नियमाः प्रतिबन्धाश्चोपवर्णिताः सन्ति। संस्कारोऽयं नाभिबन्धनात् प्रागेव सम्पाद्यते स्म।

**५. नामकरणं -** समग्रासु स्मृतिषूपवर्णितमस्ति। यद्यपि नामकरणमस्त्येका भाषाशास्त्रीया समस्या। तथापि भारतीयहिन्दूधर्मो व्यक्तिगतस्य नाम्नः महत्त्वं स्वीकृत्य प्राक्कालादेव तत्परिगणनं धार्मिकसंस्कारेषु कृतम्। वीरमित्रोदयसंस्कृतप्रकाशाख्ये ग्रन्थे बृहस्पतिः नाम्नोऽनिवार्यत्वं स्वीकृत्य कथयति यत् समस्तं नाम समग्राणां लौकिकव्यवहाराणां हेतुरस्ति। तदेव शिवस्याधायकं भाग्योदयस्य च कारणम्। मनुष्यः स्वकीयं नामैवाधृत्य कीर्तिमर्जयति। अतो नामकरणसंस्कारः स्तुत्योऽस्ति । तल्लेखो द्रष्टव्यः -

**"नामाखिलस्य व्यवहारहेतुः शुभावहं कर्म सुभाग्यहेतुः ।**

**नाम्नैव कीर्तिं लभते मनुष्यः ततः प्रशस्तं खलु नामकर्म" ॥**

ऋग्वेदेऽपि 'नामन्' शब्दः प्रयुक्तः । वैदिकसाहित्ये व्यक्तेः पदार्थानाञ्च नामनिर्धारणात् परम्परेयं प्राचीनतमेति प्रतिभाति। ऋग्वेदे, ऐतेरेयब्राह्मणे, शतपथब्राह्मणे च गुह्यनाम्नोऽप्युल्लेखोऽस्ति । नवजातशिशोर्नामकरणविषये शतपथब्राह्मणे, प्रथम उल्लेखो मिलति- "तस्मात् पुत्रस्य जातस्य नाम कुर्यात्"- शतपथब्राह्मणे - ६।१।३।६। संस्कारोऽयं विभिन्नसूत्रग्रन्थानां प्रमाणानुसारं जन्मनो दशमे द्वादशे वा दिवसे सम्पाद्यते। कतिपयेषु च ग्रन्थेषु एकादशतमे दिवसे एकोत्तरशततमे दिवसे वा द्वितीयस्य वर्षस्य प्रारम्भे नामकरणसंस्कारं कर्तुं व्यवस्था दत्तास्ति ।

**६. निष्क्रमण संस्कारः-** अर्थ जातकस्यैक लघुकृत्यमस्ति । केषुचिद राधेषु संक्षिप्त कंपुचिच्यास्य संस्कारस्य सविस्तरं वर्णनं प्राप्यते, बहूनां मलेन जन्मनः चतुर्थ मासि बहूनां मतेन जन्मना द्वादशे दिवसे चतुर्थं मासि वा संस्कारोऽयं सम्पाद्यते। अस्मिन् संस्कारे जनक सूर्यमर्चयति नवजातं च सुतं सूर्यं दर्शयति, मन्त्रोच्चारणञ्च करोति । बौधायनेनाष्टाहुत्यात्मको होमोऽपि समर्थितः। गोभिलश्चन्द्रदर्शनस्यापि चर्चा करोति । यत्र चन्द्रसूर्ययोर्दर्शन चतुर्थे तृतीये मासे वर्णितम्। अस्मिन् समये नवजातो बालकः प्रथमं गृहाद्बहिः सविधि नीयते। यथा पारस्करगृह्यसूत्रे-

**चतुर्थे मासि निष्क्रमणिका सूर्यमुदीक्षयति तच्चक्षुरिति।**

**बहिर्निष्क्रमणञ्चैव तस्य कुर्याच्छिशोः शुभम् ॥ (१।१७।५)**

पिता मन्त्रमुच्यारयन सूर्यं दर्शयति । एवमेव यमो लिखति-

**'तस्तृतीये कर्त्तव्यं मासि सूर्यस्य दर्शनम् ।**

**चतुर्थे मासि कर्तव्यं शिशोश्चन्द्रदर्शनम् ॥**

संस्कारस्यास्योद्देश्यं शिशोर्दैहिकावश्यकतापूर्तिः सृष्ट्यवलोकनं वायुसेवनञ्चसीत्।

**७. अन्नप्राशनम्-** मात्रा दीयमानस्य दुग्धस्य मात्रया शिशोः पूर्णतृप्तेरभावाद मातुः शरीरं पुष्टं विधातुमस्य संस्कारस्योदयो जात इति मन्तव्यम्। वर्धमानः शिशुरधिकमाहारमपेक्षते, यस्य पूर्तिं मातुर्दुग्धं कर्तुमधिकं कालं यावद् न प्रभवति। एतस्मादेव सुश्रुतो लिखति षष्ठे मासि शिशवे पथ्यं सुपाच्यं भोजनं देयमिति । वैदिकसाहित्येऽपि तत्सम्बन्धिन्यः श्रुतयो मिलन्ति। परन्तु सूत्रकाले एवकर्मकाण्डीयेनावरणेन संस्कारोऽयमाच्छदितः इति प्रतिभाति। आश्वालायनगृहसूत्रे लिखितम् –**"षष्ठे मास्यन्नप्राशनम् । (१।१६।१)**

लौगाक्षि स्वकीयमतमेतद्भिन्नं वर्णयति- **"षष्ठेऽन्नप्राशनमं दन्तेषु जातेषु वा"**अर्थात् पाचनशक्तेर्वृद्धौ दशनेषु चोत्पन्नेषु भोजनं शिशवे दातव्यम् । कंचिद्ग्रन्थेष्वस्मिन्नवसरे शिशवे मांसदानस्यापि विधानं कृतमस्ति परन्तु मार्कण्डेयपुराणादिग्रन्थेषु मधु, घृतं, पायसं च खादयेदिति लिखितम्। शांखायनेन लिखितम्-अजमत्स्ययोर्मासं, ओदनं दधिमिश्रितं, मधु घृतश्च सर्वमेकीकृत्य 'भूः भुवः स्वः इति महाव्याहृतिभिः सह शिशुं भोजयेत्। अस्मिन वसरे पूजितानां देवानां समक्षं विविधानि वस्तूनि निधाय शिशुः प्रेर्यते, यच्च वस्तु सः स्वेच्छया गृह्णाति, तत्सम्बन्धिनि ज्ञाने, शिल्पे व्यापारे वा तस्य पारङ्गतता निश्चीयते।

**८. चूडाकर्मसंस्कारः-** धर्मशास्त्रानुसारं संस्कार्य जनं दीर्घाश्दृष्यसौन्दर्यकल्याणादिभिर्मण्डयितुमेवायं संस्कारो निर्धारितः। आयुर्वेदेऽपि संस्कारस्यास्य समर्थनं प्राप्यते। अथर्ववेदे मुण्डनार्थं शिरसः सिक्तीकरणं लिखितम् । सूत्रग्रन्थाः चूडाकर्मणो व्यवस्थितं रूपं प्रस्तुवन्ति। 'चूडा' इति शब्दस्यार्थः बालस्तबको भवति। अयं मुण्डिते शिरसि निधीयते यस्य नाम शिखेत्यप्यस्ति। जन्मनोऽनन्तरं प्रथमवारं शिरसि शिखा स्थाप्यतेऽनेन संस्कारेण। अयमेव संस्कारः 'चौल' इत्यपि नाम्नाभिधीयते। इदं स्पष्टतया वक्तुं न शक्यं यदयं संस्कारो वैदिकेयुगे भवति स्म न वा। भरद्वाजेन मनुना चैकं वैदिकं मन्त्रमुद्धृत्य संस्कारस्यास्य समर्थनं कारितम्-

**"अथास्य सांवत्सरिकस्य चौल कुर्वन्ति यथर्षि यथोपज्ञं वा।**

**विज्ञायते च यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव ।।**

**इति बहुशिखा वेति ।"- भारद्वाजगृह्यसूत्रे १। २८।**

**९. कर्णवेधसंस्कारः-** यद्यप्यतीतकाले कर्णयोश्छेदनं सौन्दर्यप्रसाधनायैवासीत । सुश्रुतसंहिता रोगादीनां निवारणार्थं भूषणधारणार्थं वा कर्णयोश्छेदनं समर्थयति । अण्ड्कोषस्यान्त्रस्य च वृद्धिनिरोधायापि सुश्रुतः कर्णवेधसंस्कारं स्वीकरोति । किन्तु निरुक्तं विलोक्य ज्ञायते, यदयं संस्कारोऽतीतयुगेऽपि भवति स्म। तत्र लिखितं वर्तते-

**"य आतृणत्यवितथेन कर्णावदुःख कृण्वन्नमृतं संप्रयच्छन्।**

**तं मन्येत पितरं मातरं च तस्मै न द्रुह्येतु कतमच्च नाह।।"निरुक्ते २।४**

अर्थात् – यः कर्णयोः सत्येन सह छेदनं करोति, विना व्यथादानममृतं निश्च्योतयति, स स्वकीयाभ्यां पितृभ्यां समानोऽस्ति । संस्कारस्यास्याद्यं वर्णनमथर्ववेदे मिलति। बृहस्पत्यनुसारमयं संस्कारो जन्मनो दशमे, द्वादशे, षोडशे वा दिवसे कर्त्तव्यः। गर्गर्षिः षष्ठेः, सप्तमे, अष्टमे, द्वादशे वा मासि संस्कारोऽयं सम्पाद्य इति कथयति। श्रीपतिः दन्तदर्शनात् प्रागेव संस्कारस्यास्य विधानं निश्चिनीति। कात्यायनः तृतीये पञ्चमे वा वर्षे कर्णवेधः कर्त्तव्य इति निर्दिश्य पूर्वाभिमुखमासीनस्य बालकस्य क्रमशः दक्षिणवामकर्णयोः बेधः कार्य इति कथयति ।

**१०. विद्यारम्भः-** यदा बालकः शिक्षां प्राप्तुं योग्यो भवति, स्म, तदास्यसंस्कारस्यावश्यकता भवति स्म। अयमेव संस्कारः शब्दान्तरेणाक्षरारम्भोऽपि कथयते। चौलसंस्कारादारभ्याष्टवर्षाणि यावद् बालकानां शिक्षाया विषये गृह्यसूत्राणि धर्मसूत्राणि च कमपि न कथयन्ति। कौटिलीयार्थशास्त्रे काचिच्चर्चा कृता प्राप्यते। परन्तु संस्काररूपेण स्वीकृतिः सर्वप्रथमं स्मृतिभिरेव प्रदत्ता दृश्यते। स्मृत्यनुसारं विद्यारम्भचौलकर्मणा सहैव भवेदिति सूचितम्। एवं प्रतिभाति यत् ख्रीष्टाब्दस्य प्रारम्भिककालाद् विद्यारम्भसंस्कारस्य सम्पादनं प्रावर्तत।

**११. उपनयनसंस्कारः-** गुरोः समीपं नयनमेवोपनयनमिति। एष एव संस्कारो व्रतबन्धोऽपि कथ्यते । शब्दोऽयमेकां सुदीर्घामैतिहासिकी परम्परामात्सात्कृत्य वर्तते। अथर्ववेदेऽस्य शब्दस्य प्रयोगो ब्रह्मचारिणं ग्रहीतुं कृतोऽस्ति । परन्त्वागताय शिष्यावाचार्येण दीक्षादानमेवास्ति वास्तविकोऽर्थोऽस्य संस्कारस्य। ब्राह्मणकाले सूत्रकाले चापि प्राय इयमेवास्ति स्थितिः। परवर्तिकाले तु गायत्रीमन्त्रमाध्यमेन द्वितीयजन्मनोऽर्थे उपनयनशब्दो रूढभूतोऽभवत्। स्मृतिनिर्मातारो मनुः याज्ञवल्क्या सह उपनयनसंस्काराद् बालकस्य द्वितीयं जन्म मन्यन्ते। साम्प्रतमस्य संस्कारस्याभिप्रायो द्विजातीनां यज्ञोपवीतधारणमेव गृह्यते। मानवधर्मे काठके चोपनयनशब्दस्य स्थाने उपायनशब्दः प्रयुक्तः । काठकस्य टीकाकारेणादित्यदर्शनेनोक्तं यदुपानयः, उपनयनम्, मौञ्जीबन्धनम्, वटुकरणम्, ब्रतबन्धश्चेति शब्दाः समानार्थाः। संस्कारोऽय सर्वेषु संस्कारेषु श्रेष्ठतमो महत्त्वपूर्णश्चास्ति ।

उपनयनस्य लक्षणं वेदेषु ब्राह्मणसाहित्येषु च प्राप्तं भवति। प्रारम्भिके कालेऽधिकतर सरलामासीदुपनयनम् । एतत्संस्कारेण सम्बद्धाः सर्वे विषयाः समग्रासु स्मृतिषु नोपलभ्यन्ते। तत्र विविधविषयाणामनुक्रमरूपेणैव वर्णनमस्ति । वैदिकमन्त्रप्रयोगसन्दर्भेऽपि सर्वेषु सूत्रेष्वैकमत्यं नास्ति । उपनयनस्य काल आश्वलायनगृह्यसूत्रे वर्णानुसारमेवं लिखितमस्ति-

**"अष्टमे वर्षे ब्राह्मणमुपनयेत्। गर्भाष्टमे वा। एकादशे क्षत्रियम्। द्वादशे वैश्यम् । आषोडशाद् ब्राह्मणस्यानतीतः कालः । आद्वाविंशात् क्षत्रियस्य आचतुर्विंशाद् वैश्यस्य ।-१।१६ १-६**

वर्षाणां गणना गर्भाधानसमयादेव कर्तव्या। आपस्तम्बवैखानसहिर- ण्यकेश्यादिमतानुसारं ब्राह्मणस्य वसन्ते, क्षत्रियस्य ग्रीष्मे हेमन्ते वा वैश्यस्य शरदि, वर्षायां तक्षजातेः (बढ़ई) शिशिरे च एतेषां सर्वेषामुपनयनम् कर्तव्यम् । विधिविधानं वर्णितमस्ति ।

**१२. वेदारम्भः-** प्राक्काले उपनयनसंस्कारेण सहैव वेदारम्भसंस्कारस्यारम्भो भवति स्म। वीता ब्रह्मचारिणो गुरोराश्रमं गत्वा वेदानामध्ययनं कुर्वन्ति स्म। परवर्तिकाले संस्कृतभाषा व्यवहारक्षेत्रान्निर्गता। यस्मादुपनयनं दैहिकसंस्कारमात्र जातम्। उपनयनात् पूर्वमेव बालको लोकभाषाया अध्ययनं प्रारभते स्म। वैदिकवाङ्मयस्य संस्कृतभाषायाच अध्ययनार्थमेवास्य संस्कारस्योद्भव इति स्वीकर्त्तव्यम्। संस्कारस्यास्य प्रथम उल्लेखो व्याससमृतौ प्राप्यते। संस्कारेऽस्मिन गुरुराचार्यो वा ब्रह्मचारिणमुनदिश्योपनयनसंस्कारस्य वर्षान्तं यावद् गायत्रीमन्त्रेण दीक्षितं कृत्वा समध्यापयितुं प्रारभते स्म। संस्कारस्यास्य वर्णनं केवलं मार्कण्डेयपुराण एवं प्राप्यते। अपरार्कस्मृतिचन्द्रिके निहाय सर्वस्मृतिष्वस्थाभावोऽस्ति ।

**१३. केशान्त-** प्राय: सर्वेषु धर्मशास्त्रेषु संस्कारोऽयमुपवर्णितोऽस्ति । संस्कारेऽस्मिन् ब्रह्मचारिणः शिरसः केशानां श्मश्रूणामन्येषाञ्च शरीस्योपरिभागानां केशकर्त्तनं क्रियते। अस्मै संस्काराय पारस्करगृह्यसूत्रेण, याज्ञवल्क्येन मनुना च केशान्त इति शब्दः प्रदत्तः । आश्वलायनेन, शांखायनेन, गोभिलेन शेषैश्च समस्तैर्गृह्यसूत्रैः गोदानमिति शब्दः प्रयुक्तः । शतपथब्राह्मणे (३। १। २४) दीक्षासमये कर्णादूर्ध्वं शिरस एकस्य भागस्य केशकर्त्तनं गोदानसंज्ञया कथितम्। अयं संस्कारः षोडशे, द्वाविंशे, चतुविंशे च वर्षे क्रमशो ब्राह्मणक्षत्रियविशां सम्पाद्य इति मनुना प्रोक्तम् -

**केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते ।**

**राजन्यबन्धोर्द्वाविंश वैश्यस्य द्यधिके ततः ।।२।६५ मनुस्मृतौ**

षोडश वर्षम् कियत्कालादारभ्य मन्तव्यमित्येतद्विषये महान् मतभेदोऽस्ति । केचिज्जन्मनः केचिञ्च गर्भाधानान्मन्यन्ते । षोडशवर्षानन्तरं केशान्तः संस्कारो न कार्य इत्यपि निर्दिष्टम्। केशान्तस्य विधिः चूडाकर्मणा समान एव कतिपयं भेदं विहाय भवतीति ।

**१४. समावर्तनम्** - वेदाध्ययनात् परं विहितं स्नानकर्म, गुरुगृहाद्वा प्रत्यावर्तनकालिकः संस्कारः स्नानं समावर्तनं वा कथ्यते। यथा वीरमित्रोदये-**"तत्र समावर्तनं नाम वेदाध्ययनानन्तरं गुरुकुलाद् स्वगृहागमनम्।"** शब्दान्तरेणायं संस्कारः दीक्षान्तोऽपि कथ्यते स्म। प्राङ्मान्यतानुरूपं ब्रह्मचर्याश्रम एक सत्रमासीत् । दीर्घसत्रं वा एष उपैति यो ब्रह्मचर्यमुपैति ।" अस्माद् दीर्घसत्रादनन्तर स्नानमनिवार्यमासीत्। यतः सागरवत् संस्कृताध्ययनं कथ्यते स्म। यश्चाधीत्य स्नाति स्

**१५. विवाहसंस्कारः-** विवाहसंस्कारस्य सर्वोच्च महत्तास्ति । प्रायः सर्वेषां गृह्यसूत्राणामारम्भो विवाहसंस्काराणैव दृश्यते । ऋग्वेदेऽथर्ववेदेऽपि वैवाहिकविधिविधानानां काव्यात्मिकाऽभिव्यक्तिः प्राप्यते । विवाहशब्दस्य बहवः शब्दा: विवाहसंस्कारस्य तत्त्वानि सूचयन्ति। यथा-उद्वाहः कन्यायाः पितृगृहात ससम्मानं श्वसुरगेहं प्रति नयनम् । विवाहः- विशिष्टप्रकारेण कन्याया: नयनं स्वकीयभार्यां कर्तुं नयनं वा। परिणयः परिणयनं वा-अग्नेः प्रदक्षिणासम्पादनम् । पाणिग्रहणम्-कन्याया हस्तग्रहणम्। पाणिपीडनम्-हस्तस्य हस्तेन सप्रेम सविधिग्रहणम्। एते शब्दा विवाहस्यैकैकतत्त्वं निर्दिशन्ति। शास्त्रेषु सर्वेषां प्रयोगं कृत्वा कतिपयानि कर्माण्यपि सम्पुञ्जीकृतानि। विवाह' शब्दसन्दर्भ ताण्ड्यब्राह्मणस्य भावपूर्णमिदं वाक्यं द्रष्टव्यम् इमौ वै लोकौ सहास्तां तौ वियन्तावभूतां विवाह विवहावहै सह नावस्त्विवति ताण्ड्यब्राह्मणे-७।१०।१।

**१६.अन्त्येष्टिसंस्कारः-**हिन्दूनां भारतीयानां अन्तिमः संस्कारोऽन्त्येष्टिरस्ति । अनेन संस्कारेण सह कश्चित् स्वजीवनस्यान्तिममध्यायं समाप्तिं नयति । भारतीयाः पुनर्जन्मन्यास्थावन्तः सन्त: एव संस्कारमिमं सम्पादयन्ति। संस्कारेणानेन जीवः सद्गतिं प्राप्नोतीत्ययमेवास्ति विश्वासः। बौधायनः पितृमेधसूत्रे कथयति-"जातसंस्कारेणेमं लोकमभिजयति मृत्संस्कारेणामुं लोकमिति"। अन्त्येष्टिक्रियायां प्रयुक्ता ऋचा: ऋग्वेदेऽथर्ववेदे चोपलब्धा भवन्ति। विधानमस्य संस्कारस्य कृष्णयजुर्वेदस्य तैत्तिरीयारण्यकस्य षष्ठेऽध्याये प्राप्यते। कतिपयेषु च परवर्तिगृह्यसूत्रेष्वन्त्येष्टिसस्कारोऽयं सविस्तरमुपवर्णितः । मनुना (२।१६) याज्ञवल्क्येन च (१।१०) संस्कारोऽयं चर्चितः। यथा –

**निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः।**

**तस्य शास्त्रेऽधिकारेऽस्मिन् ज्ञेयो नान्यस्य कस्यचित्।।२।१६।।**

अन्त्येष्टिसंस्कारस्य सम्पादनाय विधानानि पुराणेष्वेव सविशदं दृश्यन्ते।

## 4.3 धर्मशास्त्रं राष्ट्रोन्नतिश्च

धर्मशास्त्रस्य अनुपालनेन राष्ट्रोन्नतिः निश्चयेन भवति। राष्ट्रोन्नतिं बिना राष्ट्रस्य विकासः सम्यग्रूपेण न भवति। अतः राष्ट्रोन्नत्यर्थं धर्मशास्त्रानुपालनं भवेदिति। ऋग्वेदानुसारं धर्मस्य स्थितिः सर्वदा एव आसीत्। तस्मादेव समग्रं जगदुत्पन्नम्। कथितञ्चापि वर्तते ऋग्वेदे-

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ऋग्वेदः 10.90.16

महर्षिजैमिनिना धर्मस्य परिभाषा दत्ताऽस्ति – "चोदनालक्षणोऽर्थो धर्मः" मीमासासूत्रम्, १.१.२ | वैदिकविधिना (चोदना) निर्दिष्टानि निह्वेयानि प्रदातुं यः अर्थः स धर्मः इत्यर्थः। कणादमुनिमतेन "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" इति। तदाम्नायस्य प्रामाण्यम्। वैशेषिकसूत्रम् १.१.२-३, इति धर्मस्य परिभाषा अस्ति। चतुर्विधपुरुषार्थेषु धर्मस्य प्रधानता सर्वविदितमस्ति। तदनुसारेण धर्मस्य सम्यक्तया

परिपालनेन मोक्षप्राप्तिर्भवति। कुमारिलभट्टेन श्लोकवार्तिकग्रन्थे (२/१९५-१९७) धर्मविषयकविभिन्नसम्प्रदायाणां विचाराः प्रदर्शिता: सन्ति -

१.साङ्ख्यमते अन्तःकरणस्य विशेषः कर्मप्रवृत्तिः धर्म उच्यते।

२.बौद्धमते सदसत्कर्माणां फलस्वरूपात्मिकाः मानसवासनाः धर्म इति।

३.जैनमते देहारम्भकर्ता पुण्यविशेषेण उत्पन्नाः पुद्गलरूपपरमाणवः धर्म इति आचक्षते।

४.न्यायमते विहितकर्मोत्पन्नं आत्माविशेषगुणं अदृष्टम् अर्थात् धर्म इति।

५. केचन मीमासंका अपूर्वमेव धर्मं मन्यन्ते।

मनुस्मृत्यानुसारं धर्मस्य लक्षणमस्ति-

श्रुतिः स्मृतिः सदाचार: स्वस्य प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षात् धर्मस्य लक्षणम् ॥ मनुस्मृतिः २.१२

श्रीमद्भगवद्गीतायामपि धर्मविषये इदं कथितं वर्तते-

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्नुवष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ श्रीमद्भगवद्गीता ३.३५

सम्यग्रूपेण आचरणे आनीतेन धर्मेण गुणरहितं स्वधर्मम् उत्तमं वर्तते। स्वधर्मे मरणमेव श्रेयस्करं वर्तते तथा परधर्मो भयावहः वर्तते। क्षत्रियस्य हेतवे धर्मयुक्तः युद्ध एव सर्वश्रेष्ठः कर्त्तव्योऽस्ति-

धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ।

अमरकोशे वेदस्य एव अपरनाम धर्म विद्यते – श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विविधिः अमरकोश, शब्दादिवर्ग श्लोक संख्या ३
जानकीहरणे निगदितं यत् धर्मार्थकामाणां सेवा सममेव कर्तव्या। ये मनुष्याः केवलं एकमेव सेवते स जघन्योऽस्ति-

धर्मार्थकामाः सममेव सेव्याः।
यस्त्वेकसेव्यः स नरो जघन्यः॥

भारतीयसंस्कृतसाहित्यं जगतः कृते सदा प्रेरणादायी अस्ति। न केवलं भौतिकप्रगतेः स्रोतः अभवत् अपितु आध्यात्मिकप्रगतेः चिह्नम् अपि अभवत्। तस्य शाखानां उपशाखानां च प्रत्येकं पत्रे सः विशालः ज्ञानस्य भण्डारः अस्ति, यःवैश्विकपरिदृश्ये चतुर्विधं पुरुषार्थं (धर्मः, अर्थः, कामः, मोक्षः च) प्रचारयति। एततादृशं ज्ञानशरीरं जगतः विकासाय श्रेष्ठमिव दृश्यते। अस्याः संस्कृतेः निर्माणे जातय: समुदाया: च प्रमुखां भूमिकां निर्वहन्ति, परन्तु साम्प्रदायिकतायाः दुरुपयोगेन कस्यापि संस्कृतिः कष्टं जनयति। अस्य कारणात्संस्कृतेः अखण्डता आहता भवति तथा च कदाचित्स्वसंस्कृतेः रक्षणार्थं साम्प्रदायिकता अन्यसांस्कृतिकतत्त्वानां पूर्णतया विनाशं करोति, यत्विश्वभ्रातृत्वस्य अथवा वैश्विकविस्तारस्य बाधिक भवति। किञ्चित्कालं यावत्जनाः समुदायस्य कृते समागच्छन्ति, परन्तु यदि तेषां नेता असामाजिकः भवति तर्हि समाजः केवलं तस्मिन्दिशि गमिष्यति यस्मिन्दिशि सः प्रसारयति तथा च सामाजिकतायाः संस्कृतेश्च च क्षयः भवति। सम्प्रदायाः सत्यं प्राप्तुं मार्गाः सन्ति, परन्तु कस्यापि एकस्य सम्प्रदायस्य वा केवलं स्वस्य सम्प्रदायस्य वा एकमात्रं सत्यं स्वीकृत्य अन्येषां सम्प्रदायानां हीनतां मन्यमानं वास्तविकरूपेण साम्प्रदायिकता एव। एषा भावना एव न केवलं विवादस्य कारणं अपितु अन्यविवेकप्रवृत्तयः अपि जनयति। साम्प्रदायिकता संकीर्णचित्तस्य उत्पादः अस्ति। संकीर्णचित्ते एव जातिवादः, क्षेत्रवादः, वर्गभेदः इत्यादयः दुष्टभावाः उत्पद्यन्ते। भारतीयसंस्कृतौ अनेकेषां धर्मसम्प्रदायानां स्थापनायाः परस्परसौहार्दस्य च व्यवस्था वर्तते। साम्प्रदायिकसौहार्दार्थं महाभारते उक्तम्--

धर्म: यो बाधते धर्मं स न धर्म: स तु कुधर्मः।
अविरोधी तु यो धर्म: सधर्म: सत्यविक्रम: ॥

यदिकश्चित्धर्मानुयायी अन्यं धर्महीनं मन्यते तर्हि तस्यैव स्वधर्मस्य ज्ञानं नास्ति यतो हि अन्यधर्मं प्रति द्वेषः कस्मिन् अपि धर्मे न स्वीकृतः इति अस्माभिःअवगन्तव्यम्।

## 4.4 धर्मशास्त्रस्य अनुशासनम्

धर्मशास्त्रम् अनुशासनस्य शिक्षां ददाति। अनुशासनस्य अनुपालनेन व्यक्तिः समाजे प्रतिष्ठामाप्नोति। धर्मशास्त्रस्य अनुशासनम् अस्ति भारतीय धर्मशास्त्रैः विहितं नियमाचरणव्यवस्था, या जीवनस्य विविधपक्षं नियन्त्रयति। अयम् अनुशासनः धार्मिकसामाजिकव्यक्तिगतव्यवहारस्य मार्गदर्शकसिद्धान्तान् प्रददाति। धर्मशास्त्रीय-अनुशासनस्य उद्देश्यं समाजे व्यवस्थां, न्यायं, नैतिकतां च निर्वाहयितुम् अस्ति।शास्त्रेषु जीवनस्य नैतिकधार्मिकपक्षौ यथा सत्यं कथनं, अहिंसा, दया, न्यायः च व्याख्यायन्ते। नैतिक-आचरणस्य चरित्रनिर्माणस्य च उपरि बलं दत्तं भवति, येन समाजे सुसंघटितं जीवनम् अनुसर्तुं शक्यते।

समाजे प्रत्येकं व्यक्तेः भूमिका कर्तव्यं च स्पष्टीकृतम् अस्ति। अस्मिन् परिवारं, जातिं, समाजं च प्रति कर्तव्यनिर्वाहः अन्तर्भवति। धर्मकर्मणां, पूजाविधीनां, यज्ञानां च नियमाः धर्मशास्त्रेषु वर्णिताः सन्ति।धर्मक्रियाः सम्यक् नियमानुसारं क्रियन्ते इति सुनिश्चितं करोति।सम्पत्तिधर्मस्य उत्तराधिकारस्य च नियमाः धर्मशास्त्रेषु व्याख्याताः सन्ति।उत्तराधिकारस्य, स्त्रीधनस्य, कुलसम्पत्त्याः च वितरणविधयः निर्दिष्टाः सन्ति ।

विवादनिराकरणस्य न्यायस्य च नियमाः प्रक्रियाश्च धर्मशास्त्रेषु वर्णिताः सन्ति। संवैधानिक अनुशासनस्य अनुसरणं न्यायस्य सिद्धान्तानां अनुसरणं च आवश्यकम्।आध्यात्मिक-अभ्यासः-ध्यानं-मोक्षप्राप्तिः विषये मार्गदर्शनं प्रदत्तं भवति।व्यक्तिगत-आध्यात्मिक-विकासाय निर्देशाः समाधानाः च प्रदत्ताः सन्ति।जीवने सन्तुलनं, सामञ्जस्यं च स्थापयितुं शास्त्रेषु बलं दत्तम् अस्ति।

धर्मशास्त्रैः स्थापिताः नियमाः समाजे स्थिरतां व्यवस्थां च स्थापयितुं साहाय्यं कुर्वन्ति।सामाजिकसम्बन्धान्, पारिवारिककर्तव्यं, सामाजिकव्यवहारं च सुव्यस्थापयति। धर्मशास्त्रीय अनुशासनं व्यक्तिगतनैतिकतां चरित्रनिर्माणं आत्मविकासं च प्रोत्साहयति।मनुष्यस्य आत्मानं व्यक्तित्वं च शुद्धीकर्तुं प्रेरयति। विधिनियमाः विवादनिराकरणप्रक्रिया च धर्मशास्त्रेषु व्याख्याता: यस्मात् निष्पक्षता च सुनिश्चिता भवति।

धर्मशास्त्रीयं अनुशासनं भारतीयसांस्कृतिकधर्मपरम्पराणां महत्त्वपूर्णः भागः अस्ति, जीवनस्य सर्वेषु पक्षेषु दिशां मार्गदर्शनं च करोति। सामाजिकं व्यक्तिगतं च जीवनं व्यवस्थितं न्याय्यं च कर्तुं आवश्यकम्। धार्मिकसंस्कारः, पूजाविधयः, आध्यात्मिक-अभ्यासस्य नियमाः च व्यक्तिं धार्मिक-आध्यात्मिकजीवने मार्गदर्शनं कुर्वन्ति। जीवनस्य उच्चतमं लक्ष्यं प्राप्तुं साहाय्यं करोति।

## 4.5 सम्पत्तिविभाजनम्

धर्मशास्त्रे सम्पत्तिविभाजनं प्रमुखतया वर्णितं दृश्यते। तत्र सम्पत्तेः विभाजनं अवश्यमेव करणीयम् इति मनीषीणां मतम्।प्राचीनभारतीयग्रन्थेषु सम्पत्तिविभाजनसम्बद्धाः विस्तृताः नियमाः नीतयः च प्रदत्ताः सन्ति। एतेषां नियमानाम् उद्देश्यं पारिवारिकसम्पत्त्याः न्यायपूर्णं व्यवस्थितं च वितरणं सुनिश्चितं कर्तुं आसीत्। कुलसम्पत्त्याः विभाजनस्य नियमाः पद्धतयः च प्राचीनकालात् भारतीयसमाजस्य महत्त्वपूर्णाः विषया: सन्ति, धर्मशास्त्रेषु स्मृतिषु च विशेषं स्थानं दत्तम् अस्ति। दायभागव्यवस्थायाम् उत्तराधिकारस्य आधारः रक्तसम्बन्धः एव, न तु सहव्यापारः सहस्वामित्वं वा। यदा कुटुम्बस्य प्रमुखः मृतः भवति तदा तस्य सम्पत्तिः तस्य पुत्र-कन्या-विधवा-पत्नी, मातापितृणां च मध्ये विभज्यते। मुख्यतया धर्मशास्त्रस्मृतिषु धर्मग्रन्थेषु ते उल्लिखितम् अस्ति। पुत्रेषु सम्पत्तिविभागस्य नियमाः मनुस्मृतौ दत्ताः। ज्येष्ठं पुत्रं प्राधान्यं दत्त्वा 'ज्येष्ठ'इति उच्यते स्म। सः 'पितृधनात् अतिरिक्तं भागं प्राप्नोति स्म। अन्ये पुत्राः समानभागं प्राप्नुवन्ति स्म, परन्तुज्येष्ठपुत्रा विशेषाधिकाराः उत्तरदायित्वं च प्राप्तम्। याज्ञवल्क्यस्मृतौ पुत्रेषु सम्पत्तिविभागस्य अपि नियमाः सन्ति। अत्र सर्वेभ्यः पुत्रेभ्यः समभागः दास्यते इति उच्यते। विधवा पत्न्याः अपि सम्पत्तिषु अधिकारः दत्तः, तस्याः भागः सुरक्षितः एव तिष्ठति। भ्रातृषु सम्पत्तिविभागस्य सिद्धान्ताः नारदस्मृतौ विस्तरेण वर्णिताः सन्ति। पितुः सम्पत्तिः सर्वेषु पुत्रेषु समानरूपेण विभक्तव्या इति। अस्मिन्स्मृतौ अपि उक्तं यत्मातुः सम्पत्तिषु अपि अधिकारः भवेत्। सम्पत्तिविभागस्य कानिचित् उदाहरणानि महाभारते

अपि प्राप्यन्ते। पाण्डवकौरवयोः राज्यविभागः अस्य प्रमुखम् उदाहरणम् अस्ति, यस्मिन् न्यायधर्माधारितविभागस्य चर्चा भवति। कौटिल्यस्य अर्थशास्त्रे सम्पत्तिविभागस्य नियमाः व्यावहारिकदृष्ट्या दत्ताः सन्ति। सम्पत्तिविभाजनसम्बद्धनीतयः अपि च करराजस्वसम्बद्धनीतयः अपि अत्र उक्ताः सन्ति। सम्पत्तिविभागस्य सिद्धान्ताः अपि व्याससमृतौ दत्ताः सन्ति। अत्र सर्वेषां पुत्राणां समभागः, ज्येष्ठपुत्रस्य अतिरिक्तदायित्वं दीयते इति उच्यते। एतान् ग्रन्थान् अतिरिच्य सम्पत्तिविभागस्य नियमाः नीतयः च विभिन्नेषु पुराणेषु धर्मशास्त्रेषु च प्राप्यन्ते। एतेषां नियमानाम् उद्देश्यं परिवारेषु शान्तिः, सौहार्दं च स्थापयितुं आसीत्। सम्पत्तिविभाजनकाले न्यायस्य धर्मस्य च अनुसरणं भवति स्म, येन कोऽपि पक्षः अन्यायस्य भागी न भवेदिति। उत्तराधिकारे विधवापत्नी सम्पत्तौ समानाधिकारं प्राप्नोति। यदि पुत्रः नास्ति तर्हि विधवा सम्पूर्णसम्पत्त्याः अधिकारं प्राप्तुं शक्नोति। दायभागे कन्याभ्यः अपि सम्पत्तिभागः दीयते, विशेषतः यदा पितुः मृतः भवति, तेषां विवाहः न भवति। विवाहितानां कन्यानाम् अपि किञ्चित्भागस्य अधिकारः भवितुम् अर्हति। मातापितरौ अपि सम्पत्तौ भागं प्राप्नुतः, विशेषतः यदि पुत्राः जीविताः न सन्ति। यदि पुत्रः नास्ति तर्हि सम्पत्तिः भ्रातृषु विभज्यते। दायभागस्य मते सम्पत्तिः भ्रातृषु समानरूपेण विभज्यते। उत्तराधिकारसिद्धान्ते एकः प्रावधानः अस्ति। यत्भ्रातृभगिनीनां (वास्तविकभ्रातृभगिनीनां) वैमातुराणां भ्रातृभगिनीनां च समानाधिकारः भवति। शारीरिकरूपेण मानसिकरूपेण वा दुर्बलाः सदस्याः अपि समानाधिकारं प्राप्नुयुः इति अपि उक्तम्। यदि बालकः नास्ति तर्हि पुत्रस्य उत्तराधिकाररूपेण दत्तकपुत्रस्य परम्परा अपि वैधःअस्ति, येन कुलसम्पत्त्याः उत्तराधिकारी सुनिश्चितः भवितुम् अर्हति।

दायभागव्यवस्था भारतीयसमाजस्य सम्पत्तिविभागजनं न्यायपूर्णं व्यवस्थितं च कृतवती । एषा पद्धतिः न केवलं परिवारस्य सदस्यानाम् अधिकाराणां रक्षणं करोति अपितु समाजे न्यायस्य, समानतायाः च भावनां प्रोत्साहयति। सम्प्रति दायभाग -मिताक्षर-व्यवस्थयोः सिद्धान्ताः भारतीय-उत्तराधिकार-अधिनियम-१९५६-मध्ये समावेशिताः, येन पारिवारिक-सम्पत्त्याः विभाजनं, उत्तराधिकारस्य प्रबन्धनं च अधिकं सुव्यवस्थितं कृतम् अस्ति। दायभागस्य एषा व्यवस्था बङ्गदेशे, बिहारे, उड़ीसादेशे, असमस्य केषुचित्भागेषु च विशेषतया प्रचलिता अस्ति, तस्याः उद्देश्यं पारिवारिकं सामाजिकं च न्यायं सुनिश्चितं कर्तुं वर्तते।

स्त्रीधनं एका भारतीया पारम्परिकी न्यायिकी सांस्कृतिकी च अवधारणा अस्ति या महिलायाः वैवाहिकजीवने प्राप्तं सम्पत्तिं धनं च निर्दिशति। एषा सम्पत्तिः स्त्रियः व्यक्तिगताधिकारस्य अन्तर्गतं भवति, यया तासां जीवनं सुरक्षितं मन्यते। मनुस्मृतिः, याज्ञवल्क्यस्मृतिः इत्यादिषु भारतीयशास्त्रेषु स्त्रीधनाधिकारस्य विस्तरेण वर्णनं कृतम् अस्ति। विवाहकाले विवाहे वा स्त्रियः मातृ पितृभ्यः, बन्धुभ्यः, पतिभ्यः वा यत् धनं, सम्पत्तिं च प्राप्नुवन्ति तत् एव स्त्रीधनं । अस्मिन् उपहारः, आभूषणं द्रव्यञ्च भवितुं शक्नोति। भर्त्रा भार्यायै दत्तं धनं वा सम्पत्तिं वा अपि स्त्रीधनस्य अधीनम् आगच्छति। परिवारेण, मित्रैः, बन्धुभिः चैकस्मिन् अपि विशेषे अवसरे, यथा जन्मदिने वा अन्येषु उत्सवेषु, दत्ताः उपहाराः अपि स्त्रीधनस्य अधीनाः भवन्ति। स्त्रियः व्यक्तिगतम् अर्जनं वा उत्तराधिकारं वा 'स्त्रीधनं' इत्यत्र अपि समाविष्टं भवति। अत्र स्त्रीणां पूर्णाधिकारः भवति। एषा सम्पत्तिः तस्याः व्यक्तिगता भवति, सा स्वतन्त्रतया तस्य उपयोगं, प्रबन्धनं, वितरणं च कर्तुं शक्नोति। स्त्रीधनस्य भारतीयन्यायव्यवस्थायाः अन्तर्गतं रक्षणं वर्तते। विवाहसमये स्त्रियः सम्पत्ति-अधिकारः स्पष्टः भवति, विवाहविच्छेद प्रसङ्गे अपि तस्य रक्षणस्य प्रावधानम् अस्ति। विच्छेदकाले भार्यायै धनप्रतिदानस्य दायित्वं भर्तुः उपरि एव भवति। प्राचीनग्रन्थेषु स्त्रीणां रक्षणे अधिकारे च बलं दत्तम् अस्ति। एवं नार्यः सम्मानस्य, स्वामित्वस्य रक्षणस्य च प्रतीकं भवन्ति। विवाहकाले प्राप्तस्य स्त्रीधनस्य रक्षणाय, स्त्रीणां सम्पत्ति-अधिकारस्य रक्षणाय च विशेषानि न्यायिक-विधानानि सन्ति। स्त्रीधनं स्त्रीप्रबन्धितं भवति, सा च स्वस्य इच्छानुसारम् आवश्यकतानुसारं च तस्य उपयोगं कर्तुं शक्नोति। तस्य वितरणस्य निर्णयः पूर्णतया स्त्रियः हस्ते एव भवति। सामाजिकदृष्ट्या अपि स्त्रीधनं महत्त्वपूर्णं मन्यते। एतेन महिलानाम् आर्थिकस्वतन्त्रतां तासां सामाजिकस्थितिश्च सुदृढा भवति। स्त्रीधनं भारतीयपरम्परागतन्यायिकप्रक्रियादृष्ट्या महिलानां स्वामित्वम् अधिकारं च स्वीकरोति। एषा सम्पत्तिः तासां व्यक्तिगतनियन्त्रणे अस्ति, तस्यरक्षणार्थं न्यायिकप्रावधानाः स्थापिताः सन्ति। समाजे महिलानां स्थितिं सम्मानं च सुदृढं कर्तुं स्त्रीधनस्य महत्त्वपूर्णा भूमिका अस्ति।

प्राचीनभारतीयग्रन्थेषु दत्ताः एते नियमाः नीतयः च अद्यापि भारतीयसमाजस्य पारिवारिकसम्पत्तिविभाजनस्य सन्दर्भे महत्त्वपूर्णाः इति मन्यन्ते। यद्यपि संवैधानिकप्रावधानैः एतेषु पारम्परिकनियमेषु बहूनि संशोधनानि कृतानि तथापि तेषां मूलभूतसिद्धान्ताः अद्यापि प्रासङ्गिकाः सन्ति।

## 4.6 अभ्यासार्थ प्रश्न

### 4.6.1 वस्तुनिष्ठ प्रश्न

1. संस्करोतीति .............?
   (क) विकारः (ख) लकारः (ग) संस्कारः (घ) एतेषु नास्ति
2. धर्मशास्त्रम् निन्मलिखितवेदाङ्गे आगच्छति -
   (क) शिक्षायां (ख) व्याकरणे (ग) कल्पसूत्रे (घ) एतेषु नास्ति
3. दायभागस्योपरि टीका वर्तते -
   (क) मिताक्षरा (ख) सङ्क्षेपः (ग) उपन्यासः (घ) एतेषु नास्ति
4. प्रायः संस्काराणां प्रकारः विद्यते -
   (क) द्वादशसंस्कारा (ख) षोडशसंस्काराः (ग) त्रयोदशसंस्काराः (घ) एतेषु नास्ति
5. सम्पत्तिविभाजनप्रकारस्य वर्णनमस्ति – धर्मशास्त्रस्य वर्णनं कुरुत।
   (क) दायभागे (ख) राजावर्णने (ग) सप्ताङ्गवर्णने (घ) एतेषु नास्ति

### 4.6.2 लघु-उत्तरीय प्रश्न

1. संस्काराणां परिचयो देयः ।
2. धर्मशास्त्रस्य वर्णनं कुरुत।
3. सम्पत्तिविभाजनस्य आवश्यकता वर्णयत।
4. अनुशासनस्य का आवश्यकता इत्यस्य व्याख्या कार्या।
5. संस्कारः कतिविधः? वर्णनं कुरुत।

### 4.6.3 दीर्घ-उत्तरीय प्रश्न

1. धर्मशास्त्रस्य अनुशासने किं महत्त्वं वर्तते इति प्रतिपादयत।
2. धर्मशास्त्रीयसम्पत्तिविभाजनस्य सविस्तरं वर्णनं कुरुत
3. षोडशसंस्काराणां सविस्तरं वर्णनं कुरुत।
4. धर्मशास्त्रमाध्यमेन राष्ट्रोन्नतिः कथं भवेदिति व्याख्या कार्या।

5. वेदाङ्गेषु धर्मशास्त्रस्य किं स्थानम् ? इति प्रतिपादयत।

# इकाई 5 –सामाजिक निबन्ध

## इकाई की रूपरेखा


5.0 उद्देश्य
5.1 प्रस्तावना
5.2 श्रेयसि केन तृप्यते
5.3 भावि भद्रं हि जीवितम्
5.4 क्रिया हि वस्तूपहिता प्रसीदति
5.5 उत्सवप्रियाः खलु मनुष्याः
5.6 अभ्यासार्थ प्रश्न
5.6.1 वस्तुनिष्ठ प्रश्न
5.6.2 लघु-उत्तरीय प्रश्न
5.6.3 दीर्घ-उत्तरीय प्रश्न


## 5.0 उद्देश्य

इस इकाई के अध्ययन के पश्चात् शिक्षार्थी निम्नलिखित बिन्दुओं से सम्बन्धित विषयों का अवबोध कर सकेंगे-

- संस्कृत भाषा में उपनिबद्ध प्राचीन सामाजिकता का सामान्य परिचय प्राप्त कर सकेंगे।
- कल्याणार्थक विषयों को जान सकेंगे।
- सामाजिक उन्नति के विषय को जान सकेंगे।
- उत्सवों का परिचय प्राप्त कर सकेंगे।
- समाज के अन्तर्गत वर्णित कल्याणार्थक तत्त्वों का परिचय प्राप्त कर सकेंगे।

## 5.1 प्रस्तावना

पाँचवीं ईकाई के अन्तर्गत संस्कृत भाषा में उपनिबद्ध समाजशास्त्रीय निबन्धों में हम सामाजिक कल्याण, सत्यनिष्ठा, उत्सवों के महत्त्व का अभिज्ञान कर सकेंगे। सनातन संस्कृति में व्रत, पर्व एवं उपवास के महत्त्व और उनमें निहित सन्देशों को इन निबन्धों के माध्यम से हम अवबोध कर सकेंगे। साथ ही समाज में निहित कल्याणपरक भावना सम्बन्धी विषयों का भी अवबोध कर सकेंगे।

## 5.2श्रेयसि केन तृप्यते

प्राचीनवैदिककाले अनेकप्रकाराणि कल्याणकार्याणि क्रियन्ते स्म, यानि समाजस्य, व्यक्तेः, पर्यावरणस्य च कृते लाभप्रदानि आसन् । एतेषां कृतीनाम् उद्देश्यं सामाजिकीं, आध्यात्मिकीं, भौतिकीं च प्रगतिः आसीत् । वैदिककल्याणकार्याणि प्रमुखानि कानिचन निम्नलिखितानि सन्ति- **1. यज्ञ-हवनम्-** यज्ञ-हवनयोः आयोजनं वैदिककालस्य प्रमुखं धार्मिकं कल्याणकारि च कार्यम् आसीत् । एतत् न केवलं आध्यात्मिकोन्नत्यै एव कृतम्, अपितु पर्यावरणस्य शुद्ध्यर्थं कृषि-उत्पादकतावर्धनार्थं च महत्त्वपूर्णं मन्यते स्म ।

**2. दानम् ब्राह्मणेभ्य :-**विद्वद्भ्य: आवश्यकतानुसारं दानं दातुं महत्त्वपूर्णा वैदिकपरम्परा आसीत्। येभ्य: अन्नं, वस्त्रं, धनं, गाव: च प्रदत्ता:। यज्ञस्य अवसरे राजानः धनिनः च महद् धनं प्रददति स्म ।

**3. अध्ययनम् अध्यापनं च-** वेदशास्त्राध्ययनं शिक्षणं च प्रमुखं कल्याणकार्यम् आसीत्। गुरुकुलव्यवस्थायाः माध्यमेन बालकानां निःशुल्कशिक्षा प्रदत्ता, यस्यां धार्मिकं, नैतिकं, व्यावहारिकं च ज्ञानं समावेशितम् आसीत् ।

**4. आयुर्वेदिक चिकित्सा-** प्राचीनवैदिकसमाजे आयुर्वेदिकचिकित्साशास्त्रं लोकप्रियम् आसीत् । जनानां स्वास्थ्यस्य परिचर्यायै औषधीयवनस्पतयः, प्राकृतिकाः उपायाः च उपयुज्यन्ते स्म ।

**5.समाजकल्याणम्-** समाजे सामञ्जस्यं न्यायं च स्थापयितुं धार्मिकनैतिकशिक्षाणां प्रचारः कृतः। राजानः प्रशासनिकाधिकारिणः च धर्मस्य, न्यायस्य च पालनाय बद्धपरिकरा: भवन्ति स्म ।

**6. जलसंरक्षणं कृषि: च-** जलस्रोतसां रक्षणं सिञ्चनपरिहार: च प्रवर्धित:। कृषिसमृद्ध्यर्थं नदीतडागजलाशयनां च संरक्षणं महत्त्वपूर्णं मन्यते स्म ।

**7. ग्रामीण-नगरीय-विकास: -** ग्रामीण-नगरीयक्षेत्राणां विकासे मार्गाणां कूपानां सार्वजनिकसुविधानां च निर्माणं समावेशितम् आसीत्। **8. धार्मिक-सांस्कृतिक-उत्सव:-** समाजे एकता-सद्भावना-वर्धनार्थं धार्मिक-सांस्कृतिक-उत्सवानां आयोजनं कृतम् । एतेषु

गीतनृत्यनाट्यप्रदर्शनानि आसन् । एतानि सर्वाणि कार्याणि प्राचीनवैदिकसमाजस्य कल्याणस्य प्रगतेः च महत्त्वपूर्णसाधनानि मन्यन्ते स्म, येषाम् उद्देश्यं सामाजिकं, धार्मिकं भौतिकं च संतुलनं स्थापयितुम् आसीत् सांस्कृतिकदायादं रक्षितुं च।

**9. आपदाप्रबन्धनम् -:** प्राकृतिकआपदासमये एतानि सर्वाणि कार्याणि समाजस्य हिताय प्रगतये च कृते महत्त्वपूर्णानि सन्ति तथा च एतानि कृत्वा मनुष्यः मानसिकीम् आध्यात्मिकीं च सन्तुष्टिं प्राप्नोति। जलसंरक्षणाय प्रदूषणस्य न्यूनीकरणाय च प्रयत्नाः कृताः।

**10. समाजसेवाः-** अनाथालयान् आश्रयस्थानानि च स्थापयित्वा तेषां संचालनं च कृतम्। आध्यात्मिक-उन्नतिः धार्मिकाध्यात्मिकशिक्षायाः प्रसारणाय, ध्यानं योगं च प्रवर्तयितुम्।

**11.समानतान्यायश्चः-** समाजे समानतायै न्यायकरणं, महिलानां, बालकानां, दलितानां च अधिकाराणां रक्षणम्।

**12. स्वच्छता-अभियानम्-** स्वच्छतायाः निर्वाहकरणम्, स्वच्छभारतअभियानादिकार्यक्रमेषु भ्रागग्रहणमिति।

**13. सांस्कृतिकसंरक्षणम्-** लोककला-संगीतं-सांस्कृतिक दायादनुसारं च संरक्षणं प्रचारं च। कल्याणकारीणि कार्याणि तानि कार्याणि सन्ति ये समाजस्य, व्यक्तेः पर्यावरणस्य च कृते लाभप्रदाः प्रगतिशीलाः च सन्ति। नैतिक-आध्यात्मिक-सामाजिक-भौतिक-दृष्ट्या एतानि कृतयः लाभप्रदाः इति मन्यन्ते । कानिचन उदाहरणानि यथा – **१ दानम्-** आवश्यकतानुसारं भोजन- वस्त्र- शिक्षा- चिकित्सासहायतानां च दानम्। **२.शिक्षा-** ज्ञानस्य प्रसारं, शैक्षणिकसंस्थानां स्थापनं संचालनं च कर्तुम्। **३.स्वास्थ्यसेवा-** निःशुल्कचिकित्साशिबिराणाम् आयोजनं, रक्तदानं, स्वास्थ्यजागरुकतायाः प्रसारणं च। **४.पर्यावरणसंरक्षणम्-**

**जगत्यपर्याप्तसहस्रभानुना न यन्नियन्तुं समभावि भानुना ।**

**प्रसह्य तेजोभिरसंख्यतां गतैरदस्त्वया नुन्नमनुत्तमं तमः ॥**

**कृतः प्रजाक्षेमकृता प्रजासृजा सुपात्रनिक्षेपनिराकुलात्मना ।**

**सदोपयोगेऽपि गुरुस्त्वमक्षयो निधिः श्रुतीनां धनसंपदामिव ॥**

**विलोकनेनैव तवामुना मुने कृतः कृतार्थोऽसि निबर्हितांहसा ।**

**तथापि शुश्रूषुरहं गरीयसीर्गिरोऽथवा श्रेयसि केन तृप्यते ॥**

## 5.3भावि भद्रं हि जीवितम्

"भाविभद्रं हि जीवितम्" इति संस्कृतभाषायां प्रसिद्धः श्लोकः अस्ति। यस्य अर्थः भवति "भविष्यत्काले शुभजीवनस्य कामना" इति। एतत्वाक्यम् आदर्शजीवनस्य, सुखस्य, समृद्धेः, उज्ज्वलभविष्यस्य च कामनां प्रकटयति । अस्माकं भविष्यं शुभं भूयात् अथवा अस्माकं भविष्यं धन्यं भूयादिति अस्मिन्वाक्ये मङ्गलकामना अस्ति। एतद् वाक्यम् आशायाः भावं प्रकटयति यत् अग्रे किमपि भविष्यति तच्छुभमेव भविष्यति। महाभारते कथितं –

**आशा बलवती राजन् शल्यो जेष्यति पाण्डवान् ॥**

अस्याः सूक्तेः अर्थावबोधाय निम्नलिखितानि तथ्यानि अत्र प्रदत्तानि सन्ति-

**1.भविष्यस्य शुभकामना** - अयं श्लोकः सामान्यतः शुभकामनाशीर्वादप्रसङ्गे प्रयुक्तः भवति । तस्य उद्देश्यं जनस्य भविष्यजीवने शुभं सुखदं च अनुभवं कामयितुं भवति। एतादृशाः प्रकाराः शुभकामनाः आशीर्वादाः च धार्मिकानुष्ठानेषु सांस्कृतिकसमारोहेषु च प्रदत्ताःभवन्ति।

**2.धार्मिकं महत्त्वम्** - संस्कृतसाहित्ये प्रायः एतादृशाः धार्मिक अभिवादनानि आशीर्वचांसि च दृश्यन्ते । एतज्जनस्य सकारात्मकसुखदभविष्यस्य इच्छां प्रकटयति । एषः श्लोकः धार्मिककर्मसु यज्ञेषु च प्रार्थनारूपेण प्रयुज्यते। धार्मिकरूपेण यत्कार्यं भवति तस्मिन् कार्ये अस्य वाक्यस्य प्रयोगः भवति। अनेन धार्मिकवाक्येन वयं भाविजीवनं प्रति शुभकामनां प्रकटयामः। अयं श्लोकः प्रार्थनारूपेण विशेषतया धार्मिकानुष्ठानेषु यज्ञेषु च प्रयुक्तः।

3.सांस्कृतिकं महत्त्वम् – भारतीया संस्कृतिः सर्वप्राणीनां कृते मङ्गलकामनां करोति। सर्वे सुखपूर्वकं जीवन्तु इति भावना मनसि निधाय भारतीयाः स्वजीवनं यापयन्ति। तेषाम् उद्घोषो वर्तते यत् –

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।**
**सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग् भवेत् ॥**

इयं कामना अस्यां सूक्तौ अपि वर्तते। इदं अस्याः सूक्तेः सांस्कृतिकं महत्त्वं विद्यते। भारते विविधाः सांस्कृतिकसंस्काराः समृद्धभविष्यस्य सुनिश्चितं कर्तुं उद्दिश्यन्ते । यथा- अनुष्ठानानि, सौभाग्यस्य सफलतायाः च प्रार्थनाः सन्ति, येषु स्वभविष्यस्य स्वरूपनिर्माणार्थं सकारात्मकाभिप्रायस्य शक्तिमाध्यमेन जीवनस्य दुःखस्य निवारणं भवति।

**4.सामाजिकं महत्त्वम्** – एतादृशाः मङ्गलकामनाः सामाजिक-अवसरेषु प्रयुज्यते। व्यक्तिगतकार्यक्रमे अपि एतादृशायाः मङ्गकामनायाः प्रयोगो भवति। विवाहावसरेषु, जन्मदिवसावसरेषु अथवा अन्येषु अवसरेषु एतादृशाः आशीर्वचांसि प्रदीयन्ते। अनेन वाक्येन सामाजिकसम्बन्धं भ्रातृत्वञ्च वर्धयति। सर्वे ईश्वरं प्रार्थयन्ति यत् भविष्ये यत् सर्वं शुभमेव भूयादिति। यदा कस्यचिज्जनस्य भविष्याय शुभकामना दीयते तदा एतादृशाः श्लोकाः प्रयुज्यन्ते।

**5.आध्यात्मिकं महत्त्वम्** – भद्रं शुभं सर्वे वाञ्च्छन्ति। सुखस्य कामना आध्यात्मिकभावं जनयति। एतस्मात् कारणात् अयं श्लोकः आध्यात्मिकभावनायाः द्योतकोऽपि वर्तते। शुभकारिसत्यस्य प्राप्त्यर्थं एतादृशी भावना आवश्यकी वर्तते। वैदिकसाहित्ये ज्ञान-ध्यान-साधनादिक्रियासु एतादृशी भावना दृष्टिगोचरा भवति। स्वजीवने आध्यात्मिकप्रगत्यर्थं, मानसिकशान्त्यर्थं, जीवनसन्तुलनार्थं च एतादृशी भावना कामना च मानवजीवने आवश्यकी वर्तते।

**6.दार्शनिकं महत्त्वम्** – दर्शनशास्त्रेऽपि दुःखनिवृत्तिपूर्वकं सुखप्राप्तिः सर्वे कामयन्ते। दुःखस्य निवृत्तिः यदा भवति तदा सुखम् आगच्छति। यदा सर्वेषां प्रतिकूलवेदनीयत्वं गच्छति तदा अनुकूलवेदनीयत्वम् आगच्छति। भूतकाले वर्तमानकाले दुःखमासीत् अस्ति वा तर्हि तस्य दुःखस्य पीडाकारणात् सर्वे भविष्ये भद्रकामनां कुर्वन्ति। इयं सम्भावना अस्याः सूक्तेः दार्शनिकं महत्त्वं प्रतिपादयति। पाश्चात्यदर्शने प्रायः अनिश्चितं, कठिनं च भविष्यं दृश्यते । परन्तु "भावि भद्रं हि जीवितम्" इत्यस्मिन्समाहितः भारतीयदृष्टिकोणः आशावादी ।

**7.साहित्यिकं महत्त्वम्** - एषा भावना विभिन्नेषु भारतीयग्रन्थेषु साहित्येषु च प्रतिध्वन्यते। यथा वेदोपनिषदादिषु प्राचीनग्रन्थेषु उज्ज्वलस्य शुभ भविष्य विचार विषयकाः बहवः सन्दर्भाः सन्ति। एते ग्रन्थाः प्रायः अनुकूलभविष्यस्य निर्माणे धार्मिकजीवनस्य आध्यात्मिकप्रथानां च महत्त्वं बोधयन्ति ।

**8.आधुनिकं महत्त्वम्** - समकालीनभारते एतत्वाक्यम् आशाधैर्यादीनाञ्च मूल्यं प्रददाति इति सांस्कृतिकदृष्टिकोणं प्रतिबिम्बयति। अनेकेषां जनानां कृते एतद् वाक्यम् आत्मविश्वासेन भविष्यं द्रष्टुं स्मारकं भवति । एतद् वाक्यं व्यक्तिगतसार्वत्रिकप्रत्ययानां संश्लेषणमपि प्रतिबिम्बयति ।

**9.व्यावहारिकं महत्त्वम्** - व्यक्तिगतस्तरीया भविष्यवादिनी मानसिकता जीवनं प्रभावयति। एतत्व्यक्तिलक्ष्यं निर्धारयितुं, यत्नपूर्वकं कार्यं कर्तुं च प्रोत्साहयति, यतः तेषां प्रयत्नाः अन्ततः सकारात्मकं परिणामं दास्यन्ति। कष्टेषु सम्मुखं सत्सु सुभविष्यस्य विषये विश्वासः, बलं च दातुं शक्नोति । एषः दृष्टिकोणः विशेषतया प्रतिकूलतां दूरीकर्तुं सकारात्मकदृष्टिकोणं च निर्वाहयितुम् उपयोगी भवितुमर्हति । एतत्वाक्यम् अन्येषां कृते प्रोत्साहनस्य स्रोतः अपि भवितुम् अर्हति । यदा कश्चन व्यक्तिः वर्तमानकालिकं दुर्दिनं दृष्ट्वा दुःखी भवति तदा "भविष्यधन्यम्" इति स्मरणं कृत्वा मनसि भद्राशां प्रकटयति। एषा आशा तस्य दुःखस्य सहने अवलम्बिका भवति।

**10.ऐतिहासिकं महत्त्वम् -** भारतीय-इतिहासस्य अनेक-ऐतिहासिक जना: एतां भावनां मूर्तिमतीं कृतवन्तः । यथा महात्मागान्धी भारतस्य भविष्यस्य विषये आशावादिदृष्टिं स्थापितवान्, तस्य सम्मुखे बहव्यः बाधाः आसन् । तासां बाधानां निवारणाय एतादृशी दृष्टिः आवश्यकी आसीत्। सकारात्मकभविष्यस्य विषये तस्य विश्वासः राष्ट्रं प्रेरयितुं महत्त्वपूर्णं परिवर्तनं च आनेतुं साहाय्यं कृतवान् ।
अनेन प्रकारेण शुभ-अवसरेषु अपि अयं श्लोकः कथ्यते येन शुभ-आशीर्वादः भवति। भद्रं कर्णेभिः शृणुयाम देवाः।"भाविभद्रं हि जीवितम्" भारतीयसंस्कृतौ सकारात्मकतायां सुभविष्यस्य कामनायाश्च प्रतीकरूपेण प्रयुक्तं भवति, यत्सामाजिकं व्यक्तिगतजीवने महत्त्वपूर्णां भूमिकां निर्वहति। ऋग्वेदे भद्रस्य कृते वर्णितमस्ति

**ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः।**

"भाविभद्रं हि जीवितम्" इति भविष्यस्य निहितसद्भावे सामर्थ्ये च गहनं विश्वासं जनयति । व्यक्तिगतविकासे, सांस्कृतिकप्रथासु, ऐतिहासिकउदाहरणेषु वा एषा भावना भविष्यं प्रति सकारात्मकदृष्टिकोणं प्रोत्साहयति, आशीर्वादस्य समृद्धेः च प्रतिज्ञां धारयति तथा च शुभभविष्यं प्रति विश्वासं पोषयति।

## 5.5क्रिया हि वस्तूपहिता प्रसीदति

"क्रिया हि वस्तूपहिता प्रसीदति" इति कालिदासस्य कृतेः रघुवंशस्य तृतीयसर्गस्य महत्त्वपूर्णा उक्तिरस्ति। पूर्णं वाक्यं वर्तते यत् "अवध्यायत्नाश्च बभुवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति" यस्य अर्थः अस्ति यत् कर्म यदि समुचितदिशायां भवति तर्हि सफलं भवति अन्यथा निष्फलं भवति। अतो हि कर्मणः समुचितमार्गैरेव कर्तुः क्रियासिद्धिर्भवति। उचितपात्रेषु संरक्षिता क्रिया फलदायिका भवति। कर्म जीवनस्य अभिन्नः भागः अस्ति। जीवनस्य विभिन्नपक्षेषु क्रियायाः महत्त्वपूर्णा भूमिका अस्ति। व्यक्तित्वविकासाय कर्म अत्यावश्यकम्। व्यक्तेः क्षमताकौशलयोः उन्नयनार्थं नित्यं परिश्रमः अभ्यासः च आवश्यकः भवति। कर्मणा एव व्यक्तिः स्वक्षमतां प्रकाशयित्वा आत्मविकासं कर्तुं शक्नोति। यथा - यदि कश्चन व्यक्तिः कलायां निपुणतां प्राप्तुम् इच्छति तर्हि तया कलायाः नित्यं अभ्यासः, परिश्रमः च करणीयः। अभ्यासेन तस्याः क्रियायाः सिद्धिर्भवति। सामाजिके व्यावसायिकजीवने च अपि क्रियायाः विशेषं स्थानं वर्तते। कार्यस्थले विविधाः परियोजनाः कार्याणि च पूर्णानि कर्तुं कार्यात्मकक्रियाकलापाः आवश्यकाः भवन्ति। व्यक्तेः सफलतायाः व्यावसायिकप्रगतेश्च आधारः तस्य कार्यदक्षतायाः उपरि निर्भरं भवति। आध्यात्मिक-अभ्यासे अपि क्रियायाः महती भूमिका अस्ति । ध्यानं, पूजां, अन्यधर्मं च पूर्णं कर्तुं नियमितं कर्म आवश्यकं भवति । आध्यात्मिकप्रगतेः कृते विविधानि कार्यात्मकानि साधनानि उपयुज्यन्ते यैः सन्तुष्टिः शान्ति च प्राप्येते । यदा कर्म क्रियते तदा तस्य उद्देश्यमस्ति यत् कर्मफलं अस्ति तस्य सिद्धिर्भवेत्। यदा क्रिया वस्तूपहिता स्यात् तर्हि तस्याः सिद्धिः अवश्यमेव भवति। गृहे कृतानि निर्माणकार्याणि गृहस्य स्थितिं संशोधयन्ति, अधिकं आरामदायकं सुरक्षितं च कुर्वन्ति ।
आध्यात्मिकक्रियाद्वारा प्रगतिः आत्मनः शान्तिः च प्राप्येते । ध्यानपूजासाधनादिधर्मैः विषयस्य प्रायश्चित्तं कुर्वन्ति धर्मात्मा। एतादृशेन कर्मणा आत्मानः सन्तुष्टिः, शान्तिः च प्राप्येते ।क्रियापदस्य विषयस्य च सम्बन्धः महत्त्वपूर्णः अस्ति । क्रिया वस्तुनः स्थितिं प्रभावितं करोति, वस्तुनः गुणं परिवर्तयितुं च शक्नोति ।
क्रियायाः सकारात्मकप्रभावेण वस्तुनः उपयोगिता कार्यक्षमता च वर्धते । यदा कर्माणि सम्यक् क्रियन्ते तदा विषयस्य उन्नतिः भवति । यथा - कुशलस्य कारयान्त्रिकस्य क्रियाभिः यानस्य परिष्कारः कार्यक्षमता च वर्धते। यदि कर्म सम्यक् न क्रियते तर्हि वस्तुनः स्थितिः नकारात्मकरूपेण प्रभाविता भवितुम् अर्हति । अशुद्धकर्मणा वस्तुनः क्षतिः भवितुम् अर्हति । यथा, भवनस्य पुनर्निर्माणे गुणवत्तायाः न्यूनता भवति चेत् भवनस्य स्थिरतायां नकारात्मकः प्रभावः भविति। एतत् वचनं व्यावहारिकदृष्ट्या अवगन्तुं केचन उदाहरणानि विचारयितुं शक्यन्ते।
व्यक्तिगतजीवने कस्यचित् कार्यस्य सफलतार्थं तस्य लक्ष्यस्य प्राप्त्यर्थं च कियान् श्रमः क्रियते इत्यस्मिन् निर्भरं भवति। यथा - यदि कश्चन छात्रः अध्ययने परिश्रमं करोति तर्हि सः उत्तमं परिणामं प्राप्नोति तस्य वस्तु (उत्तमाः अंकाः ज्ञानं च) प्रशंसिताः भवन्ति। सामाजिकजीवने कार्याणां सफलता सामूहिकप्रयत्नसहकार्ययोः उपरि निर्भरा भवति। आध्यात्मिकजीवने क्रियाप्राप्तिः साधनामार्गमाश्रित्य

भवति । नियमितं ध्यानम्  आध्यात्मिकः अभ्यासः च मनुष्यस्य आन्तरिकशान्तिं सन्तुष्टिं च वर्धयतः। आत्मायाः प्रगतेः च सहायकं भवति।

निष्कर्षतः “क्रिया हि वस्तूपहिता  प्रसीदति” इति कर्मणा विषयं सन्तोषजनकं करोति इत्यर्थः। अस्मात् कथनात् स्पष्टं भवति यत् जीवनस्य विभिन्नेषु क्षेत्रेषु कर्म महत्त्वपूर्णां भूमिकां निर्वहति तथा च तत् वस्तुनः स्थितिं प्रभावयति। स्वास्थ्यं, व्यक्तिगतविकासः, व्यावसायिकसफलता, सामाजिकयोगदानं, आध्यात्मिक उन्नतिः च इति सर्वं  सर्वाणि कार्यस्य औचित्यस्य उपरि निर्भरं भवति। एवं जीवनस्य विविधपक्षेषु सफलतां सन्तुष्टिं च प्राप्तुं कर्मविषयसम्बन्धस्य अस्य “क्रिया हि वस्तूपहिता प्रसीदतीति” अवगमनं अत्यन्तं महत्त्वपूर्णम् अस्ति।

## 5.6उत्सवप्रियाः खलु मनुष्याः

उत्सवाचरणं जगति सर्वत्र अस्ति एव। जगतः सर्वेषु अपि देशेषु विभिन्नान् उत्सवान् आचरन्ति। अतएव कविकुलगुरुः कालिदासः “उत्सवप्रियाः खलु मनुष्याः” (शाकुन्तलम् – षष्ठ अङ्के) इति उक्तवान्। भारतीयानां तु ’पर्व’ इत्येतत्जीवनस्य अविभाज्यम् अङ्गम् एव। वर्षपूर्णम् आचरणार्थम् अपि अपेक्षितसंख्याकाणि पर्वाणि सन्ति अस्माकं भारतदेशे। एतत्भारतस्य एव वैशिष्ट्यम्। जगति अन्यस्मिन्कस्मिन् अपि देशे एतावन्ति पर्वाणि न आचर्यन्ते। एतेषां सर्वेषाम् अपि पर्वणां सामाजिकी, पौराणिकी, अध्यात्मिकी वा पृष्ठभूमिका भवत्येव। पर्व इत्येतस्मिन् एव अर्थे उत्सवः, महः, उद्धवः, क्षणः, जन्ममहः इत्यादयः बहवः शब्दाः प्रयोगे सन्ति। एतानि पर्वाणि चतुर्धा विभक्तुं शक्यन्ते –धार्मिकपर्वाणि, राष्ट्रियपर्वाणि, जयन्त्युत्सवाः, प्रादेशिकपर्वाणि इति।

अत्र धार्मिकपर्वाणि प्रादेशिकपर्वाणि च केवलम् आचरन्ति। राष्ट्रियपर्वाणि धर्मप्रदेशादिभेदं विना भारतवासिनः सर्वेपि आचरन्ति। उदाहरणार्थं – स्वातन्त्र्यदिनाचरणं, गणतन्त्रदिवसः इत्यादीनि। कतिपयान्जयन्त्युत्सवान् अपि धर्मप्रदेशादिभेदं विना भारतवासिनः सर्वेऽपि आचरन्ति। उदाहरणार्थं - गान्धिजयन्ती। ऐक्य-स्नेह-धर्मबुद्धीनां वर्धनेन सह दैहिक-मानसिक-आरोग्यवृद्धिः, शान्तिः, इन्द्रिय निग्रहादिद्वारा श्रेयः साधनमेव एतेषां सर्वेषां पर्वणां मूलोद्देशः। जयन्त्युत्सवाः नाम जयन्त्यः। जयन्ती इत्युक्ते जन्मदिनम् इति अर्थः। अस्माकं सुखमयजीवनार्थम् अपेक्षितस्य सर्वस्यापि व्यवस्थां कृतवद्भ्यः पूर्वजेभ्यः, प्रकृतेः, देवेभ्यः च कृतज्ञतासमर्पणं भवेत्। तदर्थं तेषां तन्नामपूर्वजानां देवानां वा जन्मदिनम् अस्माभिः आचरणीयम्। तादृशानि कानिचित्जन्मदिनानि (जयन्त्यः) –

१श्रीरामनवमी – चैत्रशुक्लनवमी।

२महावीरजयन्ती – चैत्रशुक्लत्रयोदशी।

३हनुमज्जयन्ती- चैत्रपूर्णिमा।

४अक्षयतृतीया – वैशाखशुक्लतृतीया।

५नृसिंहजयन्ती – वैशाखशुक्लचतुर्दशी।

६बुद्धजयन्ती – वैशाखपूर्णिमा।

७गुरुपूर्णिमा – आषाढपूर्णिमा।

८गोकुलाष्टमी – श्रावणकृष्ण-अष्टमी।

९गुरुनानाकजयन्ती – कार्तिकपूर्णिमा।

१०दत्तात्रेयजयन्ती – मार्गशीर्षपूर्णिमा।

११विवेकानन्दजयन्ती - जनवरी१२

१२बसवजयन्ती - वैशाखशुक्लतृतीया

१३कनकदासजयन्ती

१४येसुक्रिस्तजयन्ती (क्रिस्मस्) - डिसेम्बर्२५तमेदिनाङ्के।

१५पैगम्बरजयन्ती

एताः विहाय अपि राष्ट्रियपर्वत्वेन घोषिताः जयन्त्यः सन्ति। ताः जयन्त्यः राष्ट्रियपर्वरूपेण आचर्यन्ते–

१गान्धिजयन्ती।

२नेहरुजयन्ती - बालदिनम्।

३राधाकृष्णन्जयन्ती -शिक्षकदिनम्।

४सुभाषचन्द्रबोसजयन्ती - नेताजीजयन्ती

५अम्बेडकरजयन्ती

६सद्भावनादिनम्

७हुतात्मदिनम् - सर्वोदयदिनम्

८लालबहादुरशास्त्रिजयन्ती

एषा अवलिः केवलं साङ्केतिकी। एतावन्ति एव पर्वाणि इति न। अञ्जलौ प्रासाददर्शनम् इव एवम् अवलिरचना शक्यते इति अत्र दर्शितं तावदेव। एताम् इतोऽपि दीर्घीकर्तुमपि शक्यते। यतः पूर्वमेव उक्तम् आवर्षम्प्रतिदिनम् अपि आचरणार्थम् अपेक्षितसंख्याकानि पर्वाणि सन्ति अस्माकं भारतदेशे।

## 5.6 अभ्यासार्थ प्रश्न

### 5.6.1 वस्तुनिष्ठ प्रश्न

1.रामनवमी कदा आयोज्यते ?

(क) चैत्रशुक्लनवमी (ख) चैत्रशुक्लदशमी (ग) चैत्रशुक्लएकादशी (घ) एतेषु नास्ति

2. उत्सवप्रियाः हि ...... -

(क) वृक्षाः (ख) मनुष्याः (ग) शाखाः (घ) एतेषु नास्ति

3.भद्रं इत्यस्य अर्थः भवति -

(क) कल्याणकारकः (ख) दुःखकारकः (ग) चिन्ताकारकः (घ) एतेषु नास्ति

4. कल्याणकारिण्या: भावनायाः आवश्यकता अस्ति -

**धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत्।**

**सन्निमित्ते वरं त्यागो विनाशे नीयते सति ॥**

मनसा वाचा कर्मणा च परेषाम् उपकारः 'परोपकारः' कथ्यते । अस्मिन् । जगति, परोपकारसमं किमपि श्रेष्ठं पुण्यं न विद्यते । परोपकारस्य महिमा सर्वत्र दृश्यते । सज्जनेषु एव परोपकारस्य भावना भवति न दुर्जनेषु । अस्मांक देशे अनेके परोपकारिणः पुरुषाः अभवन् । परोपकारिणः दीनेभ्यः दानम्, निर्धनेभ्यः धनम् वस्त्रहीनेभ्यः वस्त्रम्, बुभुक्षितेभ्यः अन्नम् दत्त्वा प्रसन्नाः भवन्ति ॥

अचेतनाः अपि पदार्थाः परोपका रताः दृश्यन्ते । वृक्षाः स्वयं तापं सहन्ते परम् आश्रितानाम् सन्तापं । दूरी कुर्वन्ति । नद्यः परोपकाराय , वहन्ति गावः परोपकाराय दुग्धं यच्छन्ति । सूर्यचन्द्रमसौ परोपकाराय एव प्रकाशेते । मेघाः परोपकाराय एव वर्षन्ति । परोपकारिणां पुरुषाणां पुण्यप्रभावादेव लोकोऽयमभ्युदयं प्राप्नोति । परोपकारो हि आत्मसन्तोषस्य मूलम् । तेन हि सतां शोभा वर्धते, कीर्तिकौमुदी च प्रसरति । उक्तञ्च भर्तृहरिणा –

**श्रोत्रं श्रुतेनैव न कुण्डलेन,दानेन पाणिर्न तु कङ्कणेन ।**

**विभाति कायः करुणापराणां,परोपकारैर्न तु चन्दनेन ।**

परोपकारिणा सर्वस्वं परोपकाराय भवति । किं बहुना, परोपकाराय एवं सतां विभूतयः भवन्ति । सत्यमेव उक्तम् –

**पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः ॥**

**नादन्ति शस्यं खलु वारिवाहा परोपकाराय सतां विभूतयः ॥**

अस्मिन् संसारे आत्मार्थे तु 'काकोऽपि जीवति चिरं बलिं च भुङ्क्ते', किन्तु ते एव पुरुषाः धन्याः ये परार्थं कार्यं कुर्वन्ति । शास्त्रेषु परोपकारस्य महत्त्वम् एवं वर्णितम् –

**अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।**

**परोपकारः पुण्याय पापाय परपीडनम्॥**

**परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः ।**

**परोपकाराय दुहन्ति गावः परोपकारार्थ मिदं शरीरम् ॥**

**रविश्चन्द्रो घना वृक्षा नदी गावश्च सज्जनाः ।**

**एते परोपकाराय युगे दैवेन निर्मिता ॥**

**परोपकारशून्यस्य धिक् मनुष्यस्य जीवितम् ।**

**जीव तु पशवो येषां चर्माप्युपकरिष्यति ॥**

**आत्मार्थं जीवलोकेऽस्मिन् को न जीवति मानवः ।**

**परं परोपकारार्थं यो जीवति स जीवति ॥**

**परोपकृतिं कैवल्यं तोलयित्वा जनार्दनः ।**

**गुर्वीमुपकृतिं मत्वा ह्यवतारान् दशाग्रहीत् ॥**

**श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः ।**

**परोपकारः पुण्याय पापाय परपीडनम् ॥**

**भवन्ति नम्रास्तरवः फलोद्गमैः नवाम्बुभिर्दूरविलम्बिनो घनाः ।**

**अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ॥**

## 8.4 यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥

मनुस्मृति अर्थात् स्त्रियः पूज्याः, भाग्यवन्तः गृहप्रकाशाः च भवन्ति। धर्मः कर्मसहायकः भवति। यत्र स्त्रियः पूज्यन्ते, तत्र देवाः निवसन्ति यत्र च ते अवहेलिताः भवन्ति, तत्र सर्वं कार्यं निष्फलं भवति।भारते स्त्रियः सर्वदा यथायोग्यं सम्मानं प्राप्नुवन्ति । ताः मनुष्याणाम् अपेक्षया पवित्रतराः इति मन्यन्ते। प्रायः स्त्रियः 'देवी' इति सम्बोधिताः भवन्ति । तस्याः उपाधिः 'देवी' इति प्रायः नाम्ना सह सम्बद्धम् अस्ति । शान्तिदेवी, गंगादेवी, दयादेवी इत्यादीनि 'देवी' शब्दस्य नाम्ना भवन्ति । यथा पुरुषाः स्नातकत्वं , शास्त्रीम् , साहित्यरत्नादिपदवीं च उत्तीर्य सति तेषाम् उपाधिं नाम्नः पृष्ठतः लिखन्ति, तथैव बालिकाः जन्मप्रद दिव्यगुणैः, दिव्यविचारैः, दिव्यगुणैः च अलङ्कृताः भवन्ति ।

अयं श्लोकः अस्मान्वदतियत्सहस्रवर्षेभ्यः पूर्वं अस्माकं वैदिकसभ्यतायाः उत्तमः चिन्तनः आसीत्। स्त्रीणाम् आरम्भादेव बहवः अधिकाराः आसन्। स्त्रियः वेदं पठन्ति स्म, पाठयन्ति स्म च। वेदेषु ४०४ऋषीणाम् उल्लेखः अस्ति, येषु ३० ऋषयः नार्यः आसन्। तां विना कोऽपि धर्मकार्यं पूर्णं न मन्यते स्म। युद्धकलायां प्रशासनिक कार्ये च सा निपुणा आसीत्। परन्तु यथायथा अस्माभिःसंस्कृति : विस्मता तथा तथा तस्याः क्षयः जातः तथा च नारीणाम् उपरि अपि तस्य दुष्प्रभावाः जाताः।

वामयो यानिगेहानि शपन्त्यप्रतिपूजिताः।

तानि कृत्याहतानीव विनश्यन्ति समन्ततः॥

यस्मिन्गृहे नारीणाम् अनादरः भवति अर्थात्परिवारस्य अवमाननस्य भावः भवति, तस्मिन्गृहे ते गृहकार्याणि सर्वथा नष्टानि भवन्ति। अतः समृद्धि-प्रगतिच्छिभिः जनैः विविध-पर्व-प्रसङ्गेषु नारीणाभ्यः आभूषण-वस्त्र आदि-प्रदायं स्व-सम्मानं प्रकटयितव्यम्।

तस्मादेताः सदापूज्या भूषणाच्छादनाशनैः।

भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च॥

यस्मिन्कुटुम्बे पत्नी प्रतिदिनं पतिं तृप्तं करोति, पतिः प्रतिदिनं भार्यां तृप्तं करोति, तस्मिन्कुले तस्य कुटुम्बस्य कल्याणं निश्चितम्। एतादृशस्य कुटुम्बस्य प्रगतिः अनिवार्यः अस्ति।

सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च।

यस्मिन्नेव कुले नित्यं कल्याणं तत्र वैध्रुवम्॥

देवानां महापुरुषाणां च नामानि भार्याभिः सह सम्बद्धानि सन्ति। यथा सीताराम: राधेश्याम: गौरीशंकर: लक्ष्मीनारायण: उमामहेश: माया-ब्रह्म, सावित्री-सत्यवान आदीनि। शुद्धता- दया-करुणा-सेवा-सहानुभूति-स्नेह-उदारता-भक्ति इत्यादिषु गुणेषु स्त्रियः श्रेष्ठाः मन्यन्ते । अतः धार्मिक-आध्यात्मिक-ईश्वरसाक्षात्कार-कार्यक्रमेषु सर्वत्र स्त्रीभ्य: स्वागतं कृत्वा तासाम् महत्त्वानुसारं सम्मानः प्रदत्तः अस्ति । वेदावलोकनेन स्पष्टं भवति यत् यथा वेदमन्त्रज्ञाः बहव: ऋषयः सन्ति, तथैव बहव्य: ऋषिका: अपि सन्ति एवं द्रष्टय: यै: वेदाः प्रकाशिताः ते ऋषयः उच्यन्ते स्म । न केवलं पुरुषाः अपितु बहवः नार्यः ऋषिका : अपि अभवन् । ईश्वरः स्त्रीणां हृदयेषु वैदिकज्ञानं यथा पुरुषणामं हृदयेषु प्रकाशितवान् । ईश्वरः कथं स्वसन्ततिषु स्त्रीपुरुषयोः भेदं कर्तुं शक्नोति?यथा पुरुषाः ब्रह्मचारिणः भूत्वा तपसा योगेन च ब्रह्मत्वमाप्तवन्त:, तथैव बहव्य: स्त्रियः ब्रह्मचारिण्य: भूत्वा आत्मसाक्षात्कारं परमं लक्ष्यं वा प्राप्तवत्य:। पुरा अनेके प्रसिद्धाः ब्रह्मचारिण्य: आसन् याभि: प्रतिभया, पाण्डित्येन च सर्वत्र यशः प्राप्तम्। महाभारते तादृशीनां बहूनां ब्रह्मचारिणीनां वर्णनम् अस्ति ।भारद्वाजस्य पुत्री पृथिव्यां सौन्दर्ये अद्वितया आसीत् ।अहो भगवन् श्रुतवती नाम कुमारीपदेन ब्रह्मचर्याम् आचरति स्म –महाभारत शल्य पर्व **2. 2।** भारद्वाजस्य श्रुतवती नाम कन्या ब्रह्मचारिणी आसीत् । कुमारीपदेन ब्रह्मचारिणीशब्दं योजयित्वा अविवाहिता, वेदस्य छात्रा: च इति भावः । पुरुषः स्त्री च चक्रद्वयं रथस्य एकः अपरं विना अपूर्णः। उभयभागयोः संयोगेन सम्पूर्णं अङ्गम् भवति । मानवस्य अविच्छिन्नभागयोः एतादृशं असमानता भारतीयपरम्परायाः सर्वथा विरुद्धा अस्ति। भारतीयधर्मः सर्वदा स्त्रीपुरुषयोः एकः अविभाज्यः भागः इति मन्यते ।यथैवात्मातथापुत्र: पुत्रेणदुहितासमा-मनुस्मतिः। न एकः पुरुषः, अपितु तस्य भार्या बालकाः च मिलित्वा स्वयं पुरुषा : भवन्ति ।भार्या पुरुषार्ध इत्यर्थः।अतः वेदज्ञान ब्रह्मज्ञानादिक्षेत्रे वञ्चिता: नैव भवेयु: ।

## 8.5 संस्कृतभाषायाः महत्त्वम्

**ऋषीणामाद्यानां गहनमननावाप्रसुयशाः**

**श्रुतीनां शास्त्राणां निखिलगुण-तत्त्वार्थनिलया ।**

**पुरातत्त्वाधारा सकलभव-ज्ञानाब्धिविभवा**

**जयेद् देवो वाणी त्रिभुवनमनोज्ञा बुधप्रिया । । (कपिलस्य)**

किं नाम संस्कृतमिति जिज्ञासितं चेत् परिष्कृतं, परिशुद्धं, व्याकरणादिदोषरहितं यत् तत् संस्कृतम् । प्राचीनैः ऋषिभिर्मुनिभिश्च भाषागतदोषपरिष्कारेण, अपशब्दादिदोषवारणेन या परिष्कृता भाषा व्यवहृतिमानीता सैव संस्कृतभाषा-नाम्ना सम्बोध्यते, प्रशस्यते, आद्रियते च । 'विद्वांसो हि देवाः' विद्वज्जनव्यवहृता चेयं भाषा। सेव देवभाषा, देववाणी, गीर्वाणवाणी, गीर्वाणगीरित्यादिभिर्नामधेयैः व्याहियते। इयमेव भाषा विकृतिमापन्ना प्राकृतभाषापदमुपगतवती । सेयं भाषा भारतीयानां प्राणरूपिणी, जीवनोन्नायिका, सत्पथप्रदर्शिनी, आचारविचारप्रवतिनी, कर्तव्याकर्तव्यबोधिनी लोकद्वयर्याहितसम्पादिनी च ।

**संस्कृतस्य विपुलं साहित्यम्-** भारतवर्षस्य समस्तमपि प्राचीनं वाङ्मयं संस्कृतभाषामाश्रित्यैवावत्तिष्ठते । निखिलमपि वैदिकवाङ्मयं, रामायणं, महाभारतं, पुराणानि, स्मृतिग्रन्था:, दर्शनानि, धर्मग्रन्थाः, महाकाव्यानि, काव्यानि, नाटकानि, गद्यकाव्यानि, गीतिकाव्यानि, आख्यानसाहित्यम्, नीति- ग्रन्थादयश्च संस्कृतभाषायामेव रचिता: उपलभ्यन्ते । न केवलमेतदेव, व्याकरणं, काव्यशास्त्रं, गणितं, ज्योतिषम्, आचारशास्त्रं, काव्यशास्त्रम्, आयुर्वेदः, धनुर्वेदः, वास्तुकलाशास्त्रम्, अर्थशास्त्रम्, राजनीतिशास्त्रम्, ऐतिह्यम्, छन्दःशास्त्रम्, कोशग्रन्याश्च संस्कृतभाषाया गौरवं अभिवर्धयन्ति। ज्ञानस्य विज्ञानस्य न तादृशं किमप्यङ्गम्, यन्नैवोपलभ्यते संस्कृतभाषायाम्। प्राचीनानाम् ऋषीणां , महर्षीणां, कवीनां, तत्त्वज्ञानिनाम् अनारतश्रमस्यैव फलमेतद् यदीदृशं विपुलं संस्कृतवाङ्मयं दृष्टिपथमुपयाति ।

**संस्कृतस्य पुरा लोकव्यवहारः-** प्राचीन भारतीयसाहित्यानुशीलनेन स्फुटमेतदवगम्यते यद् ईसवीयसंवत्सरात् पूर्वं गीर्वाणगीरियं जनसाधारणे व्यवहृताऽ भूत् । न केवलं विद्वज्जनव्यवहृतभाषारूपेणैवेयं प्रायुज्यत, अपितु लौकिकानामपि व्यवहारास्पदमभूत्। निरुक्तकारो यास्कः संस्कृतं 'भाषा' (व्यवहारभाषा) इति निरूपयति । पाणिनिकृतसूत्राण्यपि एतदेव समर्थयन्ते। यथा द् आह्वाने प्लुतत्वम्, प्रत्यभिवादे अन्तिमस्वरप्लुतत्वं च । पाणिनिना वैदिकलौकिकभाषयोःविभेदो छन्दस्-भाषा-शब्दयोः प्रयोगेण विधीयते । एतेन व्यवहृतभाषारूपेण संस्कृतस्य प्रयोगो लक्ष्यते। प्राचासु, उदोचाम्, इत्यादिभिः प्रयोगैश्च संस्कृत- भाषाया: प्राच्यादिभेदोऽवगम्यते । महामुनिना पतञ्जलिना 'सर्वे देशान्तरे' इत्यत्र विविधप्रदेशेषु प्रयुज्यमानानां संस्कृतशब्दानां निदर्शनानि प्रस्तूयन्ते । महाभाष्ये सूतशब्दव्युत्पत्तिविषये सूतवैयाकरणयोविवादः कस्य न मनोरञ्जनमावहति । सूतो वैयाकरणं निर्भर्त्सयन्नाह - 'प्राप्तिशो देवानां प्रियः, न त्विष्टिज्ञः, इष्यते एतद् रूपम्' (महा० २।४।५६) ।

रामायणकाले महाभारतकाले च संस्कृतभाषेव लोकव्यवहृत्तिभाषाऽ भूदिति पाश्चात्त्यैरपि निर्विवादम् उररीक्रियते । हनुमान् अशोकवाटिकायां सीतां प्राप्य संस्कृतम् आश्रित्यैव विवक्षति - 'वाचं चोदारिष्यामि मानुषीमिह संस्कृतम्' (वा० सुन्दरकाण्ड ३०/१७) । बौद्धकविरश्वघोषेण प्राकृतभाषां परित्यज्य बुद्धचरित-सौन्दरनन्दकाव्यद्वयं संस्कृतभाषया विरचितम्। द्वित्तीयशताब्दी-ईसवीयादारभ्य एकोनविंशतितम-शताब्दीं यावत् सर्वेऽपि शिलालेखाः प्रायेण संस्कृतभाषाश्रया: एव । राज्ञो भोजस्य काले संस्कृतस्य प्रचुरः प्रचारो लोकविदित एव । कविबिल्हणः कश्मीरदेशजनारीणां संस्कृतभाषाज्ञानं तत्प्रयोगञ्च प्रमाणयति। मैकडानल-कीथ-विण्टरनित्स-विलियम जोन्स - विण्डिश-हर्टल-प्रभृतयः पाश्चात्त्यविद्वांसोऽपि न केवलं पुराकाले एव, अपितु अद्यावधि संस्कृतभाषायाः सजीवत्वं , व्यवहृतित्वं च साधयन्ति ।

**संस्कृतस्य महत्त्वं गौरवं च-** संस्कृतभाषाया महत्त्वं न केवलं भारतीयैरेव अपितु पाश्चात्त्यैरपि साह्लादमङ्गीक्रियते । विश्वस्य प्राचीनतमं साहित्यमत्रैवोपलभ्यते । अत्र वैदिकसाहित्यं, मुख्यतः ऋग्वेदः, विशेषत उल्लेख- मर्हति । विश्वस्य प्राचीनतमायाः संस्कृतेः सभ्यतायाश्च यथार्थावगमाय संस्कृमेवैकं साधनम् । विश्वसंस्कृतेराधारशिला संस्कृतवाङ्मये एव प्राप्यते । तन्मूलकमेव विश्वसंस्कृतेः तुलनात्मकमध्ययनं प्रस्तूयते । संस्कृते ज्ञान-विज्ञान- कला-संस्कृति-धर्म-दर्शन-अर्थशास्त्र-व्याकरण-काव्यशास्त्र-आयुर्वेदादि-विषयेषु यथा विपुलं प्राचीनं वाङ्मयमुपलभ्यते न तावदन्यत्र कस्यामपि भाषायाम् । मैकडानलमतानुसारं समग्रसभ्यताया मूलं संस्कृतवाङ्मय एव निहितम् । मानवजातिविकासाध्ययनार्थं मूलस्रोतस्त्वेन भारतीयं वाङ्मयं ग्रीकसाहित्यापेक्षया गुरुतरम् । धर्मदर्शनयोः क्षेत्रे संस्कृतस्य उत्कर्षः सर्वातिशायी। अध्यात्मशास्त्रानुशीलनाय, काव्यत्तत्त्वज्ञानाय, नीतित्तत्त्वावबोधाय, आचारशिक्षासंग्रहाय, प्राचीनविधानज्ञानाय, गणित-ज्योतिष-अर्थशास्त्र-कामशास्त्र-सङ्गीतनृत्याभिनयादिकलानां सूक्ष्मातिसूक्ष्मज्ञानाय संस्कृतवाङ्मयमेवैकं शरणम् । विश्व- प्रेम-विश्वबन्धुत्व-विश्वसंस्कृत्यादीनाम् आधारत्तत्त्वज्ञानार्थं संस्कृतस्यानुशीलनमनिवार्यम्।भाषासु मधुरा मुख्या दिव्या गीर्वाणभारती-गीर्वाणगिरो माधुर्यं कस्य न सचेतसश्चेत आवर्जयत्ति । कालिदास-माघ-श्रीहर्ष-जयदेवादीनां काव्यानि प्रतिपदं माधुर्यवन्ति, सङ्गीता-त्मकानि, लालित्यवन्ति च सन्ति । देववाण्या माधुर्य-गुणमुग्धा एव सर विलियम जोंस-गेटे-प्रभृतयः पाश्चात्त्या विपश्चितोऽपि तद्गुणानुवादपरा अभूवन् । 'मेघे माघे गतं वयः' 'मधुरकोमलकान्तपदावलीं शृणु तदा जयदेवसरस्वतीम्' (गीत० १०३) इत्यादय

आभाणकाः कालिदास- माघ -जयदेवादीनां पदमाधुर्यं मनोज्ञत्वं सहृदयास्वाद्यत्वं च पुष्णन्ति । एतन्माधुर्यापहृतचेतसः शतशः पाश्चात्त्या गीतारामायणादीनां पठने, श्रवणे, अनुवादे च प्रावर्तन्त । भारते तु न केवलं विज्ञा एवापितु रसास्वादप्रवणा ललना अपि संस्कृताध्ययनं व्यदधुः । आकर्ण्यते यद् मण्डनमिश्रभवनविषये पृष्टा नार्यः तमेवमूचुः- 'स्वतःप्रमाणं परतः प्रमाणं कीराङ्गना यत्र गिरो गिरन्ति । द्वारस्थ नीडान्तरसन्निविष्टा जानीहि तन्मण्डनपण्डितौकः' ।

संस्कृताध्ययनस्य प्रयोजनानि- संस्कृताध्ययनस्य प्रयोजनानि विचिन्त्यन्ते चेत्तर्हि सुकरमेतद्वक्तुं यत् संस्कृतभाषैव अध्यात्मज्योतिः प्रदा, आचार शास्त्रशिक्षिका, जीवनोन्नतिकारिणी, ज्ञानाग्निना मोहान्धतमसविनाशिका, सत्पथप्रदर्शिका काचित् शक्तिः। अध्यात्मदृशा तत्त्वार्थदीपिका व्यवहार- दृशा च वृत्तिसाहाय्यमाचरन्ती, कर्तव्योद्बोधनपरा। अस्य मुख्यप्रयोजनत्वेन एते विशेषा गणयितुं शक्यन्ते वेदोक्तधर्मज्ञानम्, आर्यसंस्कृतिज्ञानम्, आर्य- सभ्यतावैशिष्ट्यज्ञानम्, प्राचीनभारतीयवैभवावगमः, दर्शनतत्त्वावबोधः, कर्तव्या-कर्तव्यज्ञानम्, विश्वबन्धुत्व-भावोदयः, आस्तिक्यवृद्धिः, विवेचनात्मिका दृष्टिः, विविधभाषासम्पुक्तत्वम्, शीलप्रधानशिक्षादर्शनम्, प्राचीनपरम्पराज्ञानं चेति।

**संस्कृतस्य भाषाशास्त्रीयं महत्त्वम्-** भारोपीयपरिवारे संस्कृतभाषैव प्राचीनतमा। तन्मूलकमेव भाषा-विज्ञानस्य उद्भवः । संस्कृत-ग्रीक-लेटिनभाषाणां तुलनात्मकेनाध्ययनेन भाषाविज्ञानस्य उद्भवः। संस्कृतभाषायामुपलब्धं वाङग्यं भाषाशास्त्रीयां सर्वामप्यावश्यकतां पूरयति । संस्कृतभाषामूलकमेव तुलनात्मकदेवशास्त्रस्योत्पत्तिः । अतएव मैकडानलमहाभागेनाभिधीयते-

The discovery of the Sanskrit language led to the foundation of the science of comparative philology, an acquaintance with the literature of the Vedas resulted in the foundation of the science of Comparative Mythology. -MACDONELL-H.S.L.. P.**5.**

विण्टरनित्स-महोदयोऽपि संस्कृतभाषां भाषाविज्ञानस्य आधारत्वे न अंगीकरोति-

In the earliest ages the Indians already analysed their ancient sacred writings with a view to Philology, classifides a scientific system and developed their grammar so highly that even today modern Philology can use their attainments as a foundation,-Winternitz H.I.L, P. 8.

संस्कृतभाषाश्रयेण सर्वा अपि भारतीया भाषाः सारल्येनावगन्तुं पार्यन्ते । यतो हि तत्र अशीतिप्रतिशतं यावत् संस्कृत- शब्दाः प्रयुज्यन्ते । जर्मन-फेञ्च-आङ्ग्लभाषादिष्वपि महती संख्या संस्कृतस्य तत्समतद्भवशब्दानाम् । एवं विज्ञायते यत् भाषाविज्ञान-दृष्ट्या संस्कृतभाषा बहुमूल्यो निधिः ।

**संस्कृतस्य सांस्कृतिकं महत्त्वम् सांस्कृतिकदृष्ट्या संस्कृत**-भाषा अनर्घा श्रेष्ठा च । भारतस्य तु भाषैषा सांस्कृतिको निधिः। निखिलमपि सांस्कृतिकं वाङ्मयं संस्कृतमाश्रित्यैवावतिष्ठते । विश्वसंस्कृतिपरिज्ञानार्थमपि संस्कृतभाषा अपरिहार्या। तुलनात्मकसंस्कृतिविचारे संस्कृतभाषेव साहाय्यमाचरति । संस्कृतभाषाश्रयेव संस्कृतिः सुदूरपूर्ववर्तिषु ब्रह्मदेश-श्याम-यव-सुमात्रादि-द्वीपेषु प्रचचार। अमेरिका-यूरोपमहाद्वीपस्थ-संस्कृतिष्वपि एतस्या अक्षयः प्रभावः परिलक्ष्यते । धर्मार्थकाममोक्षात्मकपुरुषार्थ-चतुष्टयस्य साधनं संस्कृतवाङ्मयमेव । प्रागैतिहासिक-तत्त्वावबोधाय संस्कृतमेवैकं शरणम् । भारोपीयसंस्कृतेः प्राचीनतमरूपावगमाय संस्कृतं विहाय नान्या गतिः। संस्कृतवाङ्मयाश्रयेणैव पाश्चात्यपौरस्त्यसंस्कृत्योः समन्वयः, सम्पर्कः सङ्गतिश्चावगम्यते। भारतीयसंस्कृतेः विशुद्धरूपज्ञानाय संस्कृतवाङ्मयमेवैकं साधनम्। जैनबौद्ध-चार्वाकादिसंस्कृतयोऽपि संस्कृतभाषाश्रया एव ।

**भारते भातु भारती-** यदि भारतस्य सर्वाङ्गीणा समुन्नतिः काम्यते सर्वसुखदो विकासश्चाभिलष्यते तर्हि संस्कृतस्य प्रचारः प्रसारश्च नितरामनिवार्यम्। वैदिकसाहित्याद् उद्भूता सेयं संस्कृतभाषापरम्परा अद्यावधि जीवतितमाम् । मृतभाषाभाषिणो जनाः संस्कृतवाङ्मयज्ञानाभावात् स्वीयं मूढत्वमेव प्रदर्शयन्ति । हर्षावहोऽयं विषयो यदद्यत्वेऽपि संस्कृतेन, काव्यानि, नाटकानि, गीतिकाव्यानि, गद्यसाहित्यम्, विविधाः पत्र-पत्रिकाश्च प्रतिसंवत्सर प्रकाश्यन्ते, सहस्रशो लक्षशश्च तेषामध्येतारो दरीदृश्यन्ते। भारतसर्वकारोऽपि विषयेऽस्मिन् जागरूकतां प्रदर्शयति । अक्षयोऽयं निधि: सर्वथा सर्वदा च अध्येयोऽनुशीलनीयः, सम्मान्यो, विकासनीयश्च । एतदेव संप्राच्यं विरम्यते यत्-

**सुवर्णा सद्वृत्ता विविधललितालङ्कृतिचणा,**

**गुणाढ्या निर्दोषा विबुधनिवहाराधितपदा।**

**सुरीतिप्रख्याता भवविभवरूपाश्रितरसा,**

**सदेयं शर्वाणी जयतु सुरवाणीह सततम्।।**

## 8.6 विद्याधनं सर्वधनप्रधानम्

विद्या नाम ज्ञानस्य अपरमभिधानम्। कथितं वर्तते-

**आयुः कर्म च विद्या च वित्तं निधनमेव च।**
**पञ्चैतानि विलिख्यन्ते गर्भस्यैव देहिनः॥**
**विद्याभ्यासस्तपो ज्ञानमिन्द्रियाणां च संयमः।**
**अहिंसा गुरुसेवा च निःश्रेयस्करं परम्॥**

अर्थात् मनुष्याणां कृते विद्याभ्यासः सर्वोत्तमं कार्यं विद्यते।

**विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्**
**विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः।**
**विद्या बन्धुजनेविदेशगमने विद्या परा देवता**
**विद्या राजसु पूज्यते न तु धनं विद्याविहीनःपशुः॥**

भारतीयसंस्कृतौ विद्या सर्वोपरि विद्यते। इयं ज्ञानपरम्परायाः सर्वोत्कृष्टा सुधारूपे वर्तते। कथितं वर्तते यत् "सर्वे गुणाः काञ्चनमाश्रयन्ते" किन्तु विद्या तु सर्वधनेषु प्रधानधनं वर्तते। यतो हि विद्या केनापि चौर्येण न चोरयते, न भ्रातृणां मध्ये विभज्यते, न तु दह्यते न तु वायुना शोष्यते अपितु-

**दानेन वर्धते नित्यं न भाराय न नीयते।**

**अन्यच्च -**

**विद्या विवादाय धनं मदाय**
**शक्तिः परेषां परिपीडनाय।**
**खलस्य साधोः विपरीतमेतत्**
**ज्ञानाय दानाय च रक्षणाय॥**

अन्यच्च –

**विद्या ददाति विनयं विनयाद् याति पात्रताम्।**

**पात्रत्वाद्धनमाप्नोति धनाद्धर्मः ततः सुखम् ॥**

**नास्ति विद्यासमो बन्धुर्नास्ति विद्यासमः सुहृत् ।**
**नास्ति विद्यासमं वित्तं नास्ति विद्यासमं सुखम् ॥**

**विद्या नाम नरस्य कीर्तिरतुला भाग्यक्षये चाश्रयो**
**धेनुः कामदुघा रतिश्च विरहे नेत्रं तृतीयं च सा ।**
**सत्कारायतनं कुलस्य महिमा रत्नैर्विना भूषणम्**
**तस्मादन्यमुपेक्ष्य सर्वविषयं विद्याधिकारं कुरु ॥**

- विद्या सा वै कृता – विद्या सम्यक्तया परिवर्तनं कारयति। सद्विद्या सा एव भवति या जीवने सकारात्मकं समुन्नत्यर्थं परिवर्तनं आनयति।
- सा विद्या या विमुक्तये –सा एव विद्या या मुक्तिं ददाति। विद्या सर्वप्रकारकेभ्य: बन्धनेभ्य: मुक्तिं प्रददाति। अज्ञानात्, मानसिकवेदनाया :, सर्वकष्टेभ्यः मुक्तिरिति विद्यायाः सर्वप्रधानलक्ष्यं वर्तते।
- विद्या विवेकधात्री – विद्या विवेकेन व्याप्ता वर्तते। विद्या बुद्धिं प्रखरी करोति। सद्विवेकेन मनुष्यः स्वकार्यं सम्यग्रूपेण करोति।
- विद्याधनं सर्वधनप्रधानम् – सर्वधनेषु विद्या उतमं धनम् वर्तते। भौतिकसम्पत्तिषु सर्वश्रेष्ठा सम्पत्तिः वर्तते।
- विद्या युक्तिः कृणुते – विद्या कौशलं ददाति। सद्विद्या बुद्धिमत्तां प्रकटयति।

विद्याशब्द ज्ञानार्थकाद् विद्यातोर्विद्याशब्दः सिध्यति। कस्यचिदपि वस्तुनो विषयस्य वा सम्यक् ज्ञानं विद्येत्यभिधीयते। वेद-शास्त्र-विज्ञानादीनां साध्वनुशीलनं तत्वार्थज्ञानं च विद्येति स्वीक्रियते। उपनिषदाम् अनुसारं द्वे विद्ये-परा अपरा च। तत्र अपरा-वेदा वेदाङ्गनि च। परा सा यया तद् अक्षरम् अधिगम्यते। कथितञ्चापि वर्तते मुण्डकोपनिषदि-

द्वे विद्ये वेदितव्ये परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरम् अधिगम्यते (मुण्डकोपनिषद् 1.1.4, 5) 1

यया लौकिकं ज्ञानं जायते, सा अपरा विद्या। यया च अक्षर-ब्रह्मविषयकं ज्ञानं जायते, सा परा विद्या। द्वे अपि विद्याशब्दवाच्ये ज्ञातव्ये च वर्तेते।

**विद्याधनं सर्वधनप्रधानम्**-विद्येव तद् धनं , यया सर्वोऽपि मानवीयो मनोरथोऽभिलाषो वा पूर्यते। विद्ययैव कर्तव्याकर्तव्यज्ञानम्, धर्माधर्म-परिज्ञानम्, पुण्यापुण्यविवेकः, लाभालाभावबोधश्च । विद्ययैव लक्ष्यनिर्धारणम्, लौकिकविषयावाप्तिः, भौतिक सुख-साधनम् भूमि-गृह-विभवादीनाम् अवाप्तिश्च। अपरं चैतस्य वैशिष्ट्यं यदेतद् धनं न भ्रातृभाज्यम्, न नृपहार्यम्, न च भारकारि वर्तते। यथा यथा दीयते विभज्यते च तथा तथैव वृद्धिम् अश्नुते। उक्तञ्च-

**न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।**

**व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्॥ सुभाषितरत्नभाण्डागारः**

**वसुमतीपतिना न सरस्वती बलवता रिपुणापि न नीयते।**

**समविभागहरैर्न विभज्यते विबुधबोधबुधैपि सेव्यते ।। सुभाषितरत्नभाण्डागारः**

विद्याविहीनः पशु:-लोके विद्येव तद् ज्योतिः यद् मानवे ज्ञानज्योतिर्ज्वलयति, अविद्यान्धतमसं व्यपोहति, दुर्गुणगणं वारयति, सद्गुणततिं संचारयति, कीर्तिं प्रथयति, गौरवं विकासयति, यशो वितनोति, भूभृत्सु च आदरम् आवहति। अतएवोच्यते-

**विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं**

**विद्याभोगकरी यशः सुखकरी विद्या गुरूणां गुरु : ।**

**विद्या बन्धुजनो विदेशगमने विद्या परा देवता**

**विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः ।। नीतिशतकम्** 20

किं किं न साधयति कल्पलतेव विद्या अर्थात् विद्या मानावानं कृते किं किं न साधयति ? अर्थात् सर्वं साधयति। सा तु कल्पतेव विद्यते। इयं तु कल्पलतेव सर्वसुखसाधिका, सर्वगुणप्राया, सर्वाभीष्टसन्धात्री च। सैषा मातृवत् संरक्षिका, पितृवत् सत्पथप्रदर्शिका, कान्तावत् सुखदा मनोरञ्जिका च, कीर्तिप्राया, वैभवदायिनी, दुर्गुणगणनाशेन मनसः पावयित्री च। सर्वमनोरथपूरणात् सेयं कल्पलतया उपमीयते। मातेव रक्षति पितेव हिते नियुङ्क्ते, कान्तेव चाभिरमयत्यपनीय खेदम् । लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं , किं किं न साधयति कल्पलतेव विद्या।। (भोजप्रबन्धः)

**श्रियः प्रदुग्धे विपदो रुणद्धि, यशांसि सूते मलिनं प्रमार्ष्टि।**

**संस्कारशौचेन परं पुनीते, शुद्धा हि बुद्धिः किल कामधेनुः ।। विद्धशालभञ्जिका** 1.8

**सा विद्या या विमुक्तये-** किं नाम विद्याया: लक्ष्यमिति दुःखनिवृत्तिपूर्वकं सुखप्राप्तिरिति। त्रिविधदुःखात् मुक्तिरिति विद्यायाः प्रधानं लक्ष्यं वर्तते। यदि न स्याद् विद्या मुक्तेः साधनं तर्हि तदवाप्तिरपि न श्रेयसे न च सुखाय स्यात्। यया मोक्षाधिगमः सैव विद्या। उपनिषत्सु सैव पराविद्येति प्रकीर्त्यते। अतएव पुनः पुनः निर्दिश्यते सा विद्या या विमुक्तये'। विद्या एव ज्ञानप्राप्तिसाधनम्। ज्ञानेनैव ब्रह्मपथस्य साधुदर्शनात् तदभिमुखत्वम्, तेन च मोक्षाधिगमः। एतदेवाभिप्रेत्य प्रोच्यते-'ऋते ज्ञानान्न मुक्तिः।' गीतायामपि भगवता कृष्णेनैतदेव समर्थ्यते यद् यथा समिद्धो वन्हिः समिधो भस्मसाद्विधत्ते, तथैव ज्ञानाग्निः सर्वकर्माणि विनाशयति भस्मावशेषं च विधत्ते। उक्तञ्च-

**यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।**

**ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ।। गीता** 4.37

विद्ययैव तत्त्वज्ञानाधिगमाद् ब्रह्मरूपस्य अमृतत्वस्य च साक्षात्कारेण अमृतत्वप्राप्तिर्ब्रह्मज्ञानम् अमरत्वं च। एतदेवाभिप्रेत्य समर्थ्यते यत्-

**विद्ययाऽमृतमश्नुते।**

**विद्यया विन्दतेऽमृतम् ।**

## 8.7 अभ्यासार्थ प्रश्न

**8.7.1 वस्तुनिष्ठ प्रश्न**

1. विद्याधनं ..................?

(क) सर्वधनप्रधानम् (ख) सर्वप्रमुखं (ग) स्वराज्यम् (घ) एतेषु नास्ति

2. यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र ..................?

(क) देवताः (ख) दानवाः (ग) मनुष्याः (घ) एतेषु नास्ति

3. सा विद्या या ..................?

(क) जीवनाय (ख) धर्माय (ग) कामाय (घ) विमुक्तये

4. सा विद्या या ..................?

(क) जीवनाय (ख) धर्माय (ग) कामाय (घ) विमुक्तये

5. ऋषिपदस्य स्त्रीलिङ्गे किं भवति ?

(क) ऋषाणि (ख) ऋषिका (ग) ऋषी (घ) एतेषु नास्ति

**8.7.2 लघु-उत्तरीय प्रश्न**

1. यतो धर्मस्ततो जयः इत्यस्य व्याख्या कार्या।
2. परोपकाराय सतां विभूतयः इत्यस्योपरि टिप्पणी विधीयताम्।
3. यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः इत्यस्य व्याख्या कार्या।
4. संस्कृतभाषायाः महत्त्वम् इत्यस्य व्याख्या कार्या।
5. विद्याधनं सर्वधनप्रधानम् इत्यस्य व्याख्या कार्या।

8.7.3 **दीर्घ-उत्तरीय प्रश्न**

1. धर्मस्य स्वरूपं विधीयताम्।
2. परोपकारस्य उपयोगिता प्रदर्शयत।
3. समाजे नारीसम्मानस्य स्थानं प्रदर्शयत।
4. आधुनिकयुगे संस्कृतभाषायाः उपयोगितायाः वर्णनं कुरुत।
5. विद्यायाः महत्त्वं प्रदर्शयत।

# इकाई 9 – अनुवाद के सामान्य नियम तथा हिन्दी से संस्कृत में अनुवाद (अनुच्छेद पर आधारित)

## इकाई की रूपरेखा


9.0 उद्देश्य

9.1 प्रस्तावना

9.2 अनुवाद के सामान्य नियम

9.3 हिन्दी से संस्कृत में अनुवाद

अनुच्छेद 1

अनुच्छेद 2

अनुच्छेद 3

अनुच्छेद 4

अनुच्छेद 5

9.3 अभ्यासार्थ प्रश्न
9.3.1 वस्तुनिष्ठ प्रश्न
9.3.2 लघु-उत्तरीय प्रश्न
9.3.3दीर्घ-उत्तरीय प्रश्न

## 9.0 उद्देश्य

भाषा ज्ञान का प्रकाशक है। बैखरी वाक् से उद्भूत इस संकेत में अवबोध शक्ति निवास करती है किन्तु भाषायी माध्यम के ज्ञान के बिना उसके मर्म अर्थात् अर्थावबोध को जाना नहीं जा सकता है। अतः एक भाषा से दूसरी भाषा में अनुवाद के द्वारा इस गुत्थी को सुलझाया जा सकता है। जिस भाषा में अनुवाद किया जाता है उसको लक्ष्य भाषा कहा जाता है और जिस भाषा से अनुवाद किया जाता है उसे स्रोत भाषा कहा जाता है। मीमांसा परिभाषा में कृष्णराज यज्वा कहते हैं – "मानान्तरप्राप्तस्य पुनर्कथनमनुवादः" अर्थात् प्रमाणान्तर से प्राप्त का फिर से कहना अनुवाद है। इसलिए इस ईकाई में विद्यार्थी अनुवाद के नियम का अवबोध करेंगे। कारक, समास, सन्धि, कर्तृवाच्य, कर्मवाच्य एवं भाववाच्य को समझ सकेंगे। हिन्दी से संस्कृत अनुवाद करने का कौशल विकसित करने में समर्थ होंगे। संस्कृत में वाक्य निर्माण कर सकेंगे।

## 9.1 प्रस्तावना

अनुवाद के माध्यम से विद्यार्थी को स्रोत भाषा से लक्ष्य भाषा में अनुवाद करना सिखाया जाता है। इससे विद्यार्थी को दोनो भाषाओं का अवबोध होता है और फिर इस प्रकार वह दोनों ही भाषाओं में प्रवीण हो सकता है। अनुवाद में अभ्यास अत्यन्त आवश्यक है। यदि हम निरन्तर अनुवाद का अभ्यास करते हैं तो निश्चित रूप से भाषा के अवबोध में हमें आशानुरूप सफलता मिलती है। इसलिए हमें अनुवाद का लगातार अभ्यास करना चाहिए।

## 9.2 अनुवाद के सामान्य नियम

संस्कृत में अनुवाद के नियमों का पालन करना अत्यन्त महत्त्वपूर्ण होता है, जिससे अनुवाद सही, सटीक और अर्थपूर्ण हो। संस्कृत प्राचीनभाषा है, जिसमें सूक्ष्मता और विस्तार दोनों की आवश्यकता होती है। यहाँ कुछ महत्त्वपूर्ण नियम दिए गए हैं, जो संस्कृत अनुवाद में सहायक हो सकते हैं:

1.**संज्ञा और सर्वनाम का सही उपयोग** - संज्ञाओं (nouns) और सर्वनामों (pronouns) के सही रूपों का चयन करें। संस्कृत में संज्ञा और सर्वनाम के लिङ्ग, वचन (singular/plural)और कारक (case) के अनुसार रूप बदलते हैं।

2.**क्रिया का सही रूप और काल** - क्रियाओं (verbs) का सही रूप और काल का चयन करें। संस्कृत में क्रिया के विभिन्न काल और रूप होते हैं (वर्तमानकाल, भूतकाल, भविष्यकाल) और क्रिया रूप भी संज्ञा के लिङ्ग और वचन के अनुसार बदलते हैं।

3.**पद-व्यवस्था और वाक्य संरचना** - संस्कृत वाक्य संरचना (syntax) और पद व्यवस्था (word order) का ध्यान रखें। संस्कृत में वाक्य संरचना स्वतंत्र होती है, लेकिन सामान्यतः क्रिया (verb) अंतिम स्थान पर होती है।

4.**विभक्ति और संधि का ध्यान** - विभक्ति (case endings) और संधि (sandhi) का सही उपयोग करें। संस्कृत में विभक्ति के अनुसार संज्ञा और विशेषण बदलते हैं। संधि वह प्रक्रिया है जिसमें शब्दों के मिलन पर ध्वनि परिवर्तन होता है।

5. **शब्दावली और प्रचलित वाक्यांश**- प्रचलित वाक्यांशों और शब्दावली का सही उपयोग करें। संस्कृत में कुछ विशिष्ट शब्द और वाक्यांश होते हैं जो विशेष अर्थ को व्यक्त करते हैं।
6. **अर्थ की सटीकता** - अनुवाद करते समय अर्थ की सटीकता बनाए रखें। संस्कृत में शब्दों के कई अर्थ हो सकते हैं, इसलिए सही अर्थ का चयन करना आवश्यक है।
7. **संबंधित सांस्कृतिक संदर्भ** - अनुवाद करते समय सांस्कृतिक संदर्भों को ध्यान में रखें। संस्कृत साहित्य और ग्रंथ अक्सर सांस्कृतिक संदर्भों से भरपूर होते हैं, इसलिए सांस्कृतिक और ऐतिहासिक संदर्भ को समझना महत्त्वपूर्ण है।
8. **व्याकरण नियम**- संस्कृत व्याकरण (grammar) के नियमों का पालन करें। इसमें कारक, लिंग, वचन, काल, और क्रिया रूप शामिल हैं।
9. **प्रारंभिक अनुवाद और पुनरावलोकन** - प्रारंभिक अनुवाद के बाद पुनरावलोकन (review) और सुधार (revision) करें। अनुवाद के बाद, त्रुटियों को ठीक करने और सुनिश्चित करने के लिए पुनरावलोकन महत्त्वपूर्ण है।
10. **उपयुक्तता और सन्दर्भ** - अनूदित पाठ की उपयुक्तता और संदर्भ को ध्यान में रखें। यह सुनिश्चित करें किं अनूदित पाठ मूल के संदर्भ और उद्देश्य को सही रूप से व्यक्त करता है।

इन नियमों का पालन करके आप संस्कृत से अन्य भाषाओं में सटीक और अर्थपूर्ण अनुवाद कर सकते हैं। संस्कृत की जटिलता को समझने और सही ढंग से अनूदित करने के लिए अभ्यास और ज्ञान की आवश्यकता होती है। अनुवाद में कारक के चिह्न के अवबोध द्वारा ही हम वाक्य का निर्माण कर सकते हैं। कारक के चिह्न निम्नलिखित हैं।

कारक के चिह्न –

| | |
|---|---|
| प्रथमा - कर्ता | ने |
| द्वितीया - कर्म | को |
| तृतीया - करण | से (संयोग) / के द्वारा |
| चतुर्थी - सम्प्रदान | के लिए |
| पञ्चमी - आपादान | से (वियोग) |
| षष्ठी - सम्बन्ध | का, के, की, रा, रे, री |
| सप्तमी - अधिकरण – | में, पै, पर |
| सम्बोधन - | हे, अरे, हो |

अनुवाद में शब्दरूप और धातुरूप के ज्ञान के द्वारा हम कर्ता, क्रिया और कर्म का उपयोग करके वाक्य निर्माण करते हैं। कुछ शब्दरूप और धातुरूप निम्नलिखित हैं-

शब्द रूप

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष/अन्य पुरुष | सः (वह) | तौ (वे दोनों) | ते (वे सब) |
| मध्यम पुरुष | त्वं (तुम) | युवाम् (तुम दोनों) | यूयम् (तुम सब) |
| उत्तम पुरुष | अहं (मैं) | आवाम् (हम दोनों) | वयम् (हम सब) |

राम शब्द अकारान्त पुल्लिङ्ग

| कारक | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | रामः | रामौ | रामाः |
| द्वितीया | रामम् | रामौ | रामान् |
| तृतीया | रामेण | रामाभ्याम् | रामैः |
| चतुर्थी | रामाय | रामाभ्याम् | रामेभ्यः |

| | | | |
|---|---|---|---|
| पञ्चमी | रामात् | रामाभ्याम् | रामेभ्यः |
| षष्ठी | रामस्य | रामयोः | रामाणाम् |
| सप्तमी | रामे | रामयोः | रामेषु |
| सम्बोधन | हे राम | हे रामौ | हे रामाः |

लता शब्द आकारान्त स्त्रीलिङ्ग

| कारक | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | लता | लते | लताः |
| द्वितीया | लताम् | लते | लताः |
| तृतीया | लतया | लताभ्याम् | लताभिः |
| चतुर्थी | लतायै | लताभ्याम् | लताभ्यः |
| पञ्चमी | लतायाः | लताभ्याम् | लताभ्यः |
| षष्ठी | लतायाः | लतयोः | लतानाम् |
| सप्तमी | लतायाम् | लतयोः | लतासु |
| सम्बोधन | हे लते | हे लते | हे लताः |

ज्ञान शब्द अकारान्त नपुंसकलिङ्ग

| कारक | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | ज्ञानम् | ज्ञाने | ज्ञानानि |
| द्वितीया | ज्ञानम् | ज्ञाने | ज्ञानानि |
| तृतीया | ज्ञानेन | ज्ञानाभ्याम् | ज्ञानैः |
| चतुर्थी | ज्ञानाय | ज्ञानाभ्याम् | ज्ञानेभ्यः |
| पञ्चमी | ज्ञानात् | ज्ञानाभ्याम् | ज्ञानेभ्यः |
| षष्ठी | ज्ञानस्य | ज्ञानयोः | ज्ञानानाम् |
| सप्तमी | ज्ञाने | ज्ञानयोः | ज्ञानेषु |
| सम्बोधन | हे ज्ञान | हे ज्ञाने | हे ज्ञानानि |

हरि शब्द इकारान्त पुलिङ्ग

| कारक | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | हरिः | हरी | हरयः |
| द्वितीया | हरीम् | हरी | हरीन् |
| तृतीया | हरिणा | हरिभ्याम् | हरिभिः |
| चतुर्थी | हरये | हरिभ्याम् | हरिभ्यः |
| पञ्चमी | हरेः | हरिभ्याम् | हरिभ्यः |
| षष्ठी | हरेः | हर्योः | हरीणाम् |
| सप्तमी | हरौ | हर्योः | हरिषु |
| सम्बोधन | हे हरे | हे हरी | हे हरयः |

बालक शब्द अकारान्त पुलिङ्ग

| कारक | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | बालकः | बालकौ | बालकाः |
| द्वितीया | बालकम् | बालकौ | बालकान् |
| तृतीया | बालकेन | बालकाभ्याम् | बालकैः |
| चतुर्थी | बालकाय | बालकाभ्याम् | बालकेभ्यः |
| पञ्चमी | बालकात् | बालकाभ्याम् | बालकेभ्यः |
| षष्ठी | बालकस्य | बालकयोः | बालकानाम् |
| सप्तमी | बालके | बालकयोः | बालकेषु |
| सम्बोधन | हे बालक | हे बालकौ | हे बालकाः |

बालिका शब्द आकारान्त स्त्रीलिङ्ग

| कारक | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | बालिका | बालिके | बालिकाः |
| द्वितीया | बालिकाम् | बालिके | बालिकाः |
| तृतीया | बालिकया | बालिकाभ्याम् | बालिकाभिः |
| चतुर्थी | बालिकायै | बालिकाभ्याम् | बालिकाभ्यः |
| पञ्चमी | बालिकायाः | बालिकाभ्याम् | बालिकाभ्यः |
| षष्ठी | बालिकायाः | बालिकयोः | बालिकानाम् |
| सप्तमी | बालिकायाम् | बालिकयोः | बालिकासु |
| सम्बोधन | हे बालिके | हे बालिके | हे बालिकाः |

धातु रूप

गम् धातु लट्लकार वर्तमानकाल

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | गच्छति | गच्छतः | गच्छन्ति |
| मध्यम पुरुष | गच्छसि | गच्छथः | गच्छथ |
| उत्तम पुरुष | गच्छामि | गच्छावः | गच्छामः |

गम् धातु लङ्लकार भूतकाल

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | अगच्छत् | अगच्छताम् | अगच्छन् |
| मध्यम पुरुष | अगच्छः | अगच्छतम् | अगच्छत |
| उत्तम पुरुष | अगच्छम् | अगच्छाव | अगच्छाम |

गम् धातु लृट्लकार भविष्यत्काल

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| मध्यम पुरुष | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उत्तम पुरुष | गमिष्यामि | गमिष्यावः | गमिष्यामः |

गम् धातु लोट्लकार आज्ञा एवं अनुज्ञा

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | गच्छतु | गच्छताम् | गच्छन्तु |
| मध्यम पुरुष | गच्छ | गच्छतम् | गच्छत |
| उत्तम पुरुष | गच्छानि | गच्छाव | गच्छाम |

गम् धातु विधिलिङ्ग (चाहिए)

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | गच्छेत् | गच्छेताम् | गच्छेयुः |
| मध्यम पुरुष | गच्छेः | गच्छेतम् | गच्छेत |
| उत्तम पुरुष | गच्छेयम् | गच्छेव | गच्छेम |

धातु रूप

पठ् धातु लट्‌लकार वर्तमानकाल

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पठति | पठतः | पठन्ति |
| मध्यम पुरुष | पठसि | पठथः | पठथ |
| उत्तम पुरुष | पठामि | पठावः | पठामः |

पठ् धातु लङ्‌लकार भूतकाल

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | अपठत् | अपठताम् | अपठन् |
| मध्यम पुरुष | अपठः | अपठतम् | अपठत |
| उत्तम पुरुष | अपठम् | अपठाव | अपठाम |

पठ् धातु लृट्‌लकार भविष्यत्काल

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यम पुरुष | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तम पुरुष | पठिष्यामि | पठिष्यावः | पठिष्यामः |

पठ् धातु लोट्‌लकार आज्ञा एवं अनुज्ञा

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पठतु | पठताम् | पठन्तु |
| मध्यम पुरुष | पठ | पठतम् | पठत |
| उत्तम पुरुष | पठानि | पठाव | पठाम |

पठ् धातु विधिलिङ्ग (चाहिए)

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पठेत् | पठेताम् | पठेयुः |
| मध्यम पुरुष | पठेः | पठेतम् | पठेत् |

| | | | |
|---|---|---|---|
| उत्तम पुरुष | पठेयम् | पठेव | पठेम |

धातु रूप

दृश् धातु लट्लकार वर्तमानकाल

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पश्यति | पश्यतः | पश्यन्ति |
| मध्यम पुरुष | पश्यसि | पश्यथः | पश्यथ |
| उत्तम पुरुष | पश्यामि | पश्यावः | पश्यामः |

दृश् धातु लङ्कार भूतकाल

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | अपश्यत् | अपश्यताम् | अपश्यन् |
| मध्यम पुरुष | अपश्यः | अपश्यतम् | अपश्यत |
| उत्तम पुरुष | अपश्यम् | अपश्याव | अपश्याम |

दृश् धातु लृट्लकार भविष्यत्काल

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | द्रक्ष्यति | द्रक्ष्यत: | द्रक्ष्यन्ति |
| मध्यम पुरुष | द्रक्ष्यसि | द्रक्ष्यथः | द्रक्ष्यथ |
| उत्तम पुरुष | द्रक्ष्यामि | द्रक्ष्यावः | द्रक्ष्यामः |

दृश् धातु लोट्लकार आज्ञा एवं अनुज्ञा

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पश्यतु | पश्यताम् | पश्यन्तु |
| मध्यम पुरुष | पश्य | पश्यतम् | पश्यत |
| उत्तम पुरुष | पश्यानि | पश्याव | पश्याम |

दृश् धातु विधिलिङ्ग (चाहिए)

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पश्येत् | पश्येताम् | पश्येयुः |
| मध्यम पुरुष | पश्येः | पश्येतम् | पश्येत |
| उत्तम पुरुष | पश्येयम् | पश्येव | पश्येम |

धातु रूप

पा धातु लट्लकार वर्तमानकाल

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पिबति | पिबतः | पिबन्ति |
| मध्यम पुरुष | पिबसि | पिबथः | पिबथ |
| उत्तम पुरुष | पिबामि | पिबावः | पिबामः |

पा धातु लङ्कार भूतकाल

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | अपिबत् | अपिबताम् | अपिबन् |
| मध्यम पुरुष | अपिबः | अपिबतम् | अपिबत |
| उत्तम पुरुष | अपिबम् | अपिबाव | अपिबाम |

पा धातु लृट्लकार भविष्यत्काल

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पास्यति | पास्यतः | पास्यन्ति |
| मध्यम पुरुष | पास्यसि | पास्यथः | पास्यथ |
| उत्तम पुरुष | पास्यामि | पास्यावः | पास्यामः |

पा धातु लोट्लकार आज्ञा एवं अनुज्ञा

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पिबतु | पिबताम् | पिबन्तु |
| मध्यम पुरुष | पिब | पिबतम् | पिबत |
| उत्तम पुरुष | पिबानि | पिबाव | पिबाम |

पा धातु विधिलिङ्ग (चाहिए)

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पिबेत् | पिबेताम् | पिबेयुः |
| मध्यम पुरुष | पिबेः | पिबेतम् | पिबेत |
| उत्तम पुरुष | पिबेयम् | पिबेव | पिबेम |

## 9.2 हिन्दी से संस्कृत अनुवाद

**अनुच्छेद 1**

**हिन्दी**

योग एक प्राचीन भारतीय पद्धति है जो शारीरिक, मानसिक, और आध्यात्मिक स्वास्थ्य को सुधारने के लिए व्यायाम, ध्यान, और साधना का एक संयोजन प्रस्तुत करती है। यह एक पूर्ण जीवन शैली है जो मानसिक शांति, शारीरिक स्वास्थ्य, और आत्मा की उन्नति को प्रोत्साहित करती है। योग न केवल शारीरिक स्वास्थ्य को बनाए रखने में मदद करता है बल्कि मानसिक और आध्यात्मिक संतुलन को भी प्रोत्साहित करता है। यह जीवन की गुणवत्ता को सुधारने और एक संतुलित और स्वस्थ जीवन जीने के लिए एक उत्कृष्ट साधन है।

**संस्कृतम्**

योगः एका प्राचीना भारतीया पद्धतिः अस्ति या शारीरिक-मानसिक-आध्यात्मिकस्वास्थ्यं रक्षितुं व्यायामध्यानसाधनानां संयोजनं करोति। एषा एका परिष्कृतजीवनशैली अस्ति या मानसिकशान्तिं शारीरिकस्वास्थ्यम्  आत्मनः उन्नतिं च प्रोत्साहयति । योगः न केवलं शारीरिकस्वास्थ्यं रक्षितुं साहाय्यं करोति अपितु मानसिकं आध्यात्मिकं च सामञ्जस्यं साधयति। जीवनस्य गुणवत्तां वर्धयितुं सन्तुलितं स्वस्थं च जीवनं जीवितुं च उत्तमं साधनम् अस्ति ।

**अनुच्छेद 2**

**हिन्दी**

पर्यावरण हमारे चारों ओर की प्राकृतिक और कृत्रिम दुनिया को संदर्भित करता है, जिसमें वायु, जल, मृदा, पौधे, जानवर, और मानव गतिविधियाँ शामिल हैं। यह हमें जीवित रहने के लिए आवश्यक संसाधन प्रदान करता है और हमारे जीवन की गुणवत्ता को प्रभावित करता है। पर्यावरण का संरक्षण और सुधार अत्यंत महत्त्वपूर्ण है क्योंकि यह जीवन के सभी रूपों के लिए एक स्वस्थ और स्थायी वातावरण सुनिश्चित करता है।

**संस्कृतम्**

पर्यावरणम् अस्मान् परितः प्राकृतिकं कृत्रिमं च जगत् द्योतयति, यत्र वायुजलमृत्पादपपशुमानवीयाः क्रियाकलापाः सन्ति । एतद् अस्माकं जीवनाय आवश्यकानि संसाधनानि प्रददाति, अस्माकं जीवनस्य गुणवत्तां च प्रभावितं करोति । पर्यावरणस्य संरक्षणं संशोधनं च अत्यन्तं महत्त्वपूर्णं यतः एतत् जीवनस्य सर्वविधस्वरूपाणां कृते स्वस्थं सुस्थिरञ्च वातावरणं सुनिश्चितं करोति।

**अनुच्छेद 3**

**हिन्दी**

गणतंत्र दिवस भारत का एक महत्त्वपूर्ण राष्ट्रीय पर्व है, जो हर साल 26 जनवरी को मनाया जाता है। यह दिन 1950 में भारतीय गणतंत्र की स्थापना का प्रतीक है, जब भारतीय संविधान लागू हुआ और भारत एक गणतंत्र राज्य बना। गणतंत्र दिवस का उद्देश्य लोकतांत्रिक मूल्यों, संविधान के महत्त्व और राष्ट्रीय एकता को मनाना होता है।गणतंत्र दिवस पर देशवासियों को एकजुटता, समानता और स्वतंत्रता के मूल्यों की याद दिलाई जाती है। यह दिन हर भारतीय के लिए गर्व और सम्मान का अवसर होता है। गणतंत्र दिवस पर हर व्यक्ति को अपने अधिकारों और कर्तव्यों की समझ बढ़ानी चाहिए और राष्ट्र निर्माण की दिशा में योगदान देना चाहिए।

**संस्कृत**

गणतन्त्रदिवसः भारतस्य महत्त्वपूर्णं राष्ट्रियपर्व, यत् प्रतिवर्षं जनवरीमासस्य २६दिनाङ्के आचर्यते । दिनमेतत् १९५० तमे वर्षे भारतगणराज्यस्य स्थापनायाः प्रतीकमस्ति। यदा भारतीयसंविधानं प्रावर्तत भारतं गणराज्यञ्च जातम् । गणतन्त्रदिवसस्य उद्देश्यमस्ति – लोकतान्त्रिकमूल्यसंवैधानिकमहत्त्वराष्ट्रियैक्यानां सम्माननम्। गणतन्त्रदिने देशवासिनः एकतायाः, समानतायाः, स्वतन्त्रतायाः च मूल्यानि स्मार्यन्ते । अयं दिवसः प्रत्येकस्य भारतीयस्य कृते अभिमानस्य सम्मानस्य च अवसरः। गणतन्त्रदिने प्रत्येकेन जनेन स्वस्य अधिकारस्य कर्त्तव्यस्य च बोधः वर्धनीयः राष्ट्रनिर्माणे च योगदानं करणीयम्।

**अनुच्छेद 4**

**हिन्दी**

जल संरक्षण एक महत्त्वपूर्ण पहलू है जो हमारे संसाधनों की स्थिरता और दीर्घकालिक उपलब्धता को सुनिश्चित करता है। जल का महत्त्व न केवल जीवन के लिए आवश्यक है, बल्कि यह कृषि, उद्योग और ऊर्जा उत्पादन के लिए भी अनिवार्य है। जल संकट और प्रदूषण को ध्यान में रखते हुए, जल संरक्षण के उपाय अपनाना अत्यंत महत्त्वपूर्ण हो गया है।

संस्कृत

जलसंरक्षणं एकः महत्त्वपूर्णः पक्षः अस्ति यः अस्माकं संसाधनानाम् स्थायित्वं दीर्घकालीन-उपलब्धतां च सुनिश्चितं करोति । जलस्य महत्त्वं न केवलं जीवनाय अत्यावश्यकम् अपितु कृषि-उद्योग-ऊर्जसाम् उत्पादनाय अत्यावश्यकम् । जलसंकटं प्रदूषणं च मनसि निधाय जलसंरक्षणोपायानाम् अनुसरणम् अत्यावश्यकं जातमस्ति।

**अनुच्छेद 5**

**हिन्दी**

संगणक (या कंप्यूटर) एक इलेक्ट्रॉनिक डिवाइस है जिसे डेटा प्रोसेसिंग, गणना और सूचना का प्रसंस्करण करने के लिए डिज़ाइन किया गया है। संगणक ने आधुनिक जीवन के विभिन्न पहलुओं को बदल दिया है और यह आज की दुनिया का एक अनिवार्य हिस्सा बन गया है। संगणक का विकास कई चरणों में हुआ है। पहले चरण में, विशाल और महंगे मैकेनिकल कंप्यूटर थे। फिर, ट्रांजिस्टर और इंटीग्रेटेड सर्किट के आगमन के साथ संगणक छोटे, तेज और अधिक सस्ती हो गईं। आज, संगणक स्मार्टफोन, टैबलेट, और अन्य पोर्टेबल डिवाइस के रूप में हर जगह उपलब्ध हैं और कृत्रिम बुद्धिमत्ता (AI) जैसी नई तकनीकों के साथ निरंतर विकास कर रहे हैं। संगणक का प्रभाव और उपयोग दिन-प्रतिदिन बढ़ता जा रहा है और यह जीवन के लगभग हर क्षेत्र में महत्त्वपूर्ण भूमिका निभा रहा है।

**संस्कृत**

सङ्गणकं (सङ्गणकं वा) दत्तांशसंसाधनं, गणनां, सूचनासंसाधनं च कर्तुं निर्मितं इलेक्ट्रॉनिकयन्त्रम् अस्ति । सङ्गणकः आधुनिकजीवनस्य विविधपक्षान् परिवर्त्य अद्यतनजगतः अत्यावश्यकः भागः जातः। सङ्गणकस्य विकासः अनेकेषु चरणेषु अभवत् । प्रथमचरणे विशालाः महार्घाः च यांत्रिकसङ्गणकाः आसन् । ततः ट्रांजिस्टरस्य, एकीकृतपरिपथस्य च आगमनेन सङ्गणकः लघुः, द्रुततरः, अल्पार्घः च जातः । अद्यत्वे सङ्गणकाः स्मार्टफोन्, टैब्लेट्, अन्यपोर्टेबल-यन्त्ररूपेण सर्वत्र विद्यमानाः सन्ति, कृत्रिमबुद्धिः (AI) इत्यादिभिः नूतनैः प्रौद्योगिकीभिः सह निरन्तरं विकासं कुर्वन्तः सन्तिसङ्गणकस्य प्रभावः उपयोगः च दिने दिने वर्धमानः अस्ति, प्रायः जीवनस्य प्रत्येकस्मिन् क्षेत्रे महत्त्वपूर्णां भूमिकां निर्वहति ।

## 9.2 अभ्यासार्थ प्रश्न

### 9.2.1 वस्तुनिष्ठ प्रश्न

1. संस्कृत में समास कितने हैं –
(क) चार (ख) पाँच (ग) छः (घ) सात
2. संस्कृत में कारक कितने हैं –
(क) चार (ख) पाँच (ग) छः (घ) सात
3. "रामः गृहं गच्छति" यह वाक्य किस वाच्य में है-
(क) कर्तृवाच्य (ख) कर्मवाच्य (ग) भाववाच्य (घ) इनमें से कोई नहीं
4. "रामेण गृहं गम्यते" यह वाक्य किस वाच्य में है-
(क) कर्तृवाच्य (ख) कर्मवाच्य (ग) भाववाच्य (घ) इनमें से कोई नहीं
5. कर्ता को जो सबसे अधिक प्रिय हो, उसे कहते हैं –
(क) कारक (ख) कर्म कारक (ग) करण कारक (घ) सम्प्रदान कारक

### 9.2.2 लघु-उत्तरीय प्रश्न

1. अनुवाद किसे कहते हैं?
2. अनुवाद के आधारतत्त्वों का वर्णन कीजिए।
3. समास का सामान्य परिचय दीजिए।
4. कारक का सामान्य परिचय दीजिए।
5.सन्धि का सामान्य परिचय दीजिए।

### 9.2.3 दीर्घ-उत्तरीय प्रश्न

1. अनुवाद के भेदों का वर्णन कीजिए।
2. समास का भेदसहित वर्णन कीजिए।
3.स्वयं ही हिन्दी से संस्कृत अनुवाद का एक अनुच्छेद करके प्रदर्शित कीजिए।
4. कारक का भेदसहित वर्णन कीजिए।

5.सन्धि का भेदसहित वर्णन कीजिए।

# इकाई 10 – संस्कृत से हिन्दी में अनुवाद (अनुच्छेद पर आधारित)

## इकाई की रूपरेखा

10.0 उद्देश्य
10.1 प्रस्तावना
10.2 संस्कृत से हिन्दी में अनुवाद (अनुच्छेद पर आधारित)
अनुच्छेद 1
अनुच्छेद 2
अनुच्छेद 3
अनुच्छेद 4
अनुच्छेद 5
10.3अभ्यासार्थ प्रश्न
10.3.1 वस्तुनिष्ठ प्रश्न
10.3.2 लघु-उत्तरीय प्रश्न
10.3.3 दीर्घ-उत्तरीय प्रश्न

## 10.0 उद्देश्य

भाषा ज्ञान का प्रकाशक है। बैखरी वाक् से उद्भूत इस संकेत में अवबोध शक्ति निवास करती है किन्तु भाषायी माध्यम के ज्ञान के बिना उसके मर्म अर्थात् अर्थावबोध को जाना नहीं जा सकता है। अतः एक भाषा से दूसरी भाषा में अनुवाद के द्वारा इस गुत्थी को सुलझाया जा सकता है। जिस भाषा में अनुवाद कियाजाता है उसको लक्ष्य भाषा कहा जाता है और जिस भाषा से अनुवाद किया जाता है उसे स्रोत भाषा कहा जाता है। मीमांसा परिभाषा में कृष्णराज यज्वा कहते हैं – "मानान्तरप्राप्तस्य पुनर्कथनमनुवादः" अर्थात् प्रमाणान्तर से प्राप्त का फिर से कहना अनुवाद है। इसलिए इस ईकाई में विद्यार्थी अनुवाद के नियम का अवबोध करेंगे। संस्कृत कारक, समास, सन्धि, कर्तृवाच्य, कर्मवाच्य एवं भाववाच्य को समझ सकेंगे। संस्कृत से हिन्दी अनुवाद करने का कौशल विकसित करने में समर्थ होंगे।

## 10.1 प्रस्तावना

अनुवाद के माध्यम से विद्यार्थी को स्रोत भाषा से लक्ष्य भाषा में अनुवाद करना सिखाया जाता है। इससे विद्यार्थी को दोनो भाषाओं का अवबोध होता है और इस प्रकार वह दोनों ही भाषाओं में प्रवीण हो सकता है। अनुवाद में अभ्यास अत्यन्त आवश्यक है। यदि हम

निरन्तर अनुवाद का अभ्यास करते हैं तो निश्चित रूप से भाषा के अवबोध में हमें आशानुरूप सफलता मिलती है। इसलिए हमें अनुवाद का लगातार अभ्यास करना चाहिए।

## 10.2 संस्कृत से हिन्दी में अनुवाद (अनुच्छेद पर आधारित)

**अनुच्छेद 1**

**संस्कृत**

एकस्मिन् दिवसे अहं ग्रामात् गच्छन् आसम्। तत्र एकः कुक्कुरः धावन् गच्छति स्म। कुक्कुरस्य अग्रे एकः बिडालोऽपि धावन् गच्छति स्म। मम हृदये अकस्मात् एकः विचारः प्रकटितः । एषः कुक्कुरः विडालस्य शत्रुरस्ति। भीतः बिडालः पलायते। अतः एतस्य रक्षा करणीया। पुनः मया एकं दण्डं गृहीत्वा कुक्कुरः विद्रावितः। बिडालः प्रसन्नः जातः।

हिन्दी

एक दिन मैं गाँव से जा रहा था। वहाँ एक कुत्ता दौड़ता हुआ जा रहा था। कुत्ते के आगे एक बिडाल भी दौड़ते हुए जा रहा था। मेरे हृदय में अकस्मात् एक विचार प्रकटित हुआ। यह कुत्ता बिडाल का शत्रु है। डरा हुआ विडाल भाग रहा है। अतः इसकी रक्षा करनी चाहिए। फिर मेरे द्वारा एक डण्डा लेकर कुत्ते को भगा दिया गया। बिडाल प्रसन्न हो गया।

**अनुच्छेद 2**

**संस्कृतम्**

मोहनः गृहं गच्छति। सीमा ओदनं खादति। सः अद्य द्विचक्रिकया पुस्तकालयं गतवान्। मम प्रिया क्रीडा क्रिकेट इति अस्ति। वन्दना राजीवस्य भगिनी अस्ति। सुरेशस्य पितृव्यः विद्यालयस्य अध्यापकः वर्तते। पराजयस्य पश्चात् जयः वर्तते। किं वयं जिह्वार्थं अत्यधिकं भोजनं कुर्याम? वयं अध्ययने प्रमादं न कुर्याम। दुःखे वयं भगवन्तं स्मरेम। रामस्य भ्राता लक्ष्मणोऽस्ति। संगणकस्य हेतवे सर्वाधिका उपयुक्ता भाषा संस्कृतं वर्तते।

**हिन्दी**

मोहन घर जाता है। सीमा भात खाती है। वह आज साइकिल से पुस्तकालय गया। मेरा प्रिय खेल क्रिकेट है। वन्दना राजीव की बहन है। सुरेश के चाचा विद्यालय के अध्यापक हैं। हार के बाद जीत है। क्या हमें जिह्वा के लिए अत्यधिक भोजन करना चाहिए? हमें पढ़ने में प्रमाद नहीं करना चाहिए। दुःख में हमे भगवान् का स्मरण करना चाहिए। राम के भाई लक्ष्मण हैं। संगणक के लिये सर्वाधिक उपयुक्त भाषा संस्कृत है।

**अनुच्छेद 3**

**संस्कृत**

अद्य रविवासरः वर्तते। एकस्मिन् पक्षे सप्तदिवसाः भवन्ति। सोमवासरे शिवपूजा भवति। श्रावणमासेऽपि शिवस्य प्रतिदिनम् आराधना क्रियते। सीता अद्य गृहं न गमिष्यति। ह्यः मया सह न तेन गमनं नोचितमासीत्। रावणस्य भगिनी शूर्पणखा आसीत्। अद्य भृगुवासरः न अस्ति। मोहनः मम प्रियं मित्रमस्ति। सुरेशस्य गृहे अद्य भोजने पायसः निर्मितः अस्ति। वयं सम्यग्रूपेण भोजनं कुर्याम।

**हिन्दी**

आज रविवार है। एक सप्ताह में सात दिन होते हैं। सोमवार के दिन शिव की पूजा होती है। सावन महीने में भी शिव की प्रतिदिन आराधना की जाती है। सीता आज घर नहीं जाएगी। उसे कल मेरे साथ नहीं जाना चाहिए था। रावण की बहन शूर्पणखा थी। आज शुक्रवार नहीं है। मोहन मेरा प्रिय मित्र है। सुरेश के घर आज भोजन में खीर बनी है। हमें ठीक से भोजन करना चाहिए।

**अनुच्छेद 4**

**संस्कृतम्**

काकोरी-प्रसङ्गः एकः ऐतिहासिकी घटना अस्ति या भारतीयस्वतन्त्रतासङ्घर्षकाले घटिता। १९२५तमे वर्षे अगस्तमासस्य ९ दिनाङ्के उत्तरप्रदेशस्य काकोरीनगरे क्रान्तिकारिणां समूहेन सर्वकारीयकोषं वहत् रेलयानं लुण्ठितम्। अस्याः घटनायाः प्रमुखाः षड्यन्त्रकारिणः रामप्रसादबिस्मिलः, अशफाक-उल्लाहखानः, राजेन्द्रनाथ-लाहिरी, मन्मथनाथगुप्तः च आसन्। ते आङ्ग्लसर्वकारस्य प्रतीकात्मकविरोधरूपेण घटनामेतां कृतवन्तः, स्वातन्त्र्यसङ्घर्षस्य सुदृढीकरणार्थं च। काकोरी-घटनायाः परिणामस्वरूपेण आङ्ग्लसर्वकारेण क्रान्तिकारिणां विरुद्धमभियोगः कृतः, अनेके मृत्युदण्डं प्राप्तवन्तः। परन्तु एषा घटना भारतीयस्वतन्त्रतासङ्ग्रामं नूतनां दिशां दर्शितवती, अनेकान् युनः स्वतन्त्रतासङ्ग्रामार्थं च प्रेरितवती।

**हिन्दी**

काकोरी काण्ड एक ऐतिहासिक घटना है, जो भारतीय स्वतंत्रता संग्राम के दौरान हुई थी। यह घटना 9 अगस्त 1925 को उत्तरप्रदेश के काकोरी में हुई थी, जब क्रांतिकारियों के समूह ने एक ट्रेन को लूटा, जिसमें सरकारी खजाना था। इस घटना के मुख्य साजिशकर्ता रामप्रसाद बिस्मिल, अशफाकउल्लाखान, राजेंद्रनाथलाहिड़ी और मन्मथनाथ गुप्ता थे। उन्होंने इस घटना को अंग्रेज सरकार के खिलाफ एक प्रतीकात्मक विरोध के रूप में किया था और इसका उद्देश्य स्वतंत्रता संग्राम को मजबूत करना था। काकोरी काण्ड के परिणामस्वरूप, अंग्रेज सरकार ने क्रांतिकारियों पर मुकदमा चलाया और कई को फांसी की सजा दी गई। लेकिन इस घटना ने भारतीय स्वतंत्रता संग्राम को एक नई दिशा दी और कई युवाओं को स्वतंत्रता संग्राम में शामिल होने के लिए प्रेरित किया।

**अनुच्छेद 5**

**संस्कृत**

स्वातन्त्र्ययुद्धेन भारतस्य स्वातन्त्र्य-आन्दोलनस्य सन्दर्भः उदेति। आङ्ग्लशासनस्य विरुद्धं भारतीयैः कृतः दीर्घः सङ्घर्षपूर्णः प्रयासः आसीत्। १८५७ तमे वर्षे आरब्धम् एतत् आन्दोलनम् १९४७ तमे वर्षे भारतस्य आस्वातन्त्र्यात् प्राचलत्। यदा आङ्ग्लशासनात् भारतेन स्वातन्त्र्यं प्राप्तम्। स्वातन्त्र्यसङ्घर्षे बह्व्यः महत्त्वपूर्णाः घटनाः आन्दोलनानि च सम्मिलितानि आसन्, तेषु कानिचन प्रमुखानि सन्ति- 1. १८५७ तमे वर्षे आरक्षी-विद्रोहः – एतत्भारतस्य प्रथमं स्वातन्त्र्ययुद्धम् आसीत्, यत्ब्रिटिश-ईस्ट्इण्डिया-कम्पनीविरुद्धम् आरब्धम्।

2. स्वदेशी-आन्दोलनम् : आङ्ग्ल-उत्पादानां बहिष्काराय, स्वदेशीय-उत्पादानां प्रयोगवर्द्धनार्थं च एतत् आन्दोलनम् आरब्धम्।

3. असहयोगान्दोलनम् : महात्मगान्धिना आरब्धम् एतत् आन्दोलनं ब्रिटिशसर्वकारेण सह असहयोगार्थम् आसीत्।

4. नागरिक-अवज्ञा-आन्दोलनम् : गान्धिना इति आरब्धम् एतत् आन्दोलनम् आङ्ग्लसर्वकारस्य नियमानाम् उल्लङ्घनार्थम् आसीत्।

5. भारतं त्यजतु इति आन्दोलनम् : एतत् आन्दोलनं १९४२ तमे वर्षे आरब्धम्, येन आङ्ग्लसर्वकारः भारतान्निर्गन्तुम् साग्रहम् उक्तः।

**हिन्दी**

स्वतंत्रता संग्राम भारत के स्वतंत्रता आंदोलन को संदर्भित करता है, जो ब्रिटिश शासन के खिलाफ भारतीयों द्वारा किया गया एक लंबा और संघर्षपूर्ण प्रयास था। यह आंदोलन 1857 में शुरू हुआ और 1947 में भारत की स्वतंत्रता तक जारी रहा, जब भारत ने ब्रिटिश शासन से स्वतंत्रता प्राप्त की। स्वतंत्रता संग्राम में कई महत्त्वपूर्ण घटनाएं और आंदोलन शामिल थे, जिनमें से कुछ प्रमुख हैं:

1. 1857 का सिपाही विद्रोह: यह भारत का पहला स्वतंत्रता संग्राम था, जो ब्रिटिश ईस्ट इंडिया कंपनी के खिलाफ शुरू हुआ था।

2. स्वदेशी आंदोलन: यह आंदोलन ब्रिटिश उत्पादों का बहिष्कार करने और स्वदेशी उत्पादों को बढ़ावा देने के लिए शुरू किया गया था।

3. असहयोग आंदोलन : महात्मा गांधी द्वारा शुरू किया गया यह आंदोलन ब्रिटिश सरकार के साथ सहयोग करने से इनकार करने के लिए था।
4. सविनय अवज्ञा आंदोलन : गांधीजी द्वारा शुरू किया गया यह आंदोलन ब्रिटिश सरकार के कानूनों का उल्लंघन करने के लिए था।
5. भारत छोड़ो आंदोलन: यह आंदोलन 1942 में शुरू हुआ, जिसमें ब्रिटिश सरकार से भारत छोड़ने की मांग की गई थी।

## 10.3 अभ्यासार्थ प्रश्न

### 10.3.1 वस्तुनिष्ठ प्रश्न

1. संस्कृत में समास कितने हैं –
(क) चार (ख) पाँच (ग) छः (घ) सात
2. संस्कृत में कारक कितने हैं –
(क) चार (ख) पाँच (ग) छः (घ) सात
3. "रामः गृहं गच्छति" यह वाक्य किस वाच्य में है-
(क) कर्तृवाच्य (ख) कर्मवाच्य (ग) भाववाच्य (घ) इनमें से कोई नहीं
4. "रामेण गृहं गम्यते" यह वाक्य किस वाच्य में है-
(क) कर्तृवाच्य (ख) कर्मवाच्य (ग) भाववाच्य (घ) इनमें से कोई नहीं
5. कर्ता को जो सबसे अधिक प्रिय हो, उसे कहते हैं –
(क) कारक (ख) कर्म कारक (ग) करण कारक (घ) सम्प्रदान कारक

### 10.3.1 लघु-उत्तरीय प्रश्न

1. अनुवाद किसे कहते हैं?
2. अनुवाद के आधार तत्त्वों का वर्णन कीजिए।
3. समास का सामान्य परिचय दीजिए।
4. कारक का सामान्य परिचय दीजिए।
5.सन्धि का सामान्य परिचय दीजिए।

### 9.2.3 दीर्घ-उत्तरीय प्रश्न

1. अनुवाद के भेदों का वर्णन कीजिए।
2. समास का भेद सहित वर्णन कीजिए।
3.स्वयं ही हिन्दी से संस्कृत अनुवाद का एक अनुच्छेद करके प्रदर्शित कीजिए।
4. कारक का भेदसहित वर्णन कीजिए।
5. सन्धि का भेदसहित वर्णन कीजिए।

सन्दर्भ-ग्रन्थ सूची :-


- अनुवाद-चन्द्रिका – चक्रधर नौटियाल हंस, मोतीलाल बनारसीदास, दिल्ली, संस्करण 2013
- निबन्धपारिजातम् – डॉ. गणेशदत्त शर्मा, साहित्य भण्डार, मेरठ, पञ्चम संस्करण 2010
- निबन्धनिकुञ्जम् – डॉ. हरिदत्त शर्मा, नारायण पब्लिशिंग हाउस, इलाहाबाद, प्रथम संस्करण, 1976
- निबन्धशतकम् – डॉ. कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी, द्वितीय संस्करण, 1980

- निबन्धषट्कम् – डॉ. सम्पूर्णानन्द तिवारी, अखण्ड पब्लिशिंग हाउस, प्रथम संस्करण, 2019
- रचानुवादकौमुदी – डॉ. कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी, संस्करण, 2016